# शास्त्रसंदेशमाला

## ध्यानयोग-गणित-व्याकरणशास्त्रनिकराः

१८



# શાસ્ત્રસંદેશમાલા-૧૮

ધ્યાનયોગ-ગંણિત-વ્યાકરણશાસ્ત્રનિકરાઃ

ભાગ-૧૮


॥ સંકલન ॥

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.પંન્યાસશ્રી બોધિરત્નવિજયજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.



॥ પ્રકાશક ॥

શાસ્ત્રસંદેશમાલા

૩, મણિભદ્ર એપાર્ટમેન્ટ, સુભાષચોક,

આરાધના ભવન માર્ગ - ગોપીપુરા, સુરત-૧

✲ શાસ્ત્રસંદેશમાલા - ૧૮
✲ ધ્યાનયોગ-ગણિત-વ્યાકરણશાસ્ત્રનિકરા:
✲ પ્રથમ આવૃત્તિ
✲ આસો વદ-૫, વિ.સ.૨૦૬૧
✲ કિંમત રૂ.૪૦/- (પડતર કિંમત)

**॥ પ્રમાર્જના - શુદ્ધિ ॥**

**પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા.**

**પૂ.મુ.શ્રી શ્રુતતિલકવિજયજી મ.સા.**

**પૂ.સા.શ્રી ભદ્રજ્ઞાશ્રીજી મ.**

**પંડિતવર્ય શ્રી રતીભાઈ ચીમનલાલ દોશી**

✲ **ટાઇપ સેટીંગ:** પાયલ પ્રિન્ટર્સ - રાધનપુર
શ્રીજી ગ્રાફીક્સ, પાલડી, અમદાવાદ.
✲ **મુદ્રક :** શિવકૃપા ઓફસેટ પ્રીન્ટર્સ, દૂધેશ્વર, અમદાવાદ-૪

---

વિશેષ નોંધ : શાસ્ત્રસંદેશમાલાના ૧ થી ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યમાંથી કરવામાં આવેલ છે. તેની નોંધ લેવા વિનંતી.

**આભાર...!   અનુમોદનીય...!   અનુકરણીય...!**

શાસ્ત્રસંદેશમાલાના
અઢારમા ભાગના
પ્રકાશનનો સંપૂર્ણ લાભ



પૂ.આ.ભ.શ્રી વિજય જિનપ્રભસૂરીશ્વરજી
મ.સા.ના શિષ્યરત્ન
પૂ.મુ.શ્રી હ્રીંકારપ્રભવિજયજી મ.સા.ની
પ્રેરણાથી

**શ્રી ઝાલાવાડ જૈન શ્વેતામ્બર**
**મૂર્તિપૂજક તપાગચ્છ સંઘ ટ્રસ્ટ**
**સુરેન્દ્રનગર**

તરફથી શ્રી સંઘના જ્ઞાનદ્રવ્યની નિધિમાંથી
લેવામાં આવેલ છે. તેની અમો ભૂરી...ભૂરી...
અનુમોદના કરીએ છીએ...! શ્રી સંઘ તથા ટ્રસ્ટીગણના
અમો આભારી છીએ ..!

- શાસ્ત્રસંદેશમાલા

## સ્વાધ્યાયથી સ્વર્ગના સુખનો અનુભવ...!

બધા ગુણોનું મૂળ 'સ્વાધ્યાય' છે. 'સ્વાધ્યાય' એ મહા નિર્જરાનું કારણ છે. માટે જ સ્વાધ્યાય જેવો કોઈ તપ નથી એમ કહ્યું છે.

તપથી નિર્જરા થાય છે. બાહ્ય તપ કરતાં અભ્યન્તર તપથી અધિક અધિક નિર્જરા થાય છે. સ્વાધ્યાય એ અભ્યન્તર તપ છે માટે એ મહાનિર્જરાનું કારણ છે.

સ્વાધ્યાય પણ મોટે ભાગે અધ્યાત્મ, ધ્યાન, યોગને સાધી આપનાર આગમાદિ ધર્મશાસ્ત્રોનો જ કરવાનો, તે પણ લાયકાત કેળવીને, ગુર્વાજ્ઞા મેળવીને જ. ધર્મકથા પણ સ્વાધ્યાયમાં જ આવે છતાં વાચતાં પૂર્વે ય ગુરુની રજા તો જોઈએ જ. ગુરુની રજા વિના એ પણ વાંચવાની નહિ.

ધર્મનું જ્ઞાન સ્વરૂપે તારક હોવા છતાં તે ગીતાર્થ ગુરુને સ્વાધીન હોઈ તેમની અનુજ્ઞા મેળવીને જ વંચાય.

સ્વાધ્યાયથી જ્ઞાનાવરણીય કર્મ ખપે એમ શાસ્ત્ર કહે છે. આ તો ઉઘાડી વાત છે કે ખપે પણ તમને જ્ઞાનાવરણીય કર્મ નડે છે ? જ્ઞાન ભણવું હોય પણ ચડે નહીં એને જ્ઞાનાવરણીય નડ્યું કહેવાય. પણ તમારે તો ભણવું છે જ ક્યાં કે જ્ઞાનાવરણીય નડે છે કે નહિ એની ખબર પડે !

સ્વાધ્યાયમાં જેનું ચિત્ત લાગી જાય છે એ તો અહીં પણ સ્વર્ગના સુખનો અનુભવ કરે છે.

ધર્મકથા સિવાયનો ચાર પ્રકારનો સ્વાધ્યાય તો બધા રોજ કરી શકે તેવો છે. ધર્મકથા નામનો સ્વાધ્યાય કદાચ બધા કરી શકે તેવું ન બને. કારણ કે તેમાં વિશેષ ક્ષઓપશમાદિ શક્તિ અને યોગ્યતા જોઈએ.

**-પૂ.આ.દેવ.શ્રીમદ્ વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજા**

# પ્રકાશકીય ........ !

પૂર્વના પૂર્વાચાર્ય - પુણ્યાત્માઓએ પદ્યમાં પ્રરૂપેલા ૪૦૦ થી વધારે પ્રકરણોના ૭૦,૦૦૦ હજાર શ્લોક પ્રમાણ સાહિત્ય આજે એક નવા સ્વરૂપે આવી રહ્યું છે.

ઉપલબ્ધ ગ્રંથોનું ઉપકારક-ઉપયોગી બનનાર આ એક-અપૂર્વ-અનોખું-અનેરું-અદ્‌ભૂત પ્રકાશનમાં અમો નિમિત્ત બનેલ છીએ તેનો અમોને હર્ષ છે.

છેલ્લા ત્રણ વર્ષથી પૂ.પંન્યાસશ્રી બોધિરત્નવિજયજી મ.સા.ના શિષ્ય રત્ન પૂ.પંન્યાસશ્રી તપોરત્નવિજયજી મ.સા.ના સંપૂર્ણ માર્ગદર્શન મુજબ પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સાહેબે આ સંકલના તૈયાર કરી આપેલ છે.

શાસ્ત્રસંદેશમાલા દ્વારા પ્રકાશિત થયેલ આ ૨૦ પુસ્તકોમાં પૂ.આ.શ્રી હરિભદ્રસૂરીશ્વરજી મ.સા. તથા પૂ.ઉપા.શ્રી યશોવિજયજી મ.સા. દ્વારા રચાયેલ પદ્ય સાહિત્યના સાત પુસ્તકો છે બાકીના તેર પુસ્તકોમાં અલગ-અલગ કર્તાઓની કૃત્તિઓનો વિષયવાર સમાવેશ કરવામાં આવેલ છે.

શાસ્ત્રસંદેશમાલાના આ પ્રકાશનમાં શુદ્ધિનો વિશેષ ખ્યાલ રાખવામાં આવેલ છે. દરેક પુસ્તકમાં આગળ જણાવેલ પૂજ્યશ્રીઓએ તે પુસ્તકનું પ્રમાર્જન કરી આપેલ છે. તેમાં પૂ.પં.શ્રી બોધિરત્નવિજયજી મ.સા.ના શિષ્યરત્ન પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા., પૂ.આ.શ્રી યોગતિલકસૂરીશ્વરજી

મ.સા.ના શિષ્યરત્ન પૂ.મુ.શ્રી શ્રુતતિલકવિજયજી મ.સા. (સંસ્કૃત ગ્રન્થો) તથા પૂ.સા.શ્રી દક્ષાશ્રીજી મ.ના. શિષ્યા પૂ.સા.શ્રી ભદ્રજ્ઞાશ્રીજી મ. આદિએ વિશેષ કાળજી રાખી શુદ્ધિ કરી આપેલ છે.

જૈન પંડિતોમાં જેમનું આગવું સ્થાન-નામ છે એવા પંડિતવર્યશ્રી રતીભાઇ ચીમનલાલ દોશીએ શાસ્ત્રસંદેશમાલાના આ ૨૦ ભાગનું સમગ્ર મેટર ચેક કરી આપેલ છે. દરરોજ પાંચ-છ કલાક અધ્યયનનું કાર્ય ચાલુ રાખી, અથાગ મહેનત કરી સમયનો જે ભોગ તેઓશ્રીએ આપેલ છે તે પ્રશંસનીય છે.

શ્રી સુરત તપગચ્છ રત્નત્રયી આરાધક સંઘે તથા બીજા અલગ અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યની નિધિમાંથી ઉદારતાપૂર્વક લાભ લઇ આ કાર્યને વેગવંતુ બનાવેલ છે તે માટે અમો તેઓશ્રીના આભારી છીએ.

ટાઇપ સેટીંગ માટે પાયલ પ્રિન્ટર્સ - રાધનપુરના માલિક શ્રી ઇકબાલભાઇ તથા શ્રીજી ગ્રાફીક્સ - અમદાવાદના શ્રી નિકુંજભાઇ પટેલે ઘણી જ ધીરજ અને ખંતથી શ્રી રીઝવાન શેખના સહકારથી આ કાર્યને પૂર્ણતાએ પહોંચાડ્યું છે.

પ્રીન્ટીંગ, ટાઇટલ પ્રીન્ટીંગ તથા બાઇન્ડીંગનું કામ શિવકૃપા ઓફસેટ પ્રીન્ટર્સ-અમદાવાદના ભાવિનભાઇએ વિશેષ કાળજીપૂર્વક કરી આપેલ છે.

**શાસ્ત્રસંદેશમાલા**

# ॥ अनुक्रमणिका ॥


ध्यानयोग

| | | | |
|---|---|---|---|
| १. | अध्यात्मबिन्दुः | १२८ | १-१६ |
| २. | संवेगामृतम् | ४३ | १६-१९ |
| ३. | ध्यानदीपिका | २०४ | २०-३७ |
| ४. | चित्तशुद्धिफलम् | २१ | ३७-३८ |
| ५. | योगशास्त्रम् | १००८+२९५ | ३९-१५३ |
| ६. | श्रीमद्गीता-तत्त्वगीता | ६८८ | १५४-२२६ |

गणित

| | | | |
|---|---|---|---|
| ७. | सिद्धान्तसारोद्धारः | २१३ | २२६-२४३ |
| ८. | नमस्कारस्तवः | ३२ | २४४-२४६ |
| ९. | मण्डलप्रकरणम् | ९९+४ | २४७-२५५ |
| १०. | जीवादिगणितसंग्रहगाथाः | ३ | २५६ |
| ११. | धनुःपृष्ठबाहासंग्रहगाथाः | ११ | २५६-२५७ |
| १२. | प्रतरप्रमाणसंग्रहगाथाः | ११ | २५७-२५८ |
| १३. | घनगणितसंग्रहगाथाः | ७ | २५८ |
| १४. | सूक्ष्मार्थसप्ततिप्रकरणम् | ७५ | २५९-२६५ |

| | | | |
|---|---|---|---|
| १५. | चरणकरणमूलोत्तरगुण | ५५ | २६५–२७० |
| १६. | श्रावकव्रतभङ्गप्रकरणम् | ४१ | २७१–२७४ |
| १७. | सभापञ्चकप्रकरणम् | ४३ | २७५–२७८ |
| | व्याकरण | | |
| १८. | कविकल्पद्रुमः | ३८३ | २७९–३१२ |
| १९. | श्रीकान्तत्र विभ्रमसूत्रम् | २१ | ३१३–३१४ |
| २०. | वाक्यप्रकाशः | १२८ | ३१५–३२५ |
| २१. | संज्ञाधिकारः | ३३ | ३२६–३२८ |
| २२. | परिशिष्ठ–१ | | १–८ |



संपूर्ण श्लोक संख्या – ३५४६

संपूर्ण पृष्ठ संख्या – ८ + ३२८ + ८

उपाध्यायश्रीहर्षवर्धनकृतः

# ।। अध्यात्मबिन्दुः ।।

## निश्चयव्यवहार प्ररूपणप्रवणा प्रथमा द्वात्रिंशिका

ब्रूमः किमध्यात्ममहत्त्वमुच्चैर्यस्मात् परं स्वं च विभिद्य सम्यक् ।
समूलघातं विनिहत्य घाति नाभेयभूः केवलमाससाद ॥ १ ॥

लब्ध्वाऽऽर्यत्वमथ प्रपद्य च गुरोर्नैकट्यमेनःक्षया-
च्छुत्वाऽध्यात्ममथ प्रपीय च ततस्तत्त्वामृतं यत् पुनः ।
क्षेत्रज्ञः किल मोमुहीति विषयग्रामेषु बद्धस्पृह-
स्तन्नूनं त्रिजगज्जये धृतिमतो मोहस्य विस्फूर्जितम् ॥ २ ॥

धत्तै(त्तेऽ)म्भोधिर्जवनपवनाऽऽच्छोटनोन्मूर्च्छदुग्रो-
ल्लोलश्रेणीचटुलितवपुर्व्याकुलत्वं यथाऽयम् ।
निष्कम्पोऽपि स्वरसवशतः कर्मकम्पाकसङ्गं
तद्वत् क्षुभ्यत्ययमपि परः पूरुषः संप्रपद्य ॥ ३ ॥

कुम्भोदञ्चनवर्द्धमानकरकस्थाल्याद्यवस्थान्तरा-
ण्येकोऽपि ध्रुवमम्बुयोगवशतो मृद्द्रव्यपिण्डोऽश्नुते ।
तद्वत् कर्मजलीययोगमुपलभ्यात्माऽपि तिर्यग्नरा-
मर्त्यप्रेतपुरोगजातिनिकरत्वेन स्वयं जायते ॥ ४ ॥

भूतार्थो ननु निश्चयस्तदितरोऽभूतार्थमावेदयन्
संत्याज्यो नितरां यतः स्व-परयोर्भेदे स बीजं न हि ।
भूतार्थस्तु विशुद्धवस्तुकलनाऽभिज्ञो ध्रुवं यत् ततो
भूतार्थं ननु संश्रितो विशदधीः सम्यग्दगात्मा भवेत् ॥ ५ ॥

व्यवहरणनयोऽयं पुंस्वरूपं विकारि
भणति च नवतत्त्वैर्मुद्रितं क्षुद्ररूपम् ।

अबुधजनविबोधार्थं किलास्योपदेशो
जिनसमयविमूढः केवलं यः श्रितोऽमुम् ॥ ६ ॥

आत्मस्वरूपं पररूपमुक्तमनादिमध्यान्तमकर्तृभोक्तृ ।
चिदङ्कितं चन्द्रकरावदातं प्रद्योतयन् शुद्धनयश्चकास्ति ॥ ७ ॥

तीर्थप्रवृत्त्यर्थमयं फलेग्रहि-स्त्रिकालविद्भिर्व्यवहार उक्तः ।
पर(रः) पुनस्तत्त्वविनिश्चयाय नयद्वयात्तं हि जिनेन्द्रदर्शनम् ॥ ८ ॥

ये यावन्तो ध्वस्तबन्धा अभूवन् भेदज्ञानाभ्यास एवात्र बीजम् ।
नूनं येऽप्यध्वस्तबन्धा भ्रमन्ति तत्राभेदज्ञानमेवेति विद्मः ॥ ९ ॥

भेदज्ञानाभ्यासतः शुद्धचेता नेता नाऽयं नव्यकर्मावलीनाम् ।
लीनां स्वस्मिन् नामयंस्तां नितान्तं तान्तं स्वीयं रूपमुज्जीवयेत १०

अज्ञानतो मुद्रितभेदसंविच्छक्तिः किलायं पुरुषः पुराणः ।
परात्मनोस्तत्त्वमसंविदानः कर्तृत्वमात्मन्यसकृत् प्रयुङ्क्ते ॥ ११ ॥

स्वतोऽन्यतो वाऽप्यधिगत्य तत्त्वं यदेष देवः किल संप्रबुद्धः ।
द्रव्यं परं नो मम नाहमस्येतीयर्ति बुद्धिं यदि बध्यते किम् ?॥ १२ ॥

प्रमाण-निक्षेप-नयाः समेऽपि स्थिताः पदेऽधः किल वर्तमाने ।
प्रपश्यतां शान्तमनन्तमूर्ध्वं पदं न चैषां कतमोऽपि भाति ॥ १३ ॥

बन्धोदयोदीरणसत्त्वमुख्याः भावाः प्रबन्धः खलु कर्मणां स्यात् ।
एभ्यः परं यत्तु तदेव धामाऽस्म्यहं परं कर्मकलङ्कमुक्तम् ॥ १४ ॥

वातोल्लसत्तुङ्गतरङ्गभङ्गाद् यथा स्वरूपे जलधिः समास्ते ।
तथाऽयमात्माऽखिलकर्मजन्यविकारनाशात् स्पृशति स्वरूपम्॥ १५ ॥

चैद्रूप्यमेकमपहाय परे किलामी
यावन्त एव पुरुषेऽत्र लसन्ति भावाः ।
तान् संप्रपद्य च परत्वधिया समस्ता-
नास्ते तदाऽऽस्त्रवति किं ननु कर्म नव्यम् ? ॥ १६ ॥

शरीरसंसर्गत एव सन्ति वर्णादयोऽमी निखिलाः पदार्थाः ।
जाम्बूनदादेरुपधेरिव द्राग् वैशद्यभाजि स्फटिके तरङ्गाः ॥ १७ ॥

स्फटिकमणिरिवायं शुद्धरूपश्चिदात्मा
भजति विविधभावं द्वेष-रागाद्युपाधेः ।
यदपि तदपि रूपं नैव जहात्ययं स्वं
न खलु भवति चान्द्री ध्वान्तरूपा मरीचिः ॥ १८ ॥

परं स्वात्मत्वेन स्वमपि च परत्वेन कलय-
न्नयं रागद्वेषाद्यनियतविभावैः परिणतः ।
ततो रज्ये रुष्याम्यहमिति विकल्पाननुकलं
प्रकुर्वन् जीवोऽयं ननु जगति कर्माणि कुरुते ॥ १९ ॥

भूताविष्टो नर इह यथाऽज्ञानतः स्वं च भूतं
चैकीकुर्वन् भवति विसदृक्चेष्टितानां विधाता ।
अप्यात्माऽयं निज-परविवेकच्युतः कामकोपा-
दीनां कर्ता भवति नितरां शुद्धचिद्दूषकाणाम् ॥ २० ॥

व्याप्यव्यापकभावतः प्रकुरुते जीवः स्वभावान् यथा
भावाद् वेदकवेद्यतोऽनुभवति स्वांस्तान् स्वभावान् पुनः ।
तद्वद् वेदयतेऽथवा प्रकुरुते भावान् परांश्चेदयं
स्यादेवं हि कृतिद्वयस्य करणात् सिद्धान्तबाधः स्फुटम् ॥ २१ ॥

सर्वे भावा निश्चयेन स्वभावान् कुर्वन्तीत्थं साधु सिद्धान्ततत्त्वम् ।
भिन्नद्रव्यीभूतकर्मप्रपञ्चं जीवः कुर्यात् तत् कथं वस्तुतोऽयम् ॥ २२ ॥

रागो द्वेषो मोह इत्येवमाद्या भावा नूनं शुद्धचिद्दूषकाः स्युः ।
रोधादेषां जायते द्रव्यकर्माभावस्तस्मान्निर्विकारानुभूतिः ॥ २३ ॥

ज्ञानं ज्ञाने भवति न खलु क्रोधमुख्येषु तत् स्यात्
क्रोधः क्रोधे न हि पुनरयं पूरुषे चित्स्वरूपे ।

कर्मद्वन्द्वे न हि भवति चिच्चिन्न कर्मावरुद्धे-
तीत्थं शुद्धग्रहणरसिकः किं विधत्तेऽन्यभावम् ॥ २४ ॥

यदात्मनाऽऽत्मास्रवयोर्विभेदो ज्ञातो भवेत् ज्ञानदृशा तदानीम् ।
निवर्ततेऽज्ञानजकर्तृकर्मप्रवृत्तिरस्मान्निखिलाऽपि मङ्क्षु ॥ २५ ॥

स्वत्वेन स्वं परमपि परत्वेन जानन् समस्ता-
न्यद्रव्येभ्यो विरमणमितश्चिन्मयत्वं प्रपन्नः ।
स्वात्मन्येवाभिरतिमुपयन् स्वात्मशीली स्वदर्शी-
त्येवं कर्ता कथमपि भवेत् कर्मणां नैष जीवः ॥ २६ ॥

व्याप्तं यत् किल वर्वृतीति निखिलावस्थासु याद्रूप्यतो
जातु स्यान्न तदात्मताविरहितं तेनास्य साकं भवेत् ।
तादात्म्यं तदिह स्फुरन्न च भवन् मुक्तौ नितान्तं ततो
वर्णादिः सकलो गणो ननु परद्रव्यत्वमेव श्रयेत् ॥ २७ ॥

अनवरतमनेकान् भावयन् कल्पनौघान्
कथमिव परतत्त्वाऽऽबध्यसे कर्मजालैः ।
यदि सकलविकल्पातीतमेकं स्वरूप-
मनुभवसि ततः किं संसृतिः किं च बन्धः ॥ २८ ॥

किं मुग्ध ! चिन्तयसि काममसद्विकल्पां-
स्तद्ब्रह्मरूपमनिशं परिभावयस्व ।
यल्लाभतोऽस्ति न परः पुनरिष्टलाभो
यद्दर्शनाच्च न परं पुनरस्ति दृश्यम् ॥ २९ ॥

पन्था विमुक्तेर्भविनां न चान्यो यतः परः केवलिभिः प्रदिष्टः ।
आनन्द-बोधावपि यद् विहाय पदेऽपरस्मिन्न कदापि भातः॥ ३० ॥

यत् पञ्चेन्द्रियवर्जितं प्रविगलत्कर्माष्टकं प्रस्खलत्-
स्वान्तं विग्रहपञ्चकेन वियुतं स्पृष्टं न च प्रत्ययैः ।

शान्तं शाश्वतमक्रियं निरुपधि द्रव्यान्तरासङ्गतं
विष्वक् प्रोल्लसदर्चिषा परिगतं तत्त्वं तदेवास्म्यहम् ॥ ३१ ॥

इत्येवं संप्रधार्य द्रुततरमखिलं भेदसंविद्बलेन
जीवाजीवप्रपञ्चं विदलति किल यो मोहराजानुवृत्तिम् ।
ज्ञानानन्दस्वरूपे भगवति भजति स्वात्मनि स्थैर्यमाशु
प्रक्षिप्याज्ञानभावं स भवति नचिराच्छुद्धबुद्धस्वरूपः ॥ ३२ ॥

## द्वितीया द्वात्रिंशिका कर्तृ-कर्मस्वरूपप्रकाशनप्रवणा

मूर्च्छा विषान्मणेर्दाहाभावो भ्रामकतो भ्रमः ।
चुम्बकात् कर्षणं चेति नाना पुद्गलशक्तयः ॥ १ ॥

ज्ञानावृत्यादयोऽप्येते पुद्गला दृढशक्तयः ।
जीवशक्तिं बलाद् भङ्क्त्वा कुर्वन्त्याशु विकारिणीम् ॥ २ ॥

मद्यान्मौढ्यं धियस्तैक्ष्ण्यं दृष्टं ब्राह्मीहविष्यतः ।
कर्मापि पौद्गलं तद्वत् कथं न स्याद् विकारकृत् ? ॥ ३ ॥

अविद्या हि विकारित्वं जनयेदात्मनः सती ।
नासती गगनाब्जस्येवासतोऽर्थक्रियाच्युतेः ॥ ४ ॥

सत्त्वे द्वैतं ततः कर्म पौद्गलं तद्विकारकृत् ।
अनुग्रहोपघातौ यत् पुद्गलेभ्य इति श्रुतेः ॥ ५ ॥

अनादित्वादनन्तः स्यात् संश्लेषः कर्म-जीवयोः ।
स्वात्मयोगवदित्येवं प्रवितर्क्यं न तार्किकैः ॥ ६ ॥

अनादित्वेऽपि भावस्य ध्वंसः स्याद्धेतुसन्निधेः ।
सुवर्णमलवद् भव्यसंसारपरिणामवत् ॥ ७ ॥

कर्ताऽयं स्वस्वभावस्य परभावस्य न क्वचित् ।
कर्ताऽऽत्मेति श्रुतिः साक्षाद् यत् स्वभावक्रियापरा ॥ ८ ॥

अशुद्धनिश्चयेनायं कर्ता स्याद् भावकर्मणः ।
व्यवहाराद् द्रव्यकर्मकर्तृत्वमपि चेष्यते ॥ ९ ॥

व्याप्यव्यापकभावो हि यदिष्टः कर्तृ-कर्मणोः ।
तदभावे द्रव्यकर्मकर्तृत्वं घटते कथम् ? ॥ १० ॥

तदात्मनि भवेद् व्याप्तृव्याप्यता नातदात्मनि ।
तदभावे कथं कर्तृकर्मता ज़ीव-कर्मणोः ? ॥ ११ ॥

निमित्त-नैमित्तिकते कर्माऽऽत्मपरिणामयोः ।
तस्मादस्तु भ्रामकाश्मायसकृत्योरिव स्फुटम् ॥ १२ ॥

अनादिनिधनं ज्योतिः कर्तृत्वादिविकारभाक् ।
स्वस्वरूपात् परिच्युत्य विशत्यन्धे तमस्यहो ! ॥ १३ ॥

शरीरेष्वात्मसम्भ्रान्तेः स्वरूपाद् दृक् प्रविच्युता ।
भूताविष्टनरस्येव तस्मादेव क्रियाभ्रमः ॥ १४ ॥

बहिष्पदार्थेष्वासक्तं यथा ज्ञानं विवर्तते ।
तथैवान्तर्विवर्तेत का कथा पुण्य-पापयोः ? ॥ १५ ॥

देहो नास्मीति संवित्तेरात्मतत्त्वं दृढीकृतम् ।
अज्ञानाहितसंस्कारात् तमेवात्मतयेक्षते ॥ १६ ॥

देहः पुद्गलसङ्घातो जडस्त्वं तु चिदात्मकः ।
एतत्सौरूप्यवैरूप्ये स्यातामादौ कथं तव ? ॥ १७ ॥

यद् दृश्यं तदहं नास्मि यच्चादृश्यं तदस्म्यहम् ।
अतोऽत्रात्मधियं हित्वा चित्स्वरूपं निजं श्रये ॥ १८ ॥

मांसास्थ्याद्यशुचिद्रव्यात् स्वयमेव जुगुप्सते ।
तदेवात्मतया हन्त ! मन्यतेऽज्ञानसंस्कृतः ॥ १९ ॥

तटस्थः पश्य देहादीन् मैषु स्वीयधियं सृज ।
स्वत्वाभिमानो ह्येतेषु संसृतेर्बीजमग्रिमम् ॥ २० ॥

स्वरूपार्पितदृष्टीनां शक्रत्वेऽपि स्पृहा न हि ।
स्वरूपानर्पितदृशां पदेऽल्पेऽपि महादरः ॥ २१ ॥

अनादिभ्रष्टस्वात्मोत्थानन्दस्वादा हि दुर्धियः ।
मन्यन्ते विषयैस्तृप्तिं जम्बालैरिव पोत्रिणः ॥ २२ ॥

प्रत्यग्ज्योतिःसुखास्वादनिष्ठनैष्ठिकदृष्टयः ।
विषयान् हन्त ! पश्यन्ति कुत्स्यवल्गवदप्रियान् ॥ २३ ॥

शुद्धं ब्रह्मेति संज्ञानसुधाकुण्डसमाप्लुताः ।
धौतकर्ममलाः सन्तो निर्वृतिं परमाश्रिताः ॥ २४ ॥

स्वरूपालम्बनान्मुक्तिर्नान्यथाऽतिप्रसङ्गतः ।
अहमेव मयोपास्यो मुक्तेर्बीजमिति स्थितम् ॥ २५ ॥

यथैव पद्मिनीपत्रमस्पृष्टं तोयबिन्दुभिः ।
तथाऽत्माऽयं स्वभावेन न स्पृष्टः कर्मपुद्गलैः ॥ २६ ॥

सौख्यं सांसारिकं दुःखानुषक्तं व्यक्तमध्वनि ।
ग्रीष्मे पान्थस्य मध्याह्ने मग्नै पङ्क्त्यैव खादतः ॥ २७ ॥

भोगेष्वश्रान्तविश्रान्तिर्धियः क्षेमङ्करी न हि ।
पन्नगीव नयत्येषाऽतुच्छां मूर्च्छां यदात्मनः ॥ २८ ॥

यदुच्चैः पदतः पातः सोऽनुभावो विभावजः ।
तत्रैवाविरतं सक्तिं श्रयन्नद्यापि खिद्यसे ॥ २९ ॥

वपुष्यहंधीनिगडेन कामं चिराय बद्धोऽसि महानुभाव ! ।
बोधस्वरूपोऽयमहं न देहीत्यवेत्य तं चिद्द्रुघणेन भङ्ग्धि॥ ३० ॥

नाहं वपुष्मान् न च मे वपुर्वा बोधोऽहमस्मि प्रकृतेर्विभिन्नः ।
इयाननेहा न मया व्यभावि गच्छन्नहो ! मोहविडम्बितेन ॥ ३१ ॥

प्रकृतिगुणविरक्तः शुद्धदृष्टिर्न भोक्ता
तदितर इह भोक्ता तत्स्वरूपानुरक्तः ।

तदिह भवति भेदाभ्यासशाली जयीति
प्रकृतिगुणविकारानङ्कितं स्वं भजध्वम् ॥ ३२ ॥

## तृतीया द्वात्रिंशिका आत्मस्वरूपभावनपरा

विकल्पजालकल्लोलैर्लोले किल मनोजले ।
नात्मा स्फुरति चिद्रूपस्तोयचन्द्र इव स्फुटम् ॥ १ ॥

आत्मानं भावयेन्नित्यं भावितैः किमनात्मभिः ।
प्रपद्य निस्तरङ्गत्वं येनात्मा मुच्यतेऽचिरात् ॥ २ ॥

परद्रव्योन्मुखं ज्ञानं कुर्वन्नात्मा परो भवेत् ।
स्वद्रव्योन्मुखतां प्राप्तः स्वतत्त्वं विन्दते क्षणात् ॥ ३ ॥

देहे यथाऽऽत्मधीरस्य तथाऽऽत्मन्येव चेद् भवेत् ।
कालत्रयेऽपि बन्धोऽस्य न भवेदिति मन्महे ॥ ४ ॥

न स्वं मम परद्रव्यं नाहं स्वामी परस्य च ।
अपास्येत्यखिलान् भावान् यद्यास्ते बध्यतेऽथ किम् ? ॥ ५ ॥

निष्क्रियस्याऽयसोऽयस्कान्तात् स्यात् सक्रियता यथा ।
कर्मोपाधेस्तथा जीवो निष्क्रियः सक्रियो भवेत् ॥ ६ ॥

शुद्धो बुद्धश्चिदानन्दो निष्क्रियो निर्मलोऽव्ययः ।
परमात्मा जिनः सोऽयं सकर्मा जीवनामभाक् ॥ ७ ॥

कर्मभ्यः कर्मकार्येभ्यः पृथग्भूतं चिदात्मकम् ।
आत्मानं भावयेन्नित्यं नित्यानन्दपदप्रदम् ॥ ८ ॥

एको वै खल्वहं शुद्धो निर्ममो ज्ञानदृङ्मयः ।
स्वस्वरूपे निमज्ज्य द्राग् रागादीन् क्षपयाम्यमून् ॥ ९ ॥

पीत-स्निग्ध-गुरुत्वानां यथा स्वर्णान्न भिन्नता ।
तथा दृग्-ज्ञान-वृत्तानां निश्चयान्नात्मनो भिदा ॥ १० ॥

व्यवहारेण तु ज्ञानादीनि भिन्नानि चेतनात् ।
राहोः शिरोवदप्येषोऽभेदे भेदप्रतीतिकृत् ॥ ११ ॥

भेदविज्ञानमभ्यस्येद् धारावाहितया बुधः ।
येन विक्षिप्य कर्माणि स्वयं शुद्धोऽवतिष्ठते ॥ १२ ॥

स्वस्मिन् स्वधीर्नयेन्मुक्तिं देहेऽहंधीर्पुनर्भवम् ।
ततो देहादहंबुद्धिं प्रच्याव्याऽऽत्मनि योजयेत् ॥ १३ ॥

पुण्य-पापद्वयं रुद्ध्वा ध्यायेदात्मानमात्मना
बीजाभावे ततो जन्मप्ररोहोऽयं न संभवेत् ॥ १४ ॥

अनादिबन्धनोपाधिसन्निधानप्रधावितान् ।
रागादीनात्मनः कुर्वन्नात्मा भवति कारकः ॥ १५ ॥

यथाऽऽत्मानं निबध्नाति तन्तुभिः कोशकृत् कृमिः ।
तथाऽशुद्धाशयैर्जीवो बध्नात्यात्मानमात्मना ॥ १६ ॥

लूताऽऽत्मानं निबध्नाति यथा स्वात्मोत्थतन्तुभिः ।
शुभाशुभाध्यवसायैरात्मा ब्रध्नंस्तथेष्यताम् ॥ १७ ॥

ईश्वरस्य न कर्तृत्वमशरीरत्वाद् दिगादिवत् ।
ततस्तत्प्रेरितो हन्त ! कथमेव विचेष्टते ? ॥ १८ ॥

अनाभोगेन वीर्येण कर्ता देहादिकर्मणाम् ।
भुक्ताहारस्य मांसासृग्रसादिपरिणामवत् ॥ १९ ॥

प्रत्येकं कर्तृतायां स्यान्न चैवं गौरवं किल ।
प्रामाणिकं यत् तद् दुष्टं नेति क्रोडीकृतं परैः ॥ २० ॥

स्वयं प्रयाति दुर्योनिं कर्मणा विवशीकृतः ।
अमेध्यसंभृतं कूपमुन्मत्त इव चेतनः ॥ २१ ॥

अन्वय-व्यतिरेकाभ्यां मोक्षहेतुः स्वधीर्भवेत् ।
तदभावे तपस्तप्तं योगक्षेमकरं न हि ॥ २२ ॥

वेत्ता सर्वस्य भावस्य वेद्यं च परमं हि यः ।
अनाद्यनन्तो निर्द्वन्द्वो महानन्दो महोदयः ॥ २३ ॥

विकल्पैरपरामृष्टः स्पृष्टः कर्माणुभिर्न च ।
परं ज्योतिः परं तत्त्वं तदेवाहं न चापरम् ॥ २४ ॥

अणोरणीयान् महतो महीयानपि यः पुनः ।
यस्य भासा जगत् सर्वं भात्यलक्ष्यः पुनः स्वयम् ॥ २५ ॥

विषमश्नन् यथा वैद्यो विक्रियां नोपगच्छति ।
कर्मोदये तथा भुञ्जानोऽपि ज्ञानी न बध्यते ॥ २६ ॥

मन्त्रादिध्वस्तसामर्थ्यो न दहत्यनलो यथा ।
बद्धुं नालं तथा ज्ञानशक्तिकुण्ठीकृतोऽप्ययम् ॥ २७ ॥

मद्यं पिबन् यथा मत्तो न स्यादरतिमान् पुमान् ।
द्रव्यभोगं तथा कुर्वन् सम्यग्दृष्टिर्न लिप्यते ॥ २८ ॥

स्वरूपनिष्ठाः सर्वेऽपि भावा इति जिनेशगीः ।
तान् मत्वाऽऽत्मतया कर्तृ-कर्मक्लेशो वृथैव किम् ? ॥ २९ ॥

भावाःस्वरूपविश्रान्ता लोके सर्वेऽत्र यद्यमी ।
मूढो हन्ताहमेवैको रज्ये यत् परवस्तुषु ॥ ३० ॥

न रज्यते न च द्वेष्टि परभावेषु निर्ममः ।
ज्ञानमात्रं स्वरूपं स्वं पश्यन्नात्मरतिर्मुनिः ॥ ३१ ॥

इत्येवं स्व-परद्वयास्खलितचिच्छक्त्या विभाव्य स्फुटं
भेदं स्वेतरयोर्विहाय च परान् भावान् समग्रानमून् ।
चित्तत्त्वे स्थिरतामुपैति परमां यो निर्विकाराशयः
स स्यात् कर्मकलङ्कपङ्कविकलो नित्यस्फुरच्चिद्घनः ॥ ३२ ॥

## चतुर्थी द्वात्रिंशिका शुद्धस्वरूपप्रकाशिका

प्रत्यग्ज्योतिर्जयति तदिदं पिष्टकर्मप्रपञ्चं
दूरोन्मग्नं घनतरविभ्रमावार्णवावर्तवेगात् ।
प्रोद्यत्तेजःप्रकरदलितध्वान्तकर्माष्टकाष्ठो-
त्फुल्लत्काष्ठावदननलिनं किन्नु मार्तण्डबिम्बम् ॥ १ ॥

कर्तृत्वादिविकारभारविगमाद् बिभ्रत् सनत् सुस्थतां
त्रुट्यद्बन्धचतुष्टयोल्लसदमन्दानन्दसंवर्मितम् ।
शुद्धं शान्तमनन्तमप्रतिहतं विष्वग् विचित्रोल्लसद्-
ज्ञेयाकारकरम्बितं निरुपधि ज्योतिः समुज्जृम्भते ॥ २ ॥

सर्वद्रव्यविवर्तचक्रमखिलं यद् बोधवारांनिधा-
वेकांशस्थमिवोच्चकास्ति कलयच्छुद्धत्वमाकालिकम् ।
प्रोद्यत्त्विड्भरलीढविश्वभुवनाभोगं भरादुल्लस-
च्छान्तं तत्परमात्मतत्त्वमुदितानन्दं समुद्द्योतते ॥ ३ ॥

मुक्तेरध्वाऽयमेको भवति हि किल दृग्-ज्ञान-वृत्तत्रयात्मा
तां संसूत्र्य स्थितिं यो विहरति निखिलान्यस्वसंस्पर्शशून्यः ।
तादृशी तत्सतत्त्वानुचरणकलनाबद्धकेलिः किलासौ
यत् किञ्चित् कर्म कुर्यात् तदखिलमुदितं निश्चितं निर्जरैव ॥ ४ ॥

अहं कर्ता भोक्तेत्यनवरतमज्ञानमुदभू-
दियत्कालं शुद्धानुभवनरहस्यं ह्यविदुषाम् ।
इदानीं सार्वज्ञं वचनममृतादप्यतिरसं
चिरं पायं पायं निचितमपि तन्नो निरगलत् ॥ ५ ॥

स्वरूपस्याज्ञानाद् भवति किल कर्तैष पुरुषो
ह्यकर्तृत्वं तस्यावगम इह सिद्धं स्वरसतः ।
अतो राग-द्वेषावुदयजनितावित्यनुकलं
तटस्थः सन् पश्यन् कथमिव भवत्येष कृतिमान् ? ॥ ६ ॥

यदाऽविद्याजन्यं दृढतममभूदन्धतमसं
तदा राग-द्वेषादिषु समभवत् स्वात्मधिषणा ।
चिरं भेदाभ्यासादधिगतमिदानीं तु विशदं
परं पूर्णं ब्रह्म च्युतविकृतिकमस्मि ध्रुवमहम् ॥ ७ ॥

यदज्ञानात् सुप्तः समभवमलं यद्व्यवसितौ
प्रबुद्धस्तत् तत्त्वं चिरमधिगतं मा मदयति ।
दरिद्रः संप्राप्तधनमिव निधानं प्रतिकलं
समालोक्याध्रातिं कथमिव न गन्तास्म्यहमतः ॥ ८ ॥

विवर्तैरस्पृष्टं विशदतममत्यन्तगहनं
महः स्तान्नः स्पष्टं प्रकटितनिजानन्दविभवम् ।
यदास्वादानन्दादगणितमहोभोगविभवाः
महासत्त्वा मुक्त्यै चिरमिह यतन्ते कृतधियः ॥ ९ ॥

तपश्चण्डं तीव्रव्रतकलनमत्युल्बणपरी-
षहेभ्योऽभीरुत्वं क्षितिशयनमुख्यः परिकरः ।
यदज्ञानान्निर्नायक इव हि सेनाचरगणः
समग्रो व्यर्थः स्यात् तदिदमहमस्म्यद्भुतमहः ॥ १० ॥

तदन्वेष्यं तत्त्वं सततमिदमुत्कटतर-
स्फुरत्तेजःपुञ्जप्रदलितदृढाविद्यममलम् ।
यदास्वादाद् भान्ति त्रिदशपतिचक्रित्वपदवी-
सुखास्वादाः क्षारोदकवदमृताग्रे ध्रुवममी ॥ ११ ॥

समभ्यस्यन्तां नन्वखिलमतशास्त्राणि कुधियः
स्वपाण्डित्योत्कर्षोद्दलितपरदर्पाः किल परे ।
वपुष्यात्मभ्रान्तिर्यदि न विनिवृत्ता किमु ततो
विमुच्यन्ते, पाठो न भवति कदाचिद् गुणकरः ॥ १२ ॥

अविद्यासंस्काराद् बहुतरककालाद् यदभव-
च्च्युतं मे स्वं रूपं तदिदमुपलब्धं खलु मया ।
विविक्तं चिद्भासा परिगतमनन्तं सुविशदं
स्वतन्त्रं तत्रेदं जयति ननु बीजं जिनवचः ॥ १३ ॥

मथित्वाऽऽत्माऽऽत्मानं भवति परमज्योतिरचिराद्
यथा घृष्ट्वाऽऽत्मानं क्षितिरुह इहैति ज्वलनताम् ।
अतः शुद्धे ब्रह्मण्यनवरतनिमग्ना[ऽम]लदृशां
शिवाप्तिर्निर्दिष्टा सरणिरपरा काचन न हि ॥ १४ ॥

यथा रज्जौ सर्पभ्रममतिरविज्ञानजनिता
क्रियाहेतुर्भूत्वा बुधमपि चिरं व्याकुलयति ।
तथा देहेऽप्यस्मिन्नहमिति विपर्यस्तधिषणा
भवभ्रान्तेर्मूलं परमपुरुषस्यापि समभूत् ॥ १५ ॥

चिरं सुप्ता ह्येते गुरुभवभवदुःखतलिने
दृढाविद्यानिद्रापरिगतविवेकेक्षणपुटाः ।
भृशं स्वप्नायन्तेऽहमिति च परं मामकमिति
व्यवस्यन्तः सन्तः कुगतिभवनेऽमी भवभृतः ॥ १६ ॥

प्रविज्ञाते यस्मिन्नतिशयितचिच्छक्तिकवली-
कृतत्रैलोक्ये किं समवगमयोग्यं किल परम् ।
अविज्ञाते त्वस्मिन्नतिनिशितशास्त्रार्थपटुता
श्रमायैवात्यन्तं भ्रमकृततुषाऽऽकण्डनमिव ॥ १७ ॥

भवाबन्धः सर्वोऽनुभवपदवीं यत्र विशति
ग्रहाधीशे व्योमाङ्गणमिव तमस्त्रुट्यतितमाम् ।
भिदामेति क्षिप्रं निबिडतरहृद्ग्रन्थिरपि तत्
पदं शान्तं भाव्यं सततमुपयुक्तैर्यतिवरैः ॥ १८ ॥

स्वरूपे विश्रान्तिं श्रयति यदि चैतन्यमचलां
न तु ज्ञेयासत्त्या व्रजति विकृतिं काञ्चन मनाक् ।
ततो राग-द्वेषद्वितयमिदमप्राप्तविषयं
क्षयं दाह्याभावाद्दहन इव गच्छत्यतितमाम् ॥ १९ ॥

महानन्दस्थानं न हि परमतस्त्रस्यसि यतः
प्रविश्वस्तो यस्मिन् भयपदमतो नान्यदपरम् ।
ततः स्वात्मारामेक्षणमयीं भजस्व स्थितिमहो
यतः शीर्यन्तेऽमी भ्रमनिचितकर्माणुन्निकराः ॥ २० ॥

भवारण्यभ्रान्तौ स्वयमजनि हेतुः स्व-परयो-
रविज्ञानात् स्वस्मिन् यदतनुत कर्तृत्वधिषणाम् ।
विमोक्षेऽपि स्वस्मिन् स्थितिपरिणतेर्यत्स्वयमसा-
वतः शास्ता स्वस्य स्वयमयमतोऽन्यः किल न हि ॥ २१ ॥

भवाद् भोगेभ्यो वा ननु यदि च भोगायतनतो
विरज्य क्षिप्रं चेदनुभवति रूपं निजमयम् ।
ततः संसाराख्या व्रततिरियमप्राप्तविषय-
प्रपञ्चार्णःसेकात् क्षणत इव संशुष्यतितमाम् ॥ २२ ॥

यथा रोगान्मुक्तः सरसपटुकट्वम्ललवण-
द्रवान् नानाहारांस्त्यजति निजनैरुज्यकृतये ।
तथाऽयं दृग्मोहज्वररहितचिन्मूर्तिरखिलां-
स्त्यजन् भोगास्वादाननुभवति नैरुज्यमचिरात् ॥ २३ ॥

चकास्त्येतद्यस्मिन् जगदखिलमूर्तं च महसि
जगत्यप्यस्मिन् यद् वसति न दधत् तत्परिणतिम् ।
अविद्यानिद्राघूर्णिततरक्वचिद्दृग्जनिमुखान्
बहून् स्वप्नान् पश्यत्यथ तदिदमस्तस्वविभवम् ॥ २४ ॥

वसेयुः खग्रामा यदमलचिदध्यासकलिता
लभन्ते शून्यत्वं क्षणमपि तदध्यासवियुताः।
अथादत्ते तेभ्यो विषयरसनाख्यं करमलं
स एवायं देवो निजपदमितः कस्य न मुदे ॥ २५ ॥

जगद् भासा यस्य स्फुरति सहजानन्दसरसं
स्थितं विश्वं व्याप्योल्लसदमलचिद्दीप्तिपटलैः ।
अवाग्व्यापारं यत् कृतिविधुरमत्यन्तगहनं
परं पूर्णं ज्योतिर्दलितदृढमोहं विजयते ॥ २६ ॥

राग-द्वेषद्वितयमुदितं यस्य नैवास्ति सर्व-
द्रव्येष्वात्मस्थितदृढमतेर्निर्विकारानुभूतेः ।
टङ्कोत्कीर्णप्रकृतिकलसंज्ञानसर्वस्वभाजो
यत् कर्म स्यात् तदिदमुदितं बन्धकृज्जातु नैव ॥ २७ ॥

मत्तो यस्मिन् स्वपिषि न पदं तावकं भावकं प्र(तत्)
त्वाधायीदं परपदमिति प्रोज्झ दूरं महात्मन् !
यस्मिन् शुद्धः स्वरसवशतः स्थायितामेति भाव-
स्तत् स्वं रूपं झटिति कलयन् मुच्यसे किं न बन्धो ! ॥ २८ ॥

इदं हि नानाभवपादपानां मूलोद्भिदं शस्त्रमुदारहन्ति ।
सद्ध्याननिष्णातमुनीश्वराणां ध्येयं तदेतत् कृतिभिः प्रदिष्टम्॥ २९ ॥

कर्मकाण्डदुरवापमिदं हि प्राप्यते विमलबोधबलेन ।
खिद्यते किमु वृथैव जनस्तद् देहदण्डनमुखैः कृतिकाण्डैः ॥ ३० ॥

अज्ञानतो यदिह किञ्चिदपि न्यगादि,
जैनागमार्थमतिलङ्घ्य मया विरुद्धम् ।
तच्छोधयन्तु निपुणाः स्वपरार्थदक्षा-
श्छद्मस्थधीर्ननु यतः स्खलनस्वभावा ॥ ३१ ॥

श्रीहर्षवर्धनकृतं स्वपरोपकारि
द्वात्रिंशिकावरचतुष्टयमिष्टबोधम् ।
तत्त्वार्थिनां रसदमस्तु लसद्विवेक-
ख्याति(त्व)स्खलद्ध्लवदात्मपरा(र)प्रतीति ॥ ३२ ॥

पू.आ.श्रीरत्नसिंहसूरिविरचितम्

## ॥ संवेगामृतपद्धतिम् ॥

शिष्याः श्रीधर्मसूरीणां, श्रीरत्नसिंहसूरयः ।
कुर्वते स्वान्तरङ्गाय, संवेगामृतपद्धतिम् ॥ १ ॥

निद्रामुद्रां समुच्छिद्य, द्रव्यभावविभेदतः ।
सावधानः क्षणं भूत्वा, किञ्चिदात्महितं शृणु ॥ २ ॥

धम्माहम्मे आउं पल्लसरूवेण किंपि भन्नंतं ।
एगंते होऊणं परिभावसु निउणबुद्धीए ॥ ३ ॥

येनासंख्यातकेनात्र, केशः क्रियेत खण्डशः ।
श्रद्धानं तत्र गच्छामि, जिनोक्तादेव नान्यथा ॥ ४ ॥

आयुः सागरदृष्टान्ताद्, यत्पूर्वं भाषितं जिनैः ।
दूरे तिष्ठतु तत्तावदत्यन्ताश्चर्य्यकारकम् ॥ ५ ॥

पल्योद्धारेऽपि मे चित्रमायुषः परिचिन्तनम् ।
अत्रायुषि कथं तस्मादल्पानल्पत्वचिन्तनम् ॥ ६ ॥

अणवट्ठियपल्लाओ नाऊणमसंखयं तओ पल्लं ।
चिंततो नरयदुहं कह पावं जीव ! आयरसि ? ॥ ७ ॥

यतःपुण्याच्छ्रियः सर्व्वाः, प्रत्यहं हन्त भाषसे ।
तत्रापि त्वं निराकांक्षो, मूढानां भासि भूपतिः ॥ ८ ॥

बाह्ये रूपे दृशा दृष्टे, यथा चेतः प्रगल्भते ।
स्वस्यांतश्चेत्तथा पश्यन्, धर्मे खिद्येत कोऽपि किम् ? ॥ ९ ॥

संवेगामृतसंपूर्णाः, स्फूर्ज्जद्बाष्पाम्बुलोचनाः ।
वैराग्यार्त्ताः स्खलद्वाचो, धिग् धिग् मुह्यन्ति तेऽपि यत् ॥ १० ॥

धिगस्त्वाहारनीहारौ, धर्म्मं विनेह दुःखदौ ।
वंशाग्रे यद्वदारोहावरोहौ स्तः पुनः पुनः ॥ ११ ॥

वक्तुं जानन्ति भूयांसस्तत्त्वं जैनं मुहुर्मुहुः ।
कार्य्यतः कोऽप्यनुष्ठातुं, धन्यः शक्तो महीतले ॥ १२ ॥

फल्गुवल्गुनरूपाभिर्वाग्भिस्ताभिर्न किञ्चन ।
कर्ण्णजाहं न याः प्राप्ताश्चेतो विध्यन्ति धीमताम् ॥ १३ ॥

प्रायेणामङ्गलं मत्त्वा, न पृच्छेत्प्रेत्यसंकथाम् ।
ज्योतिर्विदात्थ किं मे स्यादेषमस्त्वाह मूढधीः ॥ १४ ॥

चपेटतोऽपि सिंहस्य, मृत्योर्नाम्नोऽपि भीयते ।
तथाप्यात्मगतां चिन्तां, शक्तः कर्त्तुं न कोऽप्यलम् ॥ १५ ॥

मेषोन्मेषसमे सौख्ये, संरम्भस्तेऽत्र कीदृशः ? ।
मोक्षं विनापि कल्पादौ, गन्तुं धर्म्मं समाचर ॥ १६ ॥

तालां दत्त्वा क्षणेनैव, मूढ ! यास्यसि पश्यताम् ।
अत्यर्थं भण्यमानोऽपि, किं न निस्त्रप ! बुध्यसे ? ॥ १७ ॥

ज्ञात्वा चक्रे मनःपाणौ, दीपिकां ज्ञानरूपिकाम् ।
पश्यन्नपि न पश्यामि, हहा मे कर्म्मचित्रता ॥ १८ ॥

हस्तप्राप्यः पुरो याति, मृगोऽसौ कनकच्छविः ।
यथा मे नैति संयोगं, धर्म्मास्तिस्तत्त्वतस्तथा ॥ १९ ॥

शृण्वन्तोऽपि न शृण्वन्ति, जानन्तोऽपि न जानते ।
पश्यन्तोऽपि न पश्यन्ति, धर्म्मतत्त्वं भवे रताः ॥ २० ॥

शून्यं शून्येन गुण्यं स्यात्, शून्येन भागहारकः ।
युक्तेदूरे यथैवैतदयोग्ये शिक्षणं तथाः ॥ २१ ॥

धर्म्मजागरिकां नित्यं, यां करोमि निशि क्षणम् ।
मन्येऽहं तामपि प्रीतिं, प्रमादं यद्यपि श्रितः ॥ २२ ॥

अहो ध्यान्ध्यमहो ध्यान्ध्यं, जनानां जगतीतले ।
नाज्ञासिषुः क्व यास्याम, इत्यन्तर्मुखया धिया ॥ २३ ॥

नापि निद्रां च तन्द्रां च, भोज्यं नापि सुरङ्गतः ।
जानन्ति चेत्तदा चिह्नं, धर्म्मादन्यत्र रोचते ॥ २४ ॥

वक्तैवार्थस्य चेदस्य, तदा धिग् मेऽस्तु जीवितम् ।
धन्योऽस्मि वाञ्छयाऽप्यत्र, वाच्यं स्यात्किं पुनः कृतौ ! ॥ २५ ॥

यःकश्चित् पृच्छ्यतेऽस्माभिः, साम्प्रतं स्थीयते कथम् ? ।
अत्यन्तमार्त्त एवेति, सर्व्वस्याप्येकमुत्तरम् ॥ २६ ॥

ऋणरोगकुटुम्बेन, राजतस्करगोत्रजैः ।
दारिद्र्यधनरक्षादिव्यापारैर्दुस्थितो जनः ॥ २७ ॥

जानन्नपि न जानाति, वहत्येव हि केवलम् ।
सर्वमेतदहो मूढः, स्वार्थं कर्तुमनादरः ॥ २८ ॥

प्रतिभान्ति स्त्रियो दृष्टा, निर्विकारेण चेतसा ।
केषां प्रस्तरसङ्काशाः केषां विष्ठैकभस्त्रिकाः ॥ २९ ॥

दासीकृतैकपीयूषाः, वैकारिणां पुनः स्त्रियः ।
विकारतस्ततो वैरी, नान्यः कश्चन देहिनाम् ॥ ३० ॥

यात्यवश्यमवशः सन्नखर्वगर्वपर्वतम् ।
स गन्ता दुर्गतिं सर्वापर्वार्वाग्भागभाविनीम् ॥ ३१ ॥

निश्चयव्यवहाराभ्यां, साक्षाद् दृष्ट्वापि कोटिशः ।
संसारमिन्द्रजालं धिग्बुध्यन्ते नैव जन्तवः ॥ ३२ ॥

बुद्ध्वाऽलीकभ्रमं सौख्ये, संवेगापूर्णमानसः ।
तथापि कोऽपि कामेभ्यः, पुण्यात्मा विनिवर्त्तते ॥ ३३ ॥

धर्म्मसर्व्वस्वमाख्याय, शिक्षां जीव ! वदामि ते ।
यावज्जीवं त्वयाऽध्येयमेतत् श्लोकचतुष्टयम् ॥ ३४ ॥

औषधं नेत्रदानं च, विरेकश्चित्रकर्म्मकः ।
यथैव पृष्ठतो रम्यं, धर्म्माख्यानमिदं तथा ॥ ३५ ॥

संसारनाटकं सर्वं, पश्यत्युत्फुल्ललोचनः ।
स्वदेहनाटकं स्पष्टं, कश्चिन्नेक्षेत मूढधीः ॥ ३६ ॥

बाल्यतारुण्यवृद्धत्वहास्यरोदनखेदनम् ।
विषादानन्दकोपादि, कोटिशः पश्य कौतुकम् ॥ ३७ ॥

रहस्यं भण्यसे वत्स !, मा भूच्छिद्रघटोपमः ।
मा कार्षीः पृष्ठतः खेदं, कालदष्टो न चेच्छृणु ॥ ३८ ॥

स्वस्थोऽपि वत्स ! नो वेत्सि, मयाऽऽख्यातं मुहुर्मुहुः ।
जातजातिस्मरः प्रेत्य, कर्त्ताऽसि हस्तघर्षणम् ॥ ३९ ॥

कल्याणं मङ्गलं कर्त्तुमिहामुत्र च मानवैः ।
मन्यमानैः सुधापानं, श्रोतव्या धर्म्मदेशना ॥ ४० ॥

सुलभा धर्मवक्तारो, यथा पुस्तकवाचकाः ।
ये कुर्व्वन्ति स्वयं धर्म्मं, विरलास्ते महीतले ॥ ४१ ॥

कुर्वन्तोऽपि विलोक्यन्ते, सामग्रीवशतः क्वचित् ।
ये दृश्यास्ते पुनः केऽपि, संवेगामृतपूरिताः ॥ ४२ ॥

संवेगामृतहीनोऽपि, धर्म्मरत्नविनाकृतः ।
विधत्तेऽमीषु यः श्रद्धां, सोऽपि धन्यः कलौ किल ॥ ४३ ॥

उपाध्यायश्रीसकलचन्द्रजीकृता

# ॥ ध्यानदीपिका ॥

सर्वर्द्धिलब्धिसिद्धीशैर्योगीन्द्रैर्वृतमिष्टदम् ।
निष्पापं पापहं वन्दे सर्वं सर्वज्ञमण्डलम् ॥ १ ॥

ब्रह्मज्ञानानन्दे लीनार्हत्सिद्धसाधुसंदोहम् ।
स्मृत्वा ध्यानकृतेऽहं ध्यानाध्वगदीपिकां वक्ष्ये ॥ २ ॥

जैनागमार्थानवलम्ब्य मोहध्वान्तान्तकृत्री शमशुद्धिदात्री ।
ध्यानार्थिभिः स्वान्तगृहे विधेया नित्यं निजोद्योतकृते कृतीशैः॥ ३ ॥

जीवो ह्यनादिमलिनो मोहान्धोऽयं च हेतुना येन ।
शुध्यति तत्तस्य हितं तच्च तपस्तच्च विज्ञानम् ॥ ४ ॥

जन्मजरामरणभयैः पीडितमालोक्य विश्वमनगाराः ।
निःसङ्गत्वं कृत्वाध्यानार्थं भावनां जग्मुः ॥ ५ ॥

भूतेषु भज समत्वं चिन्तय चित्ते निजात्मरूपं च ।
मनसः शुद्धिं कृत्वा भावय चित्तं च भावनया ॥ ६ ॥

भावना द्वादशैतास्ता अनित्यादिकताः स्मृताः ।
ज्ञानदर्शनचारित्र्यं वैराग्याद्यास्तथा पराः ॥ ७ ॥

वाचना पृच्छना साधुप्रेक्षणं परिवर्तनम् ।
सद्धर्मदर्शनं चेति ज्ञातव्या ज्ञानभावना ॥ ८ ॥

संवेगः प्रशमः स्थैर्य-मसंमूढत्वमस्मयः ।
आस्तिक्यमनुकम्पेति ज्ञेया सम्यक्त्वभावना ॥ ९ ॥

ईर्यादिविषया यत्ना मनोवाक्कायगुप्तयः ।
परीषहसहिष्णुत्वमिति चारित्र्यभावना ॥ १० ॥

विषयेष्वनभिष्वङ्गः कार्यं तत्त्वानुचिन्तनम् ।
जगत्स्वभावचिन्तेति वैराग्यस्थैर्यभावना ॥ ११ ॥

भावनास्वासु संलीनं विधायाध्यात्मिकं स्थिरम् ।
कर्म-पुद्गलजीवानां स्वरूपं च विचिन्तयेत् ॥ १२ ॥

नित्यमाभिर्यदा विश्वं भावयत्यखिलं मुनिः ।
विश्वौदासीन्यमापन्नश्चरत्यत्रैव मुक्तवत् ॥ १३ ॥

सर्वे भवसंबन्धा विनश्वरा विभवदेहसुखमुख्याः ।
अमरनरेन्द्रैश्वर्यं यौवनमपि जीवितमनित्यम् ॥ १४ ॥

अक्षार्था पुण्यरूपा ये पूर्वं स्युस्ते क्षणेन च ।
अक्षाणामिष्टतां दत्त्वाऽनिष्टतां यान्त्यहो क्षणात् ॥ १५ ॥

अशुभार्थः शुभार्थः स्याच्छुभार्थोप्यशुभस्तथा ।
रागद्वेषविकल्पेन भावानामित्यनित्यता ॥ १६ ॥

न त्राणं न हि शरणं सुरनरहरिखेचरकिन्नरादीनाम् ।
यमपाशपाशितानां परलोकं गच्छतां नियतम् ॥ १७ ॥

इन्द्रियभरानुभूतैरद्भुतनवरसकरैश्च निजविषयैः ।
श्रुतदृष्टलब्धभुक्तैर्यदि मरणं किं ततस्तैर्भोः ॥ १८ ॥

नीयमानः कृतान्तेन जीवोऽत्राणोऽमरैरपि ।
प्रतिकारशतेनापि त्रायते नेति चिन्तयेत् ॥ १९ ॥

संसारदुःखजलधौ चतुर्गतावत्र जन्मजरावर्त्ते ।
मरणार्तिवाडवाग्नौ भ्रमन्ति मत्स्या इवाङ्गभृतः ॥ २० ॥

उत्पद्यन्ते विपद्यन्ते त्रसेषु स्थावरेषु च ।
स्वकर्मप्रेरिता जीवाः संसारस्येतिभावनाः ॥ २१ ॥

शुभाशुभानां जीवोऽयं कृतानां कर्मणां फलम् ।
सोऽत्रैव स्वयमेवैकः परत्रापि भुनक्ति च ॥ २२ ॥

कलत्रपुत्रादिकृते दुरात्मा करोति दुष्कर्म स एव एकः ।
भुङ्क्ते फलं श्वभ्रगतः स्वयं च नायाति सोढुं स्वजनास्तदन्ते॥ २३ ॥

आत्मा स्वभावेन शरीरतोऽयमन्यश्चिदानन्दमयो विशुद्धः ।
कर्माणुभिर्योऽस्ति कृतः कलङ्की स्वर्णं यथा धातुजकालिकाभिः२४

सर्वथाऽन्यस्वभावानि, पुत्रमित्रधनानि च ।
चेतनेतरे वस्तूनि, स्वात्मरूपाद्विभावय ॥ २५ ॥

विनैकं स्वकमात्मानं सर्वमन्यन्निजात्मनः ।
मत्वेतीष्टाप्तिनाशेऽङ्गिन् ! हर्षशोकौ हि मूढता ॥ २६ ॥

शुक्रादि बीजं निन्द्यमनेकाशुचिसंभृतम् ।
मलिनं निसर्गनिःसारं लज्जागारं त्विदं वपुः ॥ २७ ॥

विनश्वरं पोषितभूषितं किं यात्येव यत्तन्मिलितं ततः किम् ।
सृजति पुनः प्रतति ततः किं जातो मृतो यो विफलस्ततः किम् ॥ २८ ॥

मनोवचःकायकर्म योग इत्युच्यते जिनैः ।
स एवाश्रव इत्युक्तः सोऽप्यशुभः शुभस्तथा ॥ २९ ॥

अम्भोधौ यानपात्रस्य छिद्रं सूते यथा जलम् ।
योगरन्ध्रैस्तथा जीवः कर्मादत्ते शुभाशुभम् ॥ ३० ॥

अशेषाश्रवरोधो यः संवरोऽसौ निगद्यते ।
द्रव्यतो भावतश्चापि स द्विधेति प्रवर्तते ॥ ३१ ॥

यः कर्मपुद्गलादानविच्छेदः स्यात्तपस्विनाम् ।
स द्रव्यसंवरो ज्ञेयो योगिभिर्भावितात्मभिः ॥ ३२ ॥

यः संसारनिमित्तस्य क्रियाया विरतिः सताम् ।
स भावसंवरो ज्ञेयः सर्वसंवृतयोगिनाम् ॥ ३३ ॥

मूलभूतानि कर्माणि जन्मान्तादि व्यथातरोः ।
विशीर्यते यया सा च निर्जरा प्रोच्यते बुधैः ॥ ३४ ॥

सा सकामा ह्यकामा च द्विविधा प्रतिपादिताः ।
निर्ग्रन्थानां सकामा स्यादन्येषामितरा तथा ॥ ३५ ॥

स्वयं पाक उपायाच्च फलानां स्याद्यथा तरोः ।
तथात्र कर्मणां पाकः स्वयं चोपायतो भवेत् ॥ ३६ ॥

विशुध्यति यथा स्वर्णं सदोषमपि वह्निना ।
तद्वच्छुध्यति जीवोऽयं तप्यमानस्तपोग्निना ॥ ३७ ॥

जगदाधारो धर्मो दयान्वितो दशविधश्च पूतजगत् ।
स्वर्गापवर्गसुखदः सुदुर्लभो भाव्यते भव्यैः ॥ ३८ ॥

यस्यांशमेवमुपसेव्य भजन्ति भव्या
मुक्तिं वृषस्य शुचिदानदयादिज्ञातैः ।
शक्यं स्वरूपमतुलं गदितुं हि सम्यक्
किं तस्य नास्तिकनरैश्च कुशास्त्रवादैः ॥ ३९ ॥

जीवादयो यत्र समस्तभावा जिनैर्विलोक्यन्त इतीह लोकः ।
उक्तस्त्रिधासौ स्वयमेव सिद्धो स्वामी च नित्यो निधनश्च चिन्त्यः ॥४२॥

उत्पद्यन्ते विपद्यन्ते यत्रैते जीवराशयः ।
कर्मपाशातिसंबद्धाः नानायोनिषु संस्थिताः ॥ ४३ ॥

जीवानां योनिलक्षेषु भ्रमतामतिदुर्लभम् ।
मानुष्यं धर्मसामग्री बोधिरत्नं च दुर्लभम् ॥ ४४ ॥

गुणोपेतं नरत्वं चेत् काकतालीयनीतितः ।
यद्यासं सफलं कुर्यात् नित्यं मोक्षार्थसाधनैः ॥ ४५ ॥

मोक्षोऽतिकर्मक्षयतः प्रणीतः कर्मक्षयो ज्ञानचारित्र्यतश्च ।
ज्ञानं स्फुरद्ध्यानत एव चास्ति ध्यानं हितं तेन शिवाध्वगानाम्॥ ४६ ॥

मोक्षः कर्मक्षयादेव स सम्यग्ज्ञानतो भवेत् ।
ध्यानसाध्यं मतं तद्धि तस्मात्तद्धितमात्मनः ॥ ४७ ॥

अतः स्वात्मार्थसिद्ध्यर्थं धर्मध्यानं मुनिः श्रयेत् ।
प्रतिज्ञां प्रतिपद्येति चिन्त्यते ध्यानदीपिका ॥ ४८ ॥

अन्तेऽस्ति मृत्युर्यदि यस्य तस्य चिन्तामणिर्हस्तमितस्ततः किम् ।
सुवर्णसिद्धिस्त्वभवत्ततः किं जातं प्रभुत्वं क्षणिकं ततः किम् ॥ ४९ ॥

प्राप्ता च गुर्वी पदवी ततः किं गीतं यशोऽन्यैर्न हि वा ततः किम् ।
भुक्ताश्च भोगाः सुरसास्ततः किं लब्धा च विद्याधरता ततः किम् ॥ ५० ॥

शब्दादिभिर्ता ललितं ततः किं श्रियोऽर्जिता कोटिमितास्ततः किम् ।
नतं श्रुतज्ञैर्महितं ततः किं न स्वीकृतं चैव निजार्थसाध्यम् ॥ ५१ ॥

अतोऽसत्कल्पनाभाजं हित्वार्थं मोक्षमिच्छुभिः ।
समस्तगुणसंस्थानं धर्मध्यानं समाश्रितम् ॥ ५२ ॥

निर्विण्णोसि यदि भ्रातर्जन्मादिक्लेशयोगतः ।
निःसङ्गत्वं समासृत्य धर्मध्यानरतो भव ॥ ५३ ॥

अविद्यातामसं त्यक्त्वा, मोहनिद्रामपास्य च ।
निर्दोषोऽथ स्थिरीभूय पिब ध्यानसुधारसम् ॥ ५४ ॥

ध्याता ध्यानं च तद्ध्येयं फलं चेति चतुर्विधम् ।
सर्वं संक्षेपतो मत्वा स्वार्त्तध्यानादिकं त्यजेत् ॥ ५५ ॥

निर्ग्रन्थो हि भवेद् ध्याता प्रायो ध्याता गृही न च ।
परिग्रहादिमग्नत्वात् तस्य चेतो यतश्चलम् ॥ ५६ ॥

खरस्यापि हि किं शृङ्गं खपुष्पमथवा भवेत् ।
तथाङ्गनादिसक्तानां नराणां क्व स्थिरं मनः ॥ ५७ ॥

तथा पाखण्डीमुख्यानां नास्तिकानां कुचक्षुषाम् ।
तेषां ध्यानं न शुद्धं यद्वस्तुतत्त्वाज्ञता यतः ॥ ५८ ॥

सदाचाराच्च भ्रष्टानां कुर्वतां लोकवञ्चनम् ।
बिभ्रतां साधुलिङ्गं च तेषां ध्यानं न शुद्धिदम् ॥ ५९ ॥

नित्यं विभ्रान्तचित्तानां पश्यत्वेषां कुचेष्टितम् ।
संसारार्थं यतित्वेऽपि तेषां यात्यफला जनिः ॥ ६० ॥

ध्यानमेवात्मधर्मस्य मूलं मोक्षस्य साधनम् ।
असद्ध्यानं ततो हेयं यत् कुतीर्थकदर्शितम् ॥ ६१ ॥

कैश्चिन्मूढात्मभिर्ध्यानमन्यैः स्वपरवञ्चकैः ।
सपापं तत्प्रणीतं च दुःखदुर्गतिदायकम् ॥ ६२ ॥

धनार्थं स्त्रियादिवश्यार्थं, जन्तुघातादिकारकम् ।
शत्रूच्चाटादिकृद् ध्यानं क्रियते दुष्टबुद्धिभिः ॥ ६३ ॥

दृढसंहननस्यापि मुनेरान्तर्मुहूर्तिकम् ।
ध्यानमाहुरथैकाग्रचिन्तारोधो जिनोत्तमाः ॥ ६४ ॥

छद्मस्थानां तु यद्ध्यानं भवेदान्तर्मुहूर्तिकम् ।
योगरोधो जिनेन्द्राणां ध्यानं कर्मौघघातकम् ॥ ६५ ॥

एकचिन्तानिरोधो यस्तद्ध्यानं भावनाः पराः ।
अनुप्रेक्षार्थचिन्ता वा ध्यानसंतानमुच्यते ॥ ६६ ॥

रागद्वेषौ शमी मुक्त्वा यद्यद्वस्तु विचिन्तयेत् ।
तत्प्रशस्तं मतं ध्यानं रौद्राद्यं चाप्रशस्तकम् ॥ ६७ ॥

वीतरागो भवेत् योगी यत्किञ्चिदपि चिन्तयन् ।
तदेव ध्यानमाम्नातमतोऽन्ये ग्रन्थविस्तराः ॥ ६८ ॥

आर्त्तं रौद्रं च दुर्ध्यानं प्रत्येकं तच्चतुर्विधम् ।
अर्त्ते भवमथार्त्तं स्यात् रौद्रं प्राणातिपातजम् ॥ ६९ ॥

अनिष्टयोगजं चाद्यं परं चेष्टवियोगजम् ।
रोगार्त्तं च तृतीयं स्यात् निदानार्त्तं चतुर्थकम् ॥ ७० ॥

विषदहनवनभुजं गमहरिशस्त्रारातिमुख्यदुर्जीवैः ।
स्वजनतनुघातकृद्भिः सह योगेनार्त्तमाद्यं च ॥ ७१ ॥

श्रुतैर्दृष्टैः स्मृतैर्ज्ञातैः प्रत्यासत्तिसमागतैः ।
अनिष्टार्थैर्मनःक्लेशे पूर्वमार्तं भवेत्तदा ॥ ७२ ॥

राज्यैश्वर्यकलत्रपुत्रविभवक्षेत्रस्वभोगात्यये
चित्तप्रीतिकरप्रशस्तविषयप्रध्वं सभावेऽथवा ।
सत्रासभ्रमशोकमोहविवशैर्यच्चिन्त्यतेऽहर्निशम्
तत्स्यादिष्टवियोगजं तनुमतां ध्यानं मनोदुःखदम् ॥ ७३ ॥

दृष्टश्रुतानुभूतैस्तैः पदार्थैश्चित्तरञ्जकैः ।
वियोगे यन्मनःक्लेशः स्यादार्त्तं चेष्टहानिजम् ॥ ७४ ॥
मनोज्ञवस्तु विध्वंसे पुनस्तत्संगमार्थिभिः ।
क्लिश्यन्ते यत् तदेतत्स्यात् द्वितीयार्त्तस्य लक्षणम् ॥ ७५ ॥

अल्पानामपि रोगाणां मा भूत्स्वप्नेऽपि संगमः ।
ममेति या नृणां चिन्ता स्यादार्त्तं तत् तृतीयकम् ॥ ७६ ॥
राज्यं सुरेन्द्रता भोगाः खगेन्द्रत्वं जयश्रियः ।
कदा मेऽमी भविष्यन्ति भोगार्त्तं चेति संमतम् ॥ ७७ ॥

पुण्यानुष्ठानजातैरभिलषति पदं यज्जिनेन्द्रामराणाम्
यद्वा तैरेव वाञ्छत्यहितजनकुलच्छेदमत्यन्तकोपात् ।
पूजासत्कारलाभादिकसुखमथवा याचते यद्विकल्पैः
स्यादार्त्तं तन्निदानमभवमिह नृणां दुःखदं ध्यानमार्त्तम् ॥ ७८ ॥

लेश्यात्रयं च कृष्णादि नातिसंक्लिष्टकं भवेत् ।
आर्त्तध्यानगतस्याथ लिङ्गान्येतानि चिन्तयेत् ॥ ७९ ॥
शोकाक्रन्दौ मूर्च्छा मस्तकहृदयादिताडनं चिन्ता ।
आर्त्तंगतस्य नरस्य हि लिङ्गान्येतानि बाह्यानि ॥ ८० ॥
दुष्टः क्रूराशयो जन्तू रौद्रकर्मकरो यतः ।
ततो रौद्रं मतं ध्यानं तच्चतुर्धा बुधैः स्मृतम् ॥ ८१ ॥
हिंसानन्दान्मृषानन्दाच्चौर्यात्संरक्षणात्तथा ।
रौद्रध्यानं चतुर्धा स्याद्देहिनां निर्दयात्मनाम् ॥ ८२ ॥

पीडिते च तथा ध्वस्ते जीवौघेऽथ कदर्थिते ।
स्वेन वान्येन यो हर्षस्तद् हिंसारौद्रमुच्यते ॥ ८३ ॥

निरन्तरं निर्दयतास्वभावः स्वभावतः सर्वकषायदीप्तः ।
मदोद्धतः पापमतिः कुशीलः स्यान्नास्तिको यः स हि रौद्रगेहम् ॥ ८४ ॥

जीवानां मारणोपायान् चिन्तयेत् पूजनं तथा ।
गोत्रदेवीद्विजादीनां मेषादिप्राणघातनैः ॥ ८५ ॥

जलस्थलखगादीनां गलनेत्रादिकर्त्तनम् ।
जीवानां प्राणघातादि कुर्वन् रौद्रं गतो भवेत् ॥ ८६ ॥

विधाय वञ्चकं शास्त्रं मार्गमुद्दिश्य हिंसकम् ।
प्रपात्य व्यसने लोकं भोक्ष्येऽहं वाञ्छितं सुखम् ॥ ८७ ॥

असत्यकल्पनाकोटिकश्मलीकृतमानसः ।
चेष्टते यत् जनस्तद्धि मृषानन्दं हि रौद्रकम् ॥ ८८ ॥

चौर्यार्थं जीवघातादि चिन्तार्त्तं यस्य मानसम् ।
कृत्वा तच्चिन्तितार्थं यत् हृष्टं तच्चौर्यमुदितम् ॥ ८९ ॥

द्विपदचतुष्पदसारधनधान्यवराङ्गनासमाकीर्णम् ।
वस्तु परकीयमपि मे स्वाधीनं चौर्यसामर्थ्यात् ॥ ९० ॥

चौर्यं बहुप्रकारं ग्रामांध्वगदेशघातकरणेच्छा ।
सततमिति चौर्यरौद्रं भवत्यवश्यं श्वभ्रगमनम् ॥ ९१ ॥

बह्वारम्भपरिग्रहसंग्रामैजन्तुघाततो रक्षाम् ।
कुर्वन् परिग्रहादे रक्षारौद्रीति विज्ञेयम् ॥ ९२ ॥

शस्त्रैररीणां हि शिरांसि भित्त्वा दग्ध्वा पुरग्रामगृहारिदेशान् ।
प्राप्स्येऽहमैश्वर्यमनन्यसाध्यं स्वगृह्णतां वाथ तथा करिष्ये ॥ ९३ ॥

कापोतनीलकाला अतिसंक्लिष्टा भवन्ति दुर्लेश्याः ।
रौद्रध्यानपरस्य तु नरस्य नरकातिथेर्मोहात् ॥ ९४ ॥

क्रूरता चित्तकाठिन्यं वञ्चकत्वं कुंदण्डता ।
निस्तृंशत्वं च लिङ्गानि रौद्रस्योक्तानि सूरिभिः ॥ ९५ ॥

क्वचित्क्वचिदमी भावाः प्रवर्त्तन्ते पुनरपि ।
प्रागुकर्मगौरवाच्चित्रं प्रायः संसारहेतवः ॥ ९६ ॥

प्रविश्याथ शमाम्भोधिं योगाष्टाङ्गानि चिन्तयेत् ।
दुष्टानुष्ठानतो भग्नो मनःशुद्धिकृते मुनिः ॥ ९७ ॥

यमनियमासनबन्धं प्राणायामेन्द्रियार्थसंवरणम् ।
ध्यानं ध्येयसमाधि योगाष्टाङ्गानि चेति भज ॥ ९८ ॥

सप्तदशभेदसंयमधरो यमी शौचतादियुतनियमी ।
पद्मासनादिसुस्थः प्राणायामप्रयासी च ॥ ९९ ॥

किमनेन प्रपञ्चेन प्राणायामेन चिन्मताम् ।
कायहृत्क्लेशकारिणा नाद्दतस्तेन सूरिभिः ॥ १०० ॥

पूरकैः कुम्भकैश्चैव रेचकैः किं प्रयोजनम् ।
विमृश्येति तदादेयं यन्मुक्तेर्बीजमग्रिमम् ॥ १०१ ॥

इन्द्रियार्थनिरोधो यः स प्रत्याहार उच्यते ।
प्रत्याहारं विधायाथ धारणा क्रियते बुधैः ॥ १०२ ॥

ध्येयवस्तुनि संलीनं यन्मनोज्ञैर्विधीयते ।
परब्रह्मात्मरूपे वा गुणिनां सद्गुणेष्वपि ॥ १०३ ॥

अर्हदाद्यङ्गरूपे वा, भाले नेत्रे मुखे तथा ।
लये लग्नं मनो यस्य, धारणा तस्य संमता ॥ १०४ ॥

ध्यानं चतुर्विधं ज्ञेयं धर्मं शुक्लं च नामतः ।
प्रत्येकं तच्छ्रयेत् योगी विरक्तः पापयोगतः ॥ १०५ ॥

भावनादीनि धर्मस्य स्थानाद्यासनकानि वा ।
कालश्चालम्बनादीनि ज्ञातव्यानि मनीषिभिः ॥ १०६ ॥

चतस्रो भावना भव्या उक्ता ध्यानस्य सूरिभिः ।
मैत्र्यादयश्चिरं चित्ते विधेया धर्मसिद्धये ॥ १०७ ॥

प्राणभूतेषु सर्वेषु सुखदुःखस्थितेषु च ।
वैरिमित्रेषु जीवेषु मैत्री स्याद्धितधीः सताम् ॥ १०८ ॥

वधबन्धनरुद्धेषु निस्त्रिंशैः पीडितेषु च ।
जीवितं याचमानेषु दयाधीः करुणा मता ॥ १०९ ॥

जिनधर्मजुषां ज्ञानचक्षुषां च तपस्विनाम् ।
निःकषायजिताक्षाणां गुणे मोदः प्रमोदता ॥ ११० ॥

देवगुर्वागमाचार-निन्दकेष्वात्मशंसिषु ।
पापिष्ठेषु च माध्यस्थ्यं सोपेक्षा च प्रकीर्तिता ॥ १११ ॥

भावनास्वासु संलीनं विधायाध्यात्मिकं स्थिरम् ।
कर्मपुद्गलजीवानां स्वरूपं च विचिन्तयेत् ॥ ११२ ॥

नित्यमाभिर्यदा विश्वं भावयत्यखिलं मुनिः ।
विश्वौदासीन्यमापन्नश्चरत्यत्रैव मुक्तवत् ॥ ११३ ॥

सिद्धतीर्थादिके क्षेत्रे शुभस्थाने निरञ्जने ।
मनःप्रीतिप्रदे देशे ध्यानसिद्धिर्भवेन्मुनेः ॥ ११४ ॥

यत्र काले समाधानं योगानां योगिनो भवेत् ।
ध्यानकालः स विज्ञेयो दिनादेर्नियमोऽस्ति न ॥ ११५ ॥

पद्मासनादिना येनासनेनैव सुखी भवेत् ।
ध्यानं तेनासनेन स्यात् ध्यानिनां ध्यानसिद्धये ॥ ११६ ॥

पूर्वाभिमुखो ध्यानी चोत्तराभिमुखोऽथवा ।
प्रसन्नवदनो धीरो ध्यानकाले प्रशस्यते ॥ ११७ ॥

आलम्बनानि धर्मस्य वाचनाप्रच्छनादिकः ।
स्वाध्यायः पञ्चधा ज्ञेयो धर्मानुष्ठानसेवया ॥ ११८ ॥

ध्यानानुक्रम उक्तः केवलिनां चित्तयोगरोधादि ।
भवकाले त्वितरेषां यथा समाधिं च विज्ञेयः ॥ ११९ ॥

आज्ञापायविपाकस्य क्रमशः संस्थितेस्तथा ।
विचयाय पृथग् ज्ञेयं धर्मध्यानं चतुर्विधम् ॥ १२० ॥

स्वसिद्धान्तप्रसिद्धं यत् वस्तुतत्त्वं विचार्यते ।
सर्वज्ञाज्ञानुसारेण तदाज्ञाविचयो मतः ॥ १२१ ॥

आज्ञा यत्र पुरस्कृत्य सर्वज्ञानामबाधिताम् ।
तत्त्वतश्चिन्तयेदर्थांस्तदाज्ञाध्यानमुच्यते ॥ १२२ ॥

अपायविचयं ज्ञेयं ध्यानं तच्च विचक्षणैः ।
अपायः कर्मणां यत्र सोऽपायः प्रोच्यते बुधैः ॥ १२३ ॥

रागद्वेषकषायाश्रवक्रिया वर्तमानजीवानाम् ।
इह परलोकापायानपायभीरुः स्मरेत् साधुः ॥ १२४ ॥

चतुर्धा कर्मबन्धेन शुभेनाप्यशुभेन वा ।
विपाकः कर्मणां जीवैर्भुज्यमानो विचिन्त्यते ॥ १२५ ॥

प्रतिक्षणसमुद्भूतो यत्र कर्मफलोदयः ।
चिन्त्यते चित्ररूपः स विपाकविचयो मतः ॥ १२६ ॥

या संपदार्हतो या च विपदा नारकात्मनः ।
एकातपत्रया तत्र पुण्यापुण्यस्य कर्मणः ॥ १२७ ॥

अनन्तानन्तमाकाशं सर्वतः सुप्रतिष्ठितम् ।
तन्मध्ये यः स्थितो लोको नित्यो दृष्टो जिनोत्तमैः ॥ १२८ ॥

स्थित्युत्पत्तिव्ययोपेतैः पदार्थैश्चेतनेतरैः ।
संपूर्णोऽनादिसंसिद्धः स्थितं यत्र जगत्त्रयम् ॥ १२९ ॥

ज्ञानवैराग्यसंपन्नः संवृतात्मा स्थिराशयः ।
क्षीणोपशान्तमोहश्चाऽप्रमादी ध्यानकारकः ॥ १३० ॥

शुद्धसम्यक्त्वदर्शी च श्रुतज्ञानोपयोगवान् ।
दृढसंहननो धीरः सर्वषट्जीवपालकः ॥ १३१ ॥

सत्यवाक् दत्तभोज्ञी च ब्रह्मचारी पवित्रहृत् ।
स्त्रीकामचेष्टयास्पृष्टो निःसङ्गो वृद्धसेवकः ॥ १३२ ॥

निराशो निष्कषायी च जिताक्षो निष्परिग्रही ।
निर्ममः समतालीनो ध्याता स्यात् शुद्धमानसः ॥ १३३ ॥

अप्रमत्तप्रमत्ताख्यौ मुख्यतः स्वामिनौ मतौ ।
चत्वारः स्वामिनः कैश्चित् उक्ता धर्मस्य सूरिभिः ॥ १३४ ॥

पिण्डस्थं च पदस्थं च रुपस्थं रूपवर्जितम् ।
इत्यन्यच्चापि सद्ध्यानं ते ध्यायन्ति चतुर्विधम् ॥ १३५ ॥

पिण्डस्थे पञ्च विज्ञेया धारणा तत्र पार्थिवी ।
आग्नेयी मारुती चापि वारुणी तत्त्वभूस्तथा ॥ १३६ ॥

तिर्यग्लोकसमं ध्यायेत् क्षीराब्धिं तत्र चाम्बुजम् ।
सहस्रपत्रं स्वर्णाभं जम्बुद्वीपसमं स्मरेत् ॥ १३७ ॥

तत्केसरततेरन्तःस्फुरत्पिङ्गप्रभाञ्चिताम् ।
स्वर्णाचलप्रमाणां च कर्णिकां परिचिन्तयेत् ॥ १३८ ॥

श्वेतसिंहासनासीनं कर्मनिर्मलनोद्यतम् ।
आत्मानं चिन्तयेत्तत्र पार्थिवी धारणेत्यसौ ॥ १३९ ॥

ततोऽसौ निश्चलाभ्यासात् कमलं नाभिमण्डले ।
स्मरत्यतिमनोहारि षोडशोन्नतपत्रकम् ॥ १४० ॥

प्रतिपत्रसमासीनस्वरमालाविराजितम् ।
कर्णिकायां महामन्त्रं विस्फुरन्तं विचिन्तयेत् ॥ १४१ ॥

रेफरुद्धं कलाबिन्दुलाञ्छितशून्यमक्षरम् ।
लसद्बिन्दुछटाकोटीकान्तिव्याप्तहरिन्मुखम् ॥ १४२ ॥

(अर्हं) तस्य रेफाद्विनिर्यान्तीं शनैर्धूमशिखां स्मरेत् ।
स्फुलिङ्गसंततिं पश्चात् ज्वालालीं तदनन्तरम् ॥ १४३ ॥

तेन ज्वालाकलापेन वर्धमानेन संततम् ।
दहत्यविरतं धीरः पुण्डरीकं हृदि स्थितम् ॥ १४४ ॥

तदष्टकर्मनिर्माणमष्टपत्रमधोमुखम् ।
दहत्येव महामन्त्रध्यानोत्थप्रबलानलः ॥ १४५ ॥

ततो देहाद् बहिर्ध्यायेत् त्रिकोणं वह्निमण्डलम् ।
ज्वलत्स्वस्तिकसंयुक्तं वह्निबीजसमन्वितम् ॥ १४६ ॥

देहं पद्मं च मन्त्रार्चिरन्तर्वह्निपुरं बहिः ।
कृत्वाशु भस्मसाच्छाम्येत्स्यादाग्नेयीति धारणा ॥ १४७ ॥

ततस्त्रिभुवनाभोगं पूरयन्तं समीरणम् ।
चालयन्तं गिरीनब्धीन् क्षोभयन्तं विचिन्तयेत् ॥ १४८ ॥

तच्च भस्मरजस्तेन शीघ्रमुद्धूय वायुना ।
दृढाभ्यासः प्रशान्तिं तमानयेदिति मारुती ॥ १४९ ॥

स्मरेद्वर्षत्सुधासारैः घनमालाकुलं नभः ।
ततोऽर्धेन्दुसमकान्तं मण्डलं वारुणाङ्कितम् ॥ १५० ॥

नभस्तलं सुधाम्भोभिः प्लावयेत्तत्पुरं ततः ।
तद्रजः कायसंभूतं क्षालयेदिति वारुणी ॥ १५१ ॥

सप्तधातुविनाभूतं पूर्णेन्दुविशदद्युतिम् ।
सर्वज्ञकल्पमात्मानं शुद्धबुद्धिः स्मरेत्ततः ॥ १५२ ॥

ततः सिंहासनासीनं सर्वातिशयभासुरम् ।
विध्वस्ताशेषकर्माणं कल्याणमहिमान्वितम् ॥ १५३ ॥

स्वाङ्गगर्भे निराकारं स्वं स्मरेदिति तत्त्वभूः ।
साभ्यास इति पिण्डस्थे योगी शिवसुखं भजेत् ॥ १५४ ॥

अश्रान्तमिति पिण्डस्थे कृताभ्यासस्य योगिनः ।
प्रभवन्ति न दुर्विद्यामन्त्रमण्डलशक्तयः ॥ १५५ ॥

शाकिन्यः क्षुद्रयोगिन्यः पिशाचा पिशिताशना: ।
त्रस्यन्ति तत्क्षणादेव तस्य तेजोऽसहिष्णवः ॥ १५६ ॥

दुष्टा करटिनः सिंहा शलमा पन्नगा अपि ।
जिघांसवोऽपि तिष्ठन्ति स्तम्भिता इव दूरतः ॥ १५७ ॥

पुण्यमन्त्रपदान्येव तथागमपदानि वा ।
ध्यायन्ते यद्बुधैर्नित्यं तत्पदस्थं मतं बुधैः ॥ १५८ ॥

ओमर्हादिकमन्त्राणां मायाबीजजुषां ततिम् ।
परमेष्ठ्यादिपदव्रातं पदस्थध्यानगः स्मरेत् ॥ १५९ ॥

सर्वातिशययुक्तस्य केवलज्ञानभास्वतः ।
अर्हतो रूपमालम्ब्य ध्यानं रूपस्थमुच्यते ॥ १६० ॥

रागद्वेषमहामोहविकारैरकलङ्कितम् ।
शान्तकान्तं मनोहारि सर्वलक्षणलक्षितम् ॥ १६१ ॥

जिनेन्द्रप्रतिमारूपमपि निर्मलमानसः ।
निर्निमेषदशा ध्यायन् रुपस्थध्यानवान्भवेत् ॥ १६२ ॥

ध्यानी चाभ्यासयोगेन तन्मयत्वमुपागतः ।
सर्वज्ञीभूतमात्मानमवलोकयति स्फुटम् ॥ १६३ ॥

सर्वज्ञो भगवान् योऽयमहमेवास्मि स ध्रुवम् ।
एवं तन्मयतां यातः सर्ववेदीति मन्यते ॥ १६४ ॥

वीतरागो विमुच्येत वीतरागं विचिन्तयन् ।
रागिणं तु समालम्ब्य रागी स्यात्क्षोभणादिकृत् ॥ १६५ ॥

येन येन हि भावेन युज्यते यन्त्रवाहकः ।
तेन तन्मयतां याति विश्वरूपो मणिर्यथा ॥ १६६ ॥

नासद्ध्यानानि सेव्यानि कौतुकेनापि किन्त्विह ।
स्वनाशायैव जायन्ते सेव्यमानानि तानि यत् ॥ १६७ ॥

सिध्यन्ति सिद्धयः सर्वाः स्वयं मोक्षावलम्बिनाम् ।
संदिग्धा सिद्धिरन्येषां स्वार्थभ्रंशस्तु निश्चितः ॥ १६८ ॥

लोकाग्रस्थं परात्मानममूर्त्तं क्लेशवर्जितम् ।
चिदानन्दमयं सिद्धमनन्तानन्दगं स्मरेत् ॥ १६९ ॥

यस्यात्र ध्यानमात्रेण क्षीयन्ते जन्ममृत्यवः ।
उत्पद्यते च विज्ञानं स ध्येयो नित्यमात्मना ॥ १७० ॥

तत्स्वरूपाहितं स्वान्तं तद्गुणग्रामरञ्जितम् ।
योजयत्यात्मनात्मानं स्वस्मिन् तद्रूपसिद्धये ॥ १७१ ॥

इत्यजस्रं स्मरन् योगी तत्स्वरूपावलम्बितः ।
तन्मयत्वमवाप्नोति ग्राह्यग्राहकवर्जितः ॥ १७२ ॥

अनन्यशरणीभूय स तस्मिन् लीयते तथा ।
ध्यातृध्यानोभयाभावे ध्येयेनैक्यं यथा व्रजेत् ॥ १७३ ॥

यः परात्मा परं सोऽहं योऽहं स परमेश्वरः ।
मदन्यो न मयोपास्य; मदन्येन च नाप्यहम् ॥ १७४ ॥

अन्तःकरणाकर्णय स्वात्माधीशं विहाय मान्यत्वम् ।
ध्याने वस्त्ववतारय यतस्तदन्यच्च बन्धकरम् ॥ १७५ ॥

स्वबोधादपरं किञ्चिन्न स्वान्ते क्रियते परम् ।
कुर्यात् कार्यवशात् किञ्चित् वाग्कायाभ्यामनादृतः ॥ १७६ ॥

एवं चतुर्विधध्यानामृतमग्नं मुनेर्मनः ।
साक्षात्कृतजगत्तत्वं विधत्ते शुद्धिमात्मनः ॥ १७८ ॥

ध्यानोपरतोऽपि मुनिर्विविधानित्यादिभावचिन्तनतः ।
योऽनुप्रेक्षां धत्ते इति शश्वत् सोऽतुलो ध्यानी ॥ १७७ ॥

अनुप्रेक्षात्र धर्मस्य स्याद्यतो हि निबन्धनम् ।
चित्तं ततः स्थिरीकृत्य तासां रूपं निरूपयेत् ॥ १७९ ॥

प्राणघात्युपसर्गेऽपि धन्यैर्ध्यानं न चालितम् ।
निर्बाधेष्वपि योगेषु सत्सु धत्से न किं स्थिरम् ॥ १८० ॥

स्वाक्षार्थस्य रतिं च दोषं विहाय यत्किंचन वस्तुजातम् ।
............................... मनोध सर्वं भवतीह तद्धि ॥ १८१ ॥

रम्यरामादिरूपादीन् कामार्थ नपि चिन्तयन् ।
रूद्धस्वाक्षार्थरागादिः शुभध्यानी ह्यसावपि ॥ १८२ ॥

यद्यात्तानीन्द्रियाण्यङ्गिन् त्वया तद्विषयान् विना ।
तानि तिष्ठन्ति नो त्वं तत् निर्दोषान् विषयान् भज ॥ १८३ ॥

विना खान्यत्र नो जीवो विनाजीवं न खान्यपि ।
पञ्चाक्षविषयैः पूत्यैर्विना सिद्धिर्न साध्यते ॥ १८४ ॥

अन्तःकरणनिःसङ्गी बहिःसङ्गीव चेष्टते ।
छयावत् निर्विकल्पोऽसौ कर्मणा नोपलिप्यते ॥ १८५ ॥

बहिःसंसारदेहाक्षस्थित्या गत्या विनाङ्गिनः ।
न किं चिच्चलतीति त्वं मत्वा साममना भज ॥ १८६ ॥

आत्मन् ! सिद्धात्मलग्नोऽहं यदा स्यां भोस्तदा त्वया ।
न गन्तव्यमितीच्छामि गन्तव्यं चेत्तदैव वा ॥ १८७ ॥

इति ते ध्यानसमीपे याचे मे मा भवन्तु व्याधिरुजः ।
अन्ते मरणसमाधिः शुभगतिर्भवतु परलोके ॥ १८८ ॥

पीता पद्मा च शुक्ला च लेश्यात्रयमिति स्मृतम् ।
धर्मस्य क्रमशः शुद्धं कैश्चिच्छुक्लैव केवला ॥ १८९ ॥

धर्मध्यानस्य विज्ञेया स्थितिश्चान्तर्मुहूर्तिकी ।
क्षायोपशमिको भावो लेश्या शुक्लैव केवला ॥ १९० ॥

अर्हदादिगुणीशानां नतिं भक्तिं स्तुतिं स्मृतिम् ।
धर्मानुष्ठानदानादि कुर्वन् धर्मीति लिङ्गतः ॥ १९१ ॥

अस्मिन्नितान्तवैराग्यव्यतिषङ्गतरङ्गिते ।
जायते देहिनां सौख्यं स्वसंवेद्यमतीन्द्रियम् ॥ १९२ ॥

त्यक्तसङ्गास्तनुं त्यक्त्वा धर्मध्यानेन योगिनः ।
ग्रैवेयकादिस्वर्गेषु भवन्ति त्रिदशोत्तमाः ॥ १९३ ॥

शुक्लं चतुर्विधं ध्यानं तत्राद्ये द्वे च शुक्लके ।
छद्मस्थयोगिनां ज्ञेये द्वे चान्त्ये सर्ववेदिनाम् ॥ १९४ ॥

श्रुतज्ञानार्थसंबन्धात् श्रुतालम्बनपूर्वके ।
पूर्वेऽपरे जिनेन्द्रस्य निःशेषालम्बनच्युतेः ॥ १९५ ॥

सवितर्कसविचारं पृथक्त्वं च प्रकीर्तितम् ।
शुक्लमाद्यं द्वितीयं च विपर्यस्तमतः परम् ॥ १९६ ॥

सूक्ष्मक्रियाप्रतिपाति तृतीयं सर्ववेदिनाम् ।
समुच्छिन्नक्रियं ध्यानं तुर्यमार्यैः प्रवेदितम् ॥ १९७ ॥

तत्र त्रियोगिनामाद्यं द्वितीयं त्वेकयोगिनाम् ।
सर्वज्ञः क्षीणकर्मासौ केवलज्ञानभास्करः ॥ १९८ ॥

अन्तर्मुहूर्तशेषायुस्तृतीयं ध्यातुमर्हति ।
शैलेशीकर्मतो ध्यानं समुच्छिन्नक्रियं भवेत् ॥ १९९ ॥

अयोगयोगिनां तुर्यं विज्ञेयं परमात्मनाम् ।
तेन ते निर्मला जाताः निष्कलङ्का निरामयाः ॥ २०० ॥

जन्मजानेकदुर्वारबन्धनव्यसनोज्झिताः ।
सिद्धा बुद्धाश्च मुक्ताश्च ये तेभ्योमे नमो नमः ॥ २०१ ॥

शाश्वतानन्दमुक्तेभ्यो रुपातीतेभ्य एव च ।
त्रैलोक्यमस्तकस्थेभ्यः सिद्धेभ्यो मे नमो नमः ॥ २०२ ॥

अधुना शुक्लध्यानं यत्तच्चतुर्धापि नास्ति साधूनाम् ।
पूर्विककेवलिविरहात्तदगम्यं तेन ते तदगुः (जगदुः) ॥ २०३ ॥
चन्द्रार्कदीपालिमणिप्रभाभिः किं यस्य चित्तेऽस्ति तमोऽस्तबोधम् ।
तदन्तकर्त्री क्रियतां स्वचित्ते ज्ञान्यङ्गिनः ध्यानसुदीपिकेयम्॥ २०४ ॥

## ॥ चित्तशुद्धि फलम् ॥

सदोषं भवहेतुस्तन्, निर्दोषं मोक्षदं मनः ।
अत एव परेऽपीत्थ-मामनन्ति मनीषिणः ॥ १ ॥

चित्तमेव हि संसारो, रागादिक्लेशवासितम्,
तदेव तैर्विनिर्मुक्तं, भवान्त इति कथ्यते ॥ २ ॥

गुह्याद् गुह्यतरं तत्त्वं, तदिदं कथयामि ते,
चित्तमेव हि सद्रत्नं, रक्षणीयं प्रयत्नतः ॥ ३ ॥

यावद्धावति चित्तं ते, जवनं पवनादपि,
कामेषु सुखगन्धोऽपि, तावत्तव न विद्यते ॥ ४ ॥

प्रतिष्ठा शौकरी विष्ठा, राज्यं चित्ते यदा रजः ।
भोगा रोगा इवाभान्ति, तदा ते परमं सुखम् ॥ ५ ॥

यदा बहिर्भ्रमं त्यक्त्वा, स्थिरीभावं प्रपद्य च, ।
निःस्पृहं भावि चित्तं ते, तदा ते परमं सुखम् ॥ ६ ॥

यदा ध्यानसरो-मध्ये, निलीनं स्वगुणाम्बुजम्, ।
भविष्यत्यलिवच्चित्तं, तदा ते परमं सुखम् ॥ ७ ॥

अभिरामासु रामासु, श्यामासु च मशीषु ते,
यदा समं भवेच्चित्तं, तदा ते परमं सुखम् ॥ ८ ॥

स्फुरत्कान्तिषु रत्नेषु, मृत्स्नायां च न भेदिनी,
यदा ते स्यान्मनोवृत्ति, स्तदा ते परमं सुखम् ॥ ९ ॥

अनभ्रानुपरागेन्दु, निर्मलं ते यदा मनः ।
रजस्तमो नाभिभवं, तदा ते परमं सुखम् ॥ १० ॥

प्रत्यवस्थातरि क्रुद्धे, स्वान्तः शुद्धे च सज्जने ।
यदा मनस्ते निर्भेदं, तदा ते परमं सुखम् ॥ ११ ॥

व्याघ्रादिवान्यनिन्दायाः, परद्रोहादहेरिव, ।
यदा बिभेति चित्तं ते, तदा ते परमं सुखम् ॥ १२ ॥

धर्मश्चित्ते परिणमे,-च्चन्दने गन्धवद्यदा ।
आकालमेकभावेन, तदा ते परमं सुखम् ॥ १३ ॥

शीततापादिभिर्भावैः स्याच्चित्तस्यानुपद्रुता ।
सर्वंसहा यदा वृत्ति, स्तदा ते परमं सुखम् ॥ १४ ॥

यदा न प्रेर्यते चित्तं, चिन्मात्रप्रतिबन्धतः ।
अनादिवासनावातै, स्तदा ते परमं सुखम् ॥ १५ ॥

ज्ञाननीरैर्व्रतक्षारै, र्धौतपापमलं यदा ।
चित्तवस्त्रं भवेच्छुद्धं, तदा ते परमं सुखम् ॥ १६ ॥

संपूर्णब्रह्मणा सर्वं, सममुच्चावचं जगत् ।
यदा ध्यायति ते चित्तं, तदा ते परमं सुखम् ॥ १७ ॥

संहृत्य बुद्बुदप्रायान्, भावान्संसारिकान्यदा ।
चित्तोदधिस्तिमितःस्या,-त्तदा ते परमं सुखम् ॥ १८ ॥

परस्यापेक्षितां त्यक्त्वा, दासतां लिप्सते मनः ।
यदानुभवसाम्राज्यं, तदा ते परमं सुखम् ॥ १९ ॥

न सुषुप्तं यदा चित्तं, न सुप्तं न च जागरं ।
तुर्यावस्थानुभवभृत्तदा ते परमं सुखम् ॥ २० ॥

इति चित्तं विना नान्यः, सुखहेतुर्जगत्त्रये ।
चित्तवृत्तिं ततो रक्ष, लक्षयन्वास्तवीं स्थितिम् ॥ २१ ॥

कलिकालसर्वज्ञ पू.आ.श्रीहेमचन्द्रसूरिश्वरविरचितम्

# ॥ योगशास्त्रम् ॥

## प्रथमप्रकाशः

नमो दुर्वाररागादि - वैरिवारनिवारिणे ।
अर्हते योगिनाथाय, महावीराय तायिने ॥ १ ॥

पन्नगे च सुरेन्द्रे च, कौशिके पादसंस्पृशि ।
निर्विशेषमनस्काय, श्रीवीरस्वामिने नमः ॥ २ ॥

कृताऽपराधेऽपि जने, कृपामन्थरतारयोः ।
ईषद् बाष्पार्द्रयोर्भद्रं, श्रीवीरजिननेत्रयोः ॥ ३ ॥

श्रुताम्भोधेरधिगम्य, सम्प्रदायाच्च सद्गुरोः ।
स्वसंवेदनतश्चापि, योगशास्त्रं विरच्यते ॥ ४ ॥

योगस्यैव महात्म्यमाह

योगः सर्व्वविपद्वल्ली - विताने परशुः शितः ।
अमूलमन्त्रतन्त्रं च, कार्म्मणं निर्वृतिश्रियः ॥ ५ ॥

भूंयासोऽपि हि पाप्मानः, प्रलयं यान्ति योगतः ।
चण्डवाताद् घनघना, घनाघनघटा इव ॥ ६ ॥

क्षिणोति योगः पापानि, चिरकालार्जितान्यपि ।
प्रचितानि यथैधांसि, क्षणादेवाशुशुक्षणिः ॥ ७ ॥

कफविप्रुण्मलामर्श - सर्वौषधिमहर्द्धयः ।
सम्भिन्नश्रोतोलब्धिश्च, यौगं ताण्डवडम्बरम् ॥ ८ ॥

चारणाशीविषावधि - मनःपर्यायसम्पदः ।
योगकल्पद्रुमस्यैता, विकासिकुसुमश्रियः ॥ ९ ॥

अहो योगस्य माहात्म्यं, प्राज्यं साम्राज्यमुद्वहन् ।
अवाप केवलज्ञानं, भरतो भरताधिपः ॥ १० ॥

पूर्वमप्राप्तधर्मापि, परमानन्दनन्दिता ।
योगप्रभावतः प्राप, मरुदेवा परं पदम् ॥ ११ ॥

ब्रह्म-स्त्री-भ्रूण-गो-घात-पातकान्नरकातिथेः ।
दृढप्रहारिप्रभृतेर्योगो हस्तावलम्बनम् ॥ १२ ॥

तत्कालकृतदुष्कर्म-कर्मठस्य दुरात्मनः ।
गोप्त्रे चिलातीपुत्रस्य, योगाय स्पृहयेन्न कः ॥ १३ ॥

तस्याजननिरेवास्तु, नृपशोर्मोघजन्मनः ।
अविद्धकर्णो यो योग इत्यक्षरशलाकया ॥ १४ ॥

योगस्वरूपम्-

चतुर्वर्गेऽग्रणीर्मोक्षो, योगस्तस्य च कारणम् ।
ज्ञानश्रद्धानचारित्र-रूपं रत्नत्रयं च सः ॥ १५ ॥

ज्ञान स्वरूपम्-

यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा ।
योऽवबोधस्तमत्राहुः, सम्यग्ज्ञानं मनीषिणः ॥ १६ ॥

**आन्तरश्लोका :-**

१- अथ जीवतत्त्वम् -

[આન્તર શ્લોક ૧થી ૬૫ શાસ્ત્રસંદેશમાલા ભાગ-૧૧ શ્રી ત્રિષષ્ઠિ દેશના સંગ્રહમાં શ્રી અનન્તજિનદેશનામધ્યે શ્લોક નં.૨થી ૬૫]

*स्वस्वभावजमत्यक्षं, यदस्मिन् शाश्वतं सुखम् ।*
*चतुर्वर्गाग्रणीत्वेन, तेन मोक्षः प्रकीर्त्तितः ॥ ६६ ॥*

ज्ञानस्वरूपम् -

*मतिश्रुतावधिमनःपर्यायाः केवलं तथा ।*
*अमीभिः सान्वयैर्भेदै, र्ज्ञानं पञ्चविधं मतम् ॥ ६७ ॥*

अवग्रहादिभिर्भिन्नं, बह्वाद्यैरितरैरपि ।
इन्द्रियानिन्द्रियभवं, मतिज्ञानमुदीरितम् ॥ ६८ ॥

विस्तृतं बहुधा पूर्वै-रङ्गोपाङ्गैः प्रकीर्णकैः ।
स्याच्छब्दलाञ्छितं ज्ञेयं, श्रुतज्ञानमनेकधा ॥ ६९ ॥

देवनैरयिकाणां स्यादवधिर्भवसम्भवः ।
षड्विकल्पस्तु शेषाणां, क्षयोपशमलक्षणः ॥ ७० ॥

ऋजुर्विपुल इत्येवं, स्यान्मनःपर्ययो द्विधा ।
विशुद्धयप्रतिपाताभ्यां, तद्विशेषोऽवगम्यताम् ॥ ७१ ॥

अशेषद्रव्यपर्याय-विषयंविश्वलोचनम् ।
अनन्तमेकमत्यक्षं, केवलज्ञानमुच्यते ॥ ७२ ॥

एवं च पञ्चभिर्ज्ञानै, र्ज्ञाततत्त्वसमुच्चयः ।
अपवर्गहेतुरत्न-त्रयस्याद्याङ्गभाग्भवेत् ॥ ७३ ॥

भवविटपिसमूलोन्मूलने मत्तदन्ती, जडिम-तिमिरनाशे, पद्मिनीप्राणनाथः
नयनमपरमेतद्विश्वतत्त्वप्रकाशे, करणहरिणबन्धे, वागुरा ज्ञानमेव ७४ ॥

दर्शनस्वरूपम् -

रुचिर्जिनोक्ततत्त्वेषु, सम्यक्श्रद्धानमुच्यते ।
जायते तन्निसर्गेण, गुरोरधिगमेन वा ॥ १७ ॥

अनाद्यनन्तसंसारा-वर्त्तवर्त्तिषु देहिषु ।
ज्ञानदृष्ट्यावृतिवेद-नीयान्तरायकर्म्मणाम् ॥ ७५ ॥

सागरोपमकोटीनां, कोट्यस्त्रिंशत्परा स्थितिः ।
विंशतिर्गोत्रनाम्नोश्च, मोहनीयस्य सप्ततिः ॥ ७६ ॥

ततो गिरिसरिद्ग्राव-घोलनान्यायतः स्वयम् ।
एकाब्धिकोटिकोट्यूना, प्रत्येकं क्षीयते स्थितिः ॥ ७७ ॥

शेषाब्धिकोटिकोट्यन्तः-स्थितौ सकलजन्मिनः ।
यथाप्रवृत्तिकरणाद्, ग्रन्थिदेशं समियर्ति ॥ ७८ ॥

रागद्वेषपरीणामो, दुर्भेदो ग्रन्थिरुच्यते ।
दुरुच्छेदो दृढतरः, काष्ठादेरिव सर्वदा ॥ ७९ ॥

ग्रन्थिदेशं तु संप्राप्ता, रागादिप्रेरिता पुनः ।
उत्कृष्टबन्धयोग्याः स्युश्चतुर्गतिजुषोऽपि ते ॥ ८० ॥

तेषां मध्ये तु ये भव्यां, भाविभद्राः शरीरिणः ।
आविष्कृत्य परं वीर्य-मपूर्वकरणे कृते ॥ ८१ ॥

अतिक्रामन्ति सहसा, तं ग्रन्थिं दुरतिक्रमम् ।
अतिक्रान्तमहाध्वानो, घट्टभूमिमिवाध्वगाः ॥ ८२ ॥

अथानिवृत्तिकरणादन्तरकरणे कृते ।
मिथ्यात्वं विरलीकुर्युर्वेदनीयं यदग्रतः ॥ ८३ ॥

आन्तर्मुहूर्त्तिकं सम्यग्-दर्शनं प्राप्नुवन्ति यत् ।
निसर्गहेतुकमिदं, सम्यक्श्रद्धानमुच्यते ॥ ८४ ॥

गुरूपदेशमालम्ब्य, सर्वेषामपि देहिनाम् ।
यत्तु सम्यक्श्रद्धानं तत्, स्यादधिगमजं परम् ॥ ८५ ॥

यमप्रशमजीवातुर्बीजं ज्ञानचरित्रयोः ।
हेतुस्तपः श्रुतादीनां, सद्दर्शनमुदीरितम् ॥ ८६ ॥

श्लाघ्यं हि चरणज्ञान-वियुक्तमपि दर्शनम् ।
न पुनर्ज्ञानचारित्रे, मिथ्यात्वविषदूषिते ॥ ८७ ॥

ज्ञानचारित्रहीनोऽपि, श्रूयते श्रेणिकः किल ।
सम्यग्दर्शनमाहात्म्यात्तीर्थकृत्त्वं प्रपत्स्यते ॥ ८८ ॥

अधृतचरणबोधाः प्राणिनो यत्प्रभावा-
दसमसुखनिधानं, मोक्षमासादयन्ति ।

*भवजलनिधिपोतं, दुःखकान्तारदावम्,*
*श्रयत तदिह सम्यग्-दर्शनं रत्नमेकम्* ॥ ८९ ॥

चारित्रस्वरूपम् -

सर्वसावद्ययोगानां, त्यागश्चारित्रमिष्यते ।
कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा ॥ १८ ॥

अहिंसासूनृतास्तेयब्रह्मचर्यापरिग्रहाः ।
पञ्चभिः पञ्चभिर्युक्ता, भावनाभिर्विमुक्तये ॥ १९ ॥

न यत्प्रमादयोगेन, जीवितव्यपरोपणम् ।
त्रसानां स्थावराणां च, तदहिंसाव्रतं मतम् ॥ २० ॥

प्रियं पथ्यं वचस्तथ्यं, सूनृतव्रतमुच्यते ।
तत्तथ्यमपि नो तथ्य-मप्रियं चाहितं च यत् ॥ २१ ॥

अनादानमदत्तस्या-स्तेयव्रतमुदीरितम् ।
बाह्याः प्राणा नृणामर्थो, हरता तं हता हि ते ॥ २२ ॥

दिव्यौदारिककामानां, कृतानुमतिकारितैः ।
मनोवाक्कायतस्त्यागो, ब्रह्माष्टादशधा मतम् ॥ २३ ॥

सर्वभावेषु मूर्च्छाया-स्त्यागः स्यादपरिग्रहः ।
यदसत्स्वपि जायेत, मूर्च्छया चित्तविप्लवः ॥ २४ ॥

भावनाभिर्भावितानि, पञ्चभिः पञ्चभिः क्रमात् ।
महाव्रतानि नो कस्य, साधयन्त्यव्ययं पदम् ॥ २५ ॥

मनोगुप्त्येषणादाने-र्याभिः समितिभिः सदा ।
दृष्टान्नपानग्रहणे-नाहिंसां भावयेत् सुधीः ॥ २६ ॥

हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम् ।
आलोच्य भाषणेनापि, भावयेत्सूनृतव्रतम् ॥ २७ ॥

आलोच्यावग्रहयाञ्चा-ऽभीक्ष्णावग्रहयाचनम् ।
एतावन्मात्रमेवैतदित्यवग्रहधारणम् ॥ २८ ॥

समानधार्मिकेभ्यश्च, तथावग्रहयाचनम् ।
अनुज्ञापितपानान्नाशनमस्तेयभावनाः [युग्मम्] ॥ २९ ॥

स्त्रीषण्ढपशुमद्वेश्मा-सनकुड्यान्तरोज्झनात् ।
सरागस्त्रीकथात्यागा-त्प्राग्रतस्मृतिवर्जनात् ॥ ३० ॥

स्त्रीरम्याङ्गेक्षणस्वाङ्ग-संस्कारपरिवर्जनात् ।
प्रणीतात्यशनत्यागाद्, ब्रह्मचर्यं तु भावयेत् [युग्मम्] ॥ ३१ ॥

स्पर्शे रसे च गन्धे च, रूपे शब्दे च हारिणि ।
पञ्चस्वितीन्द्रियार्थेषु, गाढं गार्द्ध्यस्य वर्जनम् ॥ ३२ ॥

एतेष्वेवामनोज्ञेषु, सर्व्वथा द्वेषवर्जनम् ।
आकिञ्चन्यव्रतस्यैवं, भावनाः पञ्च कीर्तिताः (युग्मम्) ॥ ३३ ॥

अथवा पञ्चसमितिगुप्तित्रयपवित्रितम् ।
चरित्रं सम्यक्चारित्र-मित्याहुर्मुनिपुङ्गवाः ॥ ३४ ॥

ईर्याभाषैषणादान-निक्षेपोत्सर्गसंज्ञिकाः ।
पञ्चाहुः समितीस्तिस्रो, गुप्तीस्त्रियोगनिग्रहात् ॥ ३५ ॥

लोकातिवाहिते मार्गे, चुम्बिते भास्वदंशुभिः ।
जन्तुरक्षार्थमालोक्य, गतिरीर्या मता सताम् ॥ ३६ ॥

अवद्यत्यागतः सर्व-जनीनं मितभाषणम् ।
प्रिया वाचंयमानां सा, भाषासमितिरुच्यते ॥ ३७ ॥

द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम् ।
मुनिर्यदन्नमादत्ते, सैषणासमितिर्मता ॥ ३८ ॥

आसनादीनि संवीक्ष्य, प्रतिलिख्य च यत्नतः ।
गृह्णीयान्निक्षिपेद्वा यत् सादानसमितिः स्मृता ॥ ३९ ॥

कफमूत्रमलप्रायं, निर्जन्तुजगतीतले ।
यत्नाद्यदुत्सृजेत्साधुः, सोत्सर्गसमिति र्भवेत् ॥ ४० ॥

विमुक्तकल्पनाजालं, समत्वे सुप्रतिष्ठितम् ।
आत्मारामं मनस्तज्ज्ञैर्मनोगुप्तिरुदाहृता ॥ ४१ ॥

संज्ञादिपरिहारेण, यन्मौनस्यावलम्बनम् ।
वाग्वृत्तेः संवृतिर्वा या, सा वाग्गुप्तिरिहोच्यते ॥ ४२ ॥

उपसर्गप्रसङ्गेऽपि, कायोत्सर्गजुषो मुनेः ।
स्थिरीभावः शरीरस्य, कायगुप्तिर्निगद्यते ॥ ४३ ॥

शयनासननिक्षेपादानचंक्रमणेषु च ।
स्थानेषु चेष्टानियमः, कायगुप्तिस्तु साऽपरा ॥ ४४ ॥

एताश्चारित्रगात्रस्य, जननात्परिपालनात् ।
संशोधनाच्च साधूनां, मातरोऽष्टौ प्रकीर्तिताः ॥ ४५ ॥

सर्वात्मना यतीन्द्राणा-मेतच्चारित्रमीरितम् ।
यतिधर्मानुरक्तानां, देशतः स्यादगारिणाम् ॥ ४६ ॥

न्यायसम्पन्नविभवः, शिष्टाचारप्रशंसकः ।
कुलशीलसमैः सार्द्धं, कृतोद्वाहोन्यगोत्रजैः ॥ ४७ ॥

पापभीरुः प्रसिद्धं च, देशाचारं समाचरन् ।
अवर्ण्णवादी न क्वापि, राजादिषु विशेषतः ॥ ४८ ॥

अनतिव्यक्तगुप्ते च, स्थाने सुप्रातिवेश्मिके ।
अनेकनिर्गमद्वारविवर्जितनिकेतनः ॥ ४९ ॥

कृतसङ्गः सदाचारै-र्मातापित्रोश्च पूजकः ।
त्यजन्नुपप्लुतं स्थान-मप्रवृत्तश्च गर्हिते ॥ ५० ॥

व्ययमायोचितं कुर्वन्, वेषं वित्तानुसारतः ।
अष्टभिर्धीगुणैर्युक्तः, श्रृण्वानो धर्ममन्वहम् ॥ ५१ ॥

अजीर्णे भोजनत्यागी, काले भोक्ता च सात्म्यतः ।
अन्योऽन्याप्रतिबन्धेन, त्रिवर्गमपि साधयन् ॥ ५२ ॥

यथावदतिथौ साधौ, दीने च प्रतिपत्तिकृत् ।
सदाऽनभिनिविष्टश्च, पक्षपाती गुणेषु च ॥ ५३ ॥

अदेशाकालयोश्चर्यां, त्यजन् जानन् बलाबलम् ।
वृत्तस्थज्ञानवृद्धानां, पूजकः पोष्यपोषकः ॥ ५४ ॥

दीर्घदर्शी विशेषज्ञः, कृतज्ञो लोकवल्लभः ।
सलज्जः सदयः सौम्यः, परोपकृतिकर्मठः ॥ ५५ ॥

अन्तरङ्गारिषड्वर्ग-परिहारपरायणः ।
वशीकृतेन्द्रियग्रामो, गृहिधर्म्माय कल्पते ॥ ५६ ॥

## अथ द्वितीयप्रकाशः

सम्यक्त्वमूलानि पञ्चाणु-व्रतानि गुणास्त्रयः ।
शिक्षापदानि चत्वारि, व्रतानि गृहमेधिनाम् ॥ ५७ ॥

या देवे देवताबुद्धि-र्गुरौ च गुरुतामतिः ।
धर्मे च धर्मधीः शुद्धा, सम्यक्त्वमिदमुच्यते ॥ ५८ ॥

*मूलं बोधिद्रुमस्यैतत्, द्वारं पुण्यपुरस्य च ।*
*पीठं निर्वाणहर्म्यस्य, निधानं सर्वसम्पदाम् ॥ १० ॥*

*गुणानामेक आधारो-रत्नानामिव सागरः ।*
*पात्रं चारित्रवित्तस्य, सम्यक्त्वं श्लाघ्यते न कैः ॥ ११ ॥*

*अवतिष्ठेत नाज्ञानं, जन्तौ सम्यक्त्ववासिते ।*
*प्रचारस्तमसः कीदृक्, भुवने भानुभासिते ॥ १२ ॥*

*तिर्यग्नरकयोर्द्वारि, दृढा सम्यक्त्वमर्गला ।*
*देवमानवनिर्वाण-सुखद्वारैककुञ्चिका ॥ १३ ॥*

*भवेद्वैमानिकोऽवश्यं, जन्तुः सम्यक्त्ववासितः ।*
*यदि नोद्वान्तसम्यक्त्वो, बद्धायुर्वापि नो पुरा ॥ ९४ ॥*

*अन्तर्मुहूर्त्तमपि यः समुपास्य जन्तुः, सम्यक्त्वरत्नममलं विजहाति सद्यः*
*बम्भ्रम्यते भवपथे सुचिरं न सोऽपि, तद्बिभ्रतश्चिरतरं किमुदीरयामः ९५*

अदेवे देवबुद्धिर्या, गुरुधीरगुरौ च या ।
अधर्मे धर्म्मबुद्धिश्च, मिथ्यात्वं तद्विपर्ययात् ॥ ५९ ॥

*मिथ्यात्वं परमो रोगो, मिथ्यात्वं परमं तमः ।*
*मिथ्यात्वं परमः शत्रु-र्मिथ्यात्वं परमं विषम् ॥ ९६ ॥*

*जन्मन्येकत्र दुःखाय, रोगो ध्वान्तं रिपुर्विषम् ।*
*अपि जन्मसहस्रेषु, मिथ्यात्वमचिकित्सितम् ॥ ९७ ॥*

*मिथ्यात्वेनालीढचित्ता नितान्तं, तत्त्वातत्त्वं जानते नैव जीवाः ।*
*किं जात्यन्धाः कुत्रचिद्वस्तुजाते, रम्यारम्यव्यक्तिमासादयेयुः ॥ ९८ ॥*

सर्वज्ञो जितरागादि-दोषस्त्रैलोक्यपूजितः ।
यथास्थितार्थवादी च, देवोऽर्हन् परमेश्वरः ॥ ६० ॥

ध्यातव्योऽयमुपास्योऽय-मयं शरणमिष्यताम् ।
अस्यैव प्रतिपत्तव्यं, शासनं चेतनास्ति चेत् ॥ ६१ ॥

ये स्त्रीशस्त्राक्षसूत्रादि-रागाद्यङ्ककलङ्किताः ।
निग्रहानुग्रहपरा-स्ते देवाः स्युर्न मुक्तये ॥ ६२ ॥

नाट्याट्टहाससङ्गीता-द्युपप्लवविसंस्थुलाः ।
लम्भयेयुः पदं शान्तं, प्रपन्नान् प्राणिनः कथम् ॥ ६३ ॥

*न सर्वज्ञा न नीरागाः, शङ्करब्रह्मविष्णवः ।*
*प्राकृतेभ्यो मनुष्येभ्यो-ऽप्यसमञ्जसवृत्तितः ॥ ९९ ॥*

*स्त्रीसङ्गः काममाचष्टे, द्वेषं चायुधसंग्रहः ।*
*व्यामोहं चाक्षसूत्रादि-रशौचं च कमण्डलुः ॥ १०० ॥*

गौरी रुद्रस्य सावित्री, ब्रह्मणः श्रीर्मुरद्विषः ।
शचीन्द्रस्य रवे रत्ना-देवी दक्षात्मजा विधोः ॥ १०१ ॥

तारा बृहस्पतेः स्वाहा, वह्नेश्चेतोभुवो रतिः ।
धूमोर्णा श्राद्धदेवस्य, दारा एवं दिवौकसाम् ॥ १०२ ॥

सर्वेषां शस्त्रसम्बन्धः, सर्वेषां मोहजृम्भितम् ।
तदेवं देवसन्दोहो, न देवपदवीं स्पृशेत् ॥ १०३ ॥

बुद्धस्यापि न देवत्वं, मोहाच्छून्याभिधायिनः ।
प्रमाणसिद्धे शून्यत्वे, शून्यवादकथा वृथा ॥ १०४ ॥

प्रमाणस्यैव सत्त्वेन, न प्रमाणविवर्जिता ।
शून्यसिद्धिः परस्यापि, न स्वपक्षस्थितिः कथम् ? ॥ १०५ ॥

सर्वथा सर्वभावेषु, क्षणिकत्वे प्रतिश्रुते ।
फलेन सह सम्बन्धः, साधकस्य कथं भवेत् ॥ १०६ ॥

वधस्य वधको हेतुः, कथं क्षणिकवादिनः ।
स्मृतिश्च प्रत्यभिज्ञा च, व्यवहारकरी कथम् ॥ १०७ ॥

निपत्य ददतो व्याघ्र्याः, स्वकायं कृमिसङ्कुलम् ।
देयादेयविमूढस्य, दया बुद्धस्य कीदृशी ॥ १०८ ॥

स्वजन्मकाल एवात्म-जनन्युदरदारिणः ।
मांसोपदेशदातुश्च, कथं शौद्धोदनेर्दया ॥ १०९ ॥

यो ज्ञानं प्रकृतेर्धर्म्मं, भाषते स्म निरर्थकम् ।
निर्गुणो निष्क्रियो मूढः, स देवः कपिलः कथम् ॥ ११० ॥

आर्याविनायकस्कन्द-समीरणपुरस्सराः ।
निगद्यन्ते कथं देवाः, सर्वदोषनिकेतनम् ॥ १११ ॥

या पशुर्गूथमश्नाति, स्वपुत्रं च वृषस्यति ।
शृङ्गादिभिर्घ्नति जन्तून्, सा वन्द्याऽस्तु कथं नु गौः ॥ ११२ ॥

*पयः प्रदानसामर्थ्या-द्वन्द्या चेन्महिषी न किम् ? ।*
*विशेषो दृश्यते नास्यां, महिषीतो मनागपि* // ११३ //

*स्थानं तीर्थर्षिदेवानां, सर्वेषामपि गौर्यदि ।*
*विक्रीयते दुह्यते च, हन्यते च कथं ततः* // ११४ //

*मुसलोदूखले चुल्ली, देहली पिप्पलो जलम् ।*
*निम्बोऽर्कश्चापि यैः प्रोक्ता, देवास्तैः केऽत्र वर्जिताः* // ११५ //

*कृतार्था जठरोपस्थ-दुःस्थितैरपि दैवतैः ।*
*भवादृशान्निह्नुवते, हहा देवास्तिकाः परे* // ११६ //

महाव्रतधरा धीरा, भैक्षमात्रोपजीविनः ।
सामायिकस्था धर्मोपदेशका गुरवो मताः ॥ ६४ ॥

सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः ।
अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु ॥ ६५ ॥

परिग्रहारम्भमग्ना-स्तारयेयुः कथं परान् ? ।
स्वयं दरिद्रो न पर-मीश्वरीकर्तुमीश्वरः ॥ ६६ ॥

दुर्गतिप्रपतत्प्राणि-धारणाद्धर्म उच्यते ।
संयमादिर्दशविधः सर्व्वज्ञोक्तो विमुक्तये ॥ ६७ ॥

अपौरुषेयं वचन-मसम्भवि भवेद्यदि ।
न प्रमाणं भवेद्वाचां, ह्याप्ताधीना प्रमाणता ॥ ६८ ॥

मिथ्यादृष्टिभिराम्नातो-हिंसाद्यैः कलुषीकृतः ।
स धर्म्म इति वित्तोऽपि, भवभ्रमणकारणम् ॥ ६९ ॥

सरागोऽपि हि देवश्चेद्, गुरुरब्रह्मचार्यपि ।
कृपाहीनोऽपि धर्म्मः स्यात्, कष्टं नष्टं हहा जगत् ॥ ७० ॥

शमसंवेगनिर्वेदा-नुकम्पास्तिक्यलक्षणैः ।
लक्षणैः पञ्चभिः सम्यक्, सम्यक्त्वमुपलक्ष्यते ॥ ७१ ॥

स्थैर्यं प्रभावना भक्तिः कौशलं जिनशासने ।
तीर्थसेवा च पञ्चास्य, भूषणानि प्रचक्षते ॥ ७२ ॥

शङ्काकाङ्क्षाविचिकित्सा-मिथ्यादृष्टिप्रशंसनम् ।
तत्संस्तवश्च पञ्चापि, सम्यक्त्वं दूषयन्त्यलम् ॥ ७३ ॥

विरतिं स्थूलहिंसादे-र्द्विविधत्रिविधादिना ।
अहिंसादीनि पञ्चाणु-व्रतानि जगदुर्जिनाः ॥ ७४ ॥

पङ्गु-कुष्ठिकुणित्वादि, दृष्ट्वा हिंसाफलं सुधीः ।
निरागस्त्रसजन्तूनां, हिंसां सङ्कल्पतस्त्यजेत् ॥ ७५ ॥

*येषामेकान्तिको भेदः, सम्मतो देहदेहिनोः ।*
*तेषां देहविनाशेऽपि, न हिंसा देहिनो भवेत्* ॥ ११७ ॥

*अभेदैकान्तवादेऽपि, स्वीकृते देह-देहिनोः ।*
*देहनाशे देहिनाशात् परलोकोऽस्तु कस्य वै* ॥ ११८ ॥

*भिन्नाभिन्नतया तस्मा-ज्जीवे देहात्प्रतिश्रुते ।*
*देहनाशे भवेत्पीडा, या तां हिंसां प्रचक्षते* ॥ ११९ ॥

*दुःखोत्पत्तिर्मनःक्लेश-स्तत्पर्यायस्य च क्षयः ।*
*यस्यां स्यात्सा प्रयत्नेन, हिंसा हेया विपश्चिता* ॥ १२० ॥

*प्राणी प्रमादतः कुर्या-द्यत्प्राणव्यपरोपणम् ।*
*सा हिंसा जगदे प्राज्ञै-र्बीजं संसारभूरुहः* ॥ १२१ ॥

*शरीरी म्रियतां मा वा, ध्रुवं हिंसा प्रमादिनः ।*
*सा प्राणव्यपरोपेऽपि, प्रमादरहितस्य न* ॥ १२२ ॥

*जीवस्य हिंसा न भवे-न्नित्यस्यापरिणामिनः ।*
*क्षणिकस्य स्वयं नाशात्, कथं हिंसोपपद्यताम्* ॥ १२३ ॥

*नित्यानित्ये ततो जीवे, परिणामिनि युज्यते ।*
*हिंसा कायवियोगेन, पीडातः पापकारणम्* ॥ १२४ ॥

केचिद्वदन्ति हन्तव्याः, प्राणिनः प्राणिघातिनः ।
हिंस्रस्यैकस्य घाते स्या-द्रक्षणं भूयसां किल // १२५ //

तदयुक्तमशेषाणां, हिंस्रत्वात्प्राणिनामिह ।
हन्तव्यता स्यात्तल्लाभ-मिच्छोर्मूलक्षतिः स्फुटा // १२६ //

अहिंसासम्भवो धर्म्मः, स हिंसातः कथं भवेत् ।
न तोयजानि पद्मानि, जायन्ते जातवेदसः ? // १२७ //

पापहेतुर्वधः पापं, कथं छेत्तुमलं भवेत् ।
मृत्युहेतुः कालकूटं, जीविताय न जायते // १२८ //

संसारमोचकास्त्वाहु-र्दुःखिनां वध इष्यताम् ।
विनाशे दुःखिनां दुःख-विनाशो जायते किल // १२९ //

तदप्यसाम्प्रतं ते हि, हता नरकगामिनः ।
अनन्तेषु नियोज्यन्ते, दुःखेषु स्वल्पदुःखकाः // १३० //

किं च सौख्यवतां घाते, धर्म्मः स्यात्पापवारणात् ।
इत्थं विचार्य हेयानि, वचनानि कुतीर्थिनाम् // १३१ //

चार्वाकाः प्राहुरात्मैव, तावन्नास्ति कथञ्चन ।
तं विना कस्य सा हिंसा, कस्य हिंसाफलं भवेत् // १३२ //

भूतेभ्य एव चैतन्यं, पिष्टादिभ्यो यथा मदः ।
भूतसंहतिनाशे च, पञ्चत्वमिति कथ्यते // १३३ //

आत्माऽभावे च तन्मूलः, परलोको न युज्यते ।
अभावे परलोकस्य, पुण्यापुण्यकथा वृथा // १३४ //

तपांसि यातनाश्चित्राः, संयमो भोगवञ्चना ।
इति विप्रतिपत्तिभ्यः, परेभ्यः परिभाष्यते // १३५ //

स्वसंवेदनतः सिद्धः, स्वदेहे जीव इष्यताम् ।
अहं दुःखी सुखी वाह-मिति प्रत्यययोगतः // १३६ //

*घटं वेद्म्यहमित्यत्र, त्रितयं प्रतिभासते।*
*कर्म्म क्रिया च कर्त्ता च, तत्कर्त्ता किं निषिध्यते* ॥ १३७ ॥

*शरीरमेव चेत्कर्तृ, न कर्तृ तदचेतनम्।*
*भूतचैतन्ययोगाच्चे-च्चेतनं तदसङ्गतम्* ॥ १३८ ॥

*मया दृष्टं श्रुतं स्पृष्टं, घ्रातमास्वादितं स्मृतम्।*
*इत्येककर्तुका भावा, भूतचिद्वादिनः कथम्* ॥ १३९ ॥

*स्वसंवेदनतः सिद्धे, स्वदेहे चेतनात्मनि।*
*परदेहेऽपि तत्सिद्धि-रनुमानेन साध्यते* ॥ १४० ॥

*बुद्धिपूर्वां क्रियां दृष्ट्वा, स्वदेहेऽन्यत्र तद्गतिः।*
*प्रमाणबलतः सिद्धा, केन नाम निवार्यते ?* ॥ १४१ ॥

*तत्परलोकिनः सिद्धौ, परलोको न दुर्घटः।*
*तथा च पुण्यपापादि, सर्वमेवोपपद्यंते* ॥ १४२ ॥

*तपांसि यातनाश्चित्रा, इत्याद्युन्मत्तभाषितम्।*
*सचेतनस्य तत्कस्य, नोपहासाय जायते* ॥ १४३ ॥

*निर्बाधोऽस्ति ततो जीवः, स्थित्युत्पादव्ययात्मकः।*
*ज्ञाता द्रष्टा गुणी भोक्ता, कर्त्ता कायप्रमाणकः* ॥ १४४ ॥

*तदेवमात्मनः सिद्धौ, हिंसा किं नोपपद्यते।*
*तदस्याः परिहारेणाहिंसाव्रतमुदीरितम्* ॥ १४५ ॥

आत्मवत्सर्वभूतेषु, सुखदुःखे प्रियाप्रिये।
चिन्तयन्नात्मनोऽनिष्टां, हिंसामन्यस्य नाचरेत् ॥ ७६ ॥

निरर्थिकां न कुर्वीत, जीवेषु स्थावरेष्वपि।
हिंसामहिंसाधर्मज्ञः काङ्क्षन्मोक्षमुपासकः ॥ ७७ ॥

प्राणी प्राणितलोभेन, यो राज्यमपि मुञ्चति।
तद्वधोत्थमघं सर्वो-र्वीदानेऽपि न शाम्यति ॥ ७८ ॥

वने निरपराधानां, वायुतोयतृणाशिनाम् ।
निघ्नन् मृगाणां मांसार्थी, विशेष्येत कथं शुनः ? ॥ ७९ ॥

दीर्यमाणः कुशेनापि, यः स्वाङ्गे हन्त दूयते ।
निर्मन्तून् स कथं जन्तू-नन्तयेन्निशितायुधैः ॥ ८० ॥

निर्मातुं क्रूरकर्म्माणः, क्षणिकामात्मनो धृतिम् ।
समापयन्ति सकलं, जन्मान्यस्य शरीरिणः ॥ ८१ ॥

म्रियस्वेत्युच्यमानोऽपि, देही भवति दुःखितः ।
मार्यमाणः प्रहरणै-र्दारुणैः स कथं भवेत् ? ॥ ८२ ॥

श्रूयते प्राणिघातेन, रौद्रध्यानपरायणौ ।
सुभूमो ब्रह्मदत्तश्च, सप्तमं नरकं गतौ ॥ ८३ ॥

कुणिर्वरं वरं पङ्गु-रशरीरी वरं पुमान् ।
अपि सम्पूर्णसर्वाङ्गो, न तु हिंसापरायणः ॥ ८४ ॥

हिंसा विघ्नाय जायेत, विघ्नशान्त्यै कृताऽपि हि ।
कुलाचारधियाऽप्येषा, कृता कुलविनाशनी ॥ ८५ ॥

अपि वंशक्रमायातां, यस्तु हिंसां परित्यजेत् ।
स श्रेष्ठः सुलस इव, कालसौकरिकात्मजः ॥ ८६ ॥

दमो देवगुरूपास्ति-र्दानमध्ययनं तपः ।
सर्वमप्येतदफलं, हिंसां चेन्न परित्यजेत् ॥ ८७ ॥

विश्वस्तो मुग्धधी र्लोकः, पात्यते नरकावनौ ।
अहो नृशंसैर्लोभान्धै-र्हिंसाशास्त्रोपदेशकैः ॥ ८८ ॥

यज्ञार्थं पशवः सृष्टाः, स्वयमेव स्वयंभुवा ।
यज्ञोऽस्य भूत्यै सर्वस्य, तस्माद्यज्ञे वधोऽवधः ॥ ८९ ॥

औषध्यः पशवो वृक्षा-स्तिर्यञ्चः पक्षिणस्तथा ।
यज्ञार्थं निधनं प्राप्ताः, प्राप्नुवन्त्युच्छ्रितिं पुनः ॥ ९० ॥

मधुपर्के च यज्ञे च, पितृदैवतकर्मणि ।
अत्रैव पशवो हिंस्या-नान्यत्रेत्यब्रवीन्मनुः ॥ ९१ ॥

एष्वर्थेषु पशून् हिंसन्, वेदतत्त्वार्थविद्द्विजः ।
आत्मानं च पशूंश्चैव, गमयत्युत्तमां गतिम् (मनुस्मृति ५/३९-४२) ॥ ९२ ॥

ये चक्रुः क्रुरकर्माणः, शास्त्रं हिंसोपदेशकम् ।
क्व ते यास्यन्ति नरके, नास्तिकेभ्योऽपि नास्तिकाः ॥ ९३ ॥

वरं वराकश्चार्वाको, योऽसौ प्रकटनास्तिकः ।
वेदोक्तितापसच्छद्म-च्छन्नं रक्षो न जैमिनि ॥ ९४ ॥

देवोपहारव्याजेन, यज्ञव्याजेन येऽथवा ।
घ्नन्ति जन्तून् गतघृणा, घोरां ते यान्ति दुर्गतिम् ॥ ९५ ॥

शमशीलदयामूलं, हित्वा धर्मं जगद्धितम् ।
अहो हिंसाऽपि, धर्माय, जगदे मन्दबुद्धिभिः ॥९६ ॥

हविर्यच्चिररात्राय, यच्चानन्त्याय कल्पते ।
पितृभ्यो विधिवद्दत्तं, तत्प्रवक्ष्याम्यशेषतः ॥ ९७ ॥

तिलैर्व्रीहियवैर्माषै-रद्भिर्मूलफलेन वा ।
दत्तेन मासं प्रीयन्ते, विधिवत् पितरो नृणाम् ॥ ९८ ॥

द्वौ मासौ मत्स्यमांसेन, त्रीन् मासान् हारिणेन तु ।
औरभ्रेणाथ चतुरः, शाकुनेनेह पञ्च तु ॥ ९९ ॥

षण्मासांश्छागमांसेन, पार्षतेनेह सप्त वै ।
अष्टावेणस्य मांसेन, रौरवेण नवैव तु ॥ १०० ॥

दशमासांस्तु तृप्यन्ति, वराहमहिषामिषैः ।
शशकूर्मयोर्मांसेन, मासानेकादशैव तु ॥ १०१ ॥

संवत्सरं तु गव्येन, पयसा पायसेन तु ।
वार्द्धीणसस्य मांसेन, तृप्तिर्द्वादशवार्षिकी (मनुस्मृति ३/२६६-२७१) ॥१०२॥

इति स्मृत्यनुसारेण, पितृणां तर्पणाय या ।
मूढै र्विधीयते हिंसा, साऽपि दुर्गतिहेतवे ॥ १०३ ॥

यो भूतेष्वभयं दद्याद्, भूतेभ्यस्तस्य नो भयम् ।
यादृग्वितीर्यते दानं, तादृगासाद्यते फलम् ॥ १०४ ॥

कोदण्डदण्डचक्रासि-शूलशक्तिधराः सुराः ।
हिंसका अपि हा कष्टं, पूज्यन्ते देवताधिया ॥ १०५ ॥

मातेव सर्वभूताना-महिंसा हितकारिणी ।
अहिंसैव हि संसार-मरावमृतसारणिः ॥ १०६ ॥

अहिंसा दुःखदावाग्नि-प्रावृषेण्यघनावली ।
भवभ्रमिरुगार्त्ताना-महिंसा परमौषधी ॥ १०७ ॥

दीर्घमायुः परं रूप-मारोग्यं श्लाघनीयता ।
अहिंसायाः फलं सर्वं, किमन्यत्कामदैव सा ॥ १०८ ॥

*हेमाद्रिः पर्वतानां हरिरमृतभुजां, चक्रवर्ती नराणां,*
*शीतांशुर्ज्योतिषां स्वस्तरुरवनिरुहां चण्डरोचिर्ग्रहाणाम् ।*
*सिन्धुस्तोयाशयानां जिनपतिरसुरामर्त्यमर्त्याधिपानां,*
*यद्वत्तद्वद्व्रतानामधिपतिपदवीं यात्यहिंसा किमन्यत्* ॥ १४६ ॥

मन्मनत्वं काहलत्वं, मूकत्वं मुखरोगिताम् ।
वीक्ष्याऽसत्यफलं कन्या-लीकाद्यसत्यमुत्सृजेत् ॥ १०९ ॥

कन्यागोभूम्यलीकानि, न्यासापहरणं तथा ।
कूटसाक्ष्यं च पञ्चेति, स्थूलासत्यान्यकीर्त्तयन् ॥ ११० ॥

सर्वलोकविरुद्धं य-द्यद्विश्वसितघातकम् ।
यद्विपक्षश्च पुण्यस्य, न वदेत्तदसूनृतम् ॥ १११ ॥

असत्यतो लघीयस्त्व-मसत्याद्वचनीयता ।
अधोगतिरसत्याच्च, तदसत्यं परित्यजेत् ॥ ११२ ॥

असत्यवचनं प्राज्ञः, प्रमादेनापि नो वदेत् ।
श्रेयांसि येन भज्यन्ते, वात्ययेव महाद्रुमाः ॥ ११३ ॥

असत्यवचनाद्वैर-विषादाप्रत्ययादयः ।
प्रादुःषन्ति न के दोषाः, कुपथ्याद् व्याधयो यथा ॥ ११४ ॥

निगोदेष्वथ तिर्यक्षु, तथा नरकवासिषु ।
उत्पद्यन्ते मृषावाद-प्रसादेन शरीरिणः ॥ ११५ ॥

ब्रूयाद्भियोपरोधाद्वा नासत्यं कालिकार्यवत् ।
यस्तु ब्रूते स नरकं, प्रयाति वसुराज्ञवत् ॥ ११६ ॥

न सत्यमपि भाषेत, परपीडाकरं वचः ।
लोकेऽपि श्रूयते यस्मात्, कौशिको नरकं गतः ॥ ११७ ॥

अल्पादपि मृषावादाद्, रौरवादिषु संभवः ।
अन्यथा वदतां जैनीं, वाचं त्वहह का गतिः ॥ ११८ ॥

ज्ञानचारित्रयोर्मूलं, सत्यमेव वदन्ति ये ।
धात्री पवित्रीक्रियते, तेषां चरणरेणुभिः ॥ ११९ ॥

अलीकं ये न भाषन्ते, सत्यव्रतमहाधनाः ।
नापराद्धुमलं तेभ्यो भूतप्रेतोरगादयः ॥ १२० ॥

*अहिंसापयसः पालि-भूतान्यन्यव्रतानि यत् ।*
*सत्यभङ्गात्पालिभङ्गे-ऽनर्गलं विप्लवेत तत्* ॥ १४७ ॥

*सत्यमेव वदेत्प्राज्ञः, सर्वभूतोपकारकम् ।*
*यद्वा तिष्ठेत् समालम्बय, मौनं सर्वार्थसाधकम्* ॥ १४८ ॥

*पृष्टेनापि न वक्तव्यं, वचो वैरस्य कारणम् ।*
*मर्मावित्कर्कशं शङ्का-स्पदं हिंस्रमसूयकम्* ॥ १४९ ॥

*धर्मध्वंसे क्रियालोपे, स्वसिद्धान्तार्थविप्लवे ।*
*अपृष्टेनापि शक्तेन, वक्तव्यं तन्निषेधितुम्* ॥ १५० ॥

*चार्वाकैः कौलिकैर्विप्रैः, सौगतैः पाञ्चरात्रिकैः ।*
*असत्येनैव विक्रम्य, जगदेतद्विडम्बितम्* ॥ १५१ ॥

*अहो पुरजलस्रोतः, सोदरं तन्मुखोदरम् ।*
*निःसरन्ति यतो वाचः, पङ्काकुलजलोपमाः* ॥ १५२ ॥

*दावानलेन ज्वलता, परिप्लुष्टोऽपि पादपः ।*
*सान्द्रीभवति लोकोऽयं, न तु दुर्वचनाग्निना* ॥ १५३ ॥

*चन्दनं चन्द्रिका चन्द्र-मणयो मौक्तिकस्रजः ।*
*आह्लादयन्ति न तथा, यथा वाक् सूनृता नृणाम्* ॥ १५४ ॥

*शिखि मुण्डी जटी नग्नश्चीवरी यस्तपस्यति ।*
*सोऽपि मिथ्या यदि ब्रूते, निन्द्यः स्यादन्त्यजादपि* ॥ १५५ ॥

*एकत्राऽसत्यजं पापं, पापं निःशेषमन्यतः ।*
*द्वयोस्तुलाविधृतयोराद्यमेवातिरिच्यते* ॥ १५६ ॥

*पारदारिकदस्यूना-मस्ति काचित्प्रतिक्रिया ।*
*असत्यवादिनः पुंसः, प्रतीकारो न विद्यते* ॥ १५७ ॥

दौर्भाग्यं प्रेष्यतां दास्य-मङ्गच्छेदं दरिद्रताम् ।
अदत्तात्तफलं ज्ञात्वा, स्थूलस्तेयं विवर्जयेत् ॥ १२१ ॥

पतितं विस्मृतं नष्टं, स्थितं स्थापितमाहितम् ।
अदत्तं नाददीत स्वं, परकीयं क्वचित्सुधीः ॥ १२२ ॥

अयं लोकः परलोको-धर्मो धैर्यं धृतिर्मतिः ।
मुष्णता परकीयं स्वं, मुषितं सर्वमप्यदः ॥ १२३ ॥

एकस्यैकं क्षणं दुःखं, मार्यमाणस्य जायते ।
सपुत्रपौत्रस्य पुन-र्यावज्जीवं हृते धने ॥ १२४ ॥

चौर्य्यपापद्रुमस्येह, वधबन्धादिकं फलम् ।
जायते परलोके तु, फलं नरकवेदना ॥ १२५ ॥

दिवसे वा रजन्यां वा, स्वप्ने वा जागरेऽपि वा ।
सशल्य इव चौर्येण, नैति स्वास्थ्यं नरः क्वचित् ॥ १२६ ॥

मित्रपुत्रकलत्राणि, भ्रातरः पितरोऽपि हि ।
संसजन्ति क्षणमपि, न म्लेच्छैरिव तस्करैः ॥ १२७ ॥

संबन्ध्यपि निगृह्येत, चौर्यान्मण्डिकवन्नृपैः ।
चौरोऽपि त्यक्तचौर्य्यः स्यात्, स्वर्गभाग्रौहिणेयवत् ॥ १२८ ॥

दूरे परस्य सर्वस्व-मपहर्तुमुपक्रमः ।
उपाददीत नादत्तं, तृणमात्रमपि क्वचित् ॥ १२९ ॥

परार्थग्रहणे येषां, नियमः शुद्धचेतसाम् ।
अभ्यायान्ति श्रियस्तेषां, स्वयमेव स्वयंवराः ॥ १३० ॥

अनर्था दूरतो यान्ति, साधुवादः प्रवर्त्तते ।
स्वर्गसौख्यानि ढौकन्ते, स्फुटमस्तेयचारिणाम् ॥ १३१ ॥

*वरं वह्निशिखा पीता, सर्पास्यं चुम्बितं वरम् ।*
*वरं हलाहलं लीढं, परस्वंहरणं न तु ॥ १५९ ॥*

*प्रायः परस्वलुब्धस्य, निःशूका बुद्धिरेधते ।*
*हन्तुं भ्रातृन् पितृन् दारान्, सुहृदस्तनयान् गुरून् ॥ १६० ॥*

*परस्वं तस्करो गृह्णन्, वधबन्धादि नेक्षते ।*
*पयः पायीव लगुडं, बिडाल उपरिस्थितम् ॥ १६१ ॥*

*व्याधधीवरमार्जारा-दिभ्यश्चौरोऽतिरिच्यते ।*
*निगृह्यते नृपतिभि-र्यदसौ नेतरे पुनः ॥ १६२ ॥*

*स्वर्णादिकेऽप्यन्यधने पुरःस्थे, सदा मनीषा दृषदीव येषाम् ।*
*सन्तोषपीयूषरसेन तृप्तास्ते द्यां लभन्ते गृहमेधिनोऽपि ॥ १६३ ॥*

षण्ढत्वमिन्द्रियच्छेदं, वीक्ष्याब्रह्मफलं सुधीः ।
भवेत् स्वदारसन्तुष्टो-ऽन्यदारान् वा विवर्जयेत् ॥ १३२ ॥

रम्यमापातमात्रे यत्, परिणामेऽतिदारुणम् ।
किंपाकफलसंकाशं, तत्कः सेवेत मैथुनम् ॥ १३३ ॥

कम्पः स्वेदः श्रमो मूर्च्छा, भ्रमिर्ग्लानिर्बलक्षयः ।
राजयक्ष्मादिरोगाश्च, भवेयुर्मैथुनोत्थिताः ॥ १३४ ॥

योनियन्त्रसमुत्पन्नाः, सुसूक्ष्मा जन्तुराशयः ।
पीड्यमाना विपद्यन्ते, यत्र तन्मैथुनं त्यजेत् ॥ १३५ ॥

रक्तजाः कृमयः सूक्ष्मा मृदुमध्याधिशक्तयः ।
जन्मवर्त्मसु कण्डूतिं, जनयन्ति तथाविधाम् ॥ १३६ ॥

स्त्रीसंभोगेन यः कामज्वरं प्रतिचिकीर्षति ।
स हुताशं घृताहुत्या, विध्यापयितुमिच्छति ॥ १३७ ॥

वरं ज्वलदयः स्तम्भ-परिरम्भो विधीयते ।
न पुनर्नरकद्वार-रामाजघनसेवनम् ॥ १३८ ॥

सतामपि हि वामभ्रू-र्ददाना हृदये पदम् ।
अभिरामं गुणग्रामं, निर्वासयति निश्चितम् ॥ १३९ ॥

वञ्चकत्वं नृशंसत्वं चञ्चलत्वं कुशीलता ।
इति नैसर्गिका दोषा, यासां तासु रमेत कः ॥ १४० ॥

प्राप्तुं पारमपारस्य, पारावारस्य पार्यते ।
स्त्रीणां प्रकृतिवक्राणां, दुश्चरित्रस्य नो पुनः ॥ १४१ ॥

नितम्बिन्यः पतिं पुत्रं, पितरं भ्रातरं क्षणात् ।
आरोपयन्त्यकार्येऽपि, दुर्वृत्ताः प्राणसंशये ॥ १४२ ॥

भवस्य बीजं नरक-द्वारमार्गस्य दीपिका ।
शुचां कन्दः कलेर्मूलं, दुःखानां खानिरङ्गना ॥ १४३ ॥

मनस्यन्यद्वचस्यन्य-त्क्रियायामन्यदेव हि ।
यासां साधारणस्त्रीणां, ताः कथं सुखहेतवः ॥ १४४ ॥

मांसमिश्रं सुरामिश्र-मनेकविटचुम्बितम् ।
को वेश्यावदनं चुम्बे-दुच्छिष्टमिव भोजनम् ॥ १४५ ॥

अपि प्रदत्तसर्वस्वात्, कामुकात् क्षीणसम्पदः ।
वासोऽप्याच्छेत्तुमिच्छन्ति, गच्छतः पण्ययोषितः ॥ १४६ ॥

न देवान्न गुरून्नापि, सुहृदो न च बान्धवान् ।
असत्सङ्गरतिर्नित्यं, वेश्यावश्यो हि मन्यते ॥ १४७ ॥

कुष्ठिनोऽपि स्मरसमान्, पश्यन्तीं धनकाङ्क्षया ।
तन्वन्तीं कृत्रिमस्नेहं, निःस्नेहां गणिकां त्यजेत् ॥ १४८ ॥

नासक्त्या सेवनीया हि, स्वदारा अप्युपासकैः ।
आकरः सर्वपापानां, किं पुनः परयोषितः ॥ १४९ ॥

स्वपतिं या परित्यज्य, निस्त्रपोपपतिं भजेत् ।
तस्यां क्षणिकचित्तायां, विश्रम्भः कोऽन्ययोषिति ॥ १५० ॥

भीरोराकुलचित्तस्य, दुःस्थितस्य परस्त्रियाम् ।
रतिर्न युज्यते कर्तु-मुपसूनं पशोरिव ॥ १५१ ॥

प्राणसंदेहजननं, परमं वैरकारणम् ।
लोकद्वयविरुद्धं च, परस्त्रीगमनं त्यजेत् ॥ १५२ ॥

सर्वस्वहरणं बन्धं, शरीरावयवच्छिदाम् ।
मृतश्च नरकं घोरं, लभते पारदारिकः ॥ १५३ ॥

स्वादाररक्षणे यत्नं, विदधानो निरन्तरम् ।
जानन्नपि जनो दुःखं, परदारान् कथं व्रजेत् ॥ १५४ ॥

विक्रमाक्रान्तविश्वोऽपि, परस्त्रीषु रिरंसया ।
कृत्वा कुलक्षयं प्राप, नरकं दशकन्धरः ॥ १५५ ॥

लावण्यपुण्यावयवां, पदं सौन्दर्यसम्पदः ।
कलाकलापकुशला-मपि जह्यात् परस्त्रियम् ॥ १५६ ॥

अकलङ्कमनोवृत्तेः, परस्त्रीसन्निधावपि ।
सुदर्शनस्य किं ब्रूमः, सुदर्शनसमुन्नतेः ? ॥ १५७ ॥

ऐश्वर्यराजराजोऽपि, रूपमीनध्वजोऽपि च ।
सीतया रावण इव, त्याज्यो नार्या नरः परः ॥ १५८ ॥

नपुंसकत्वं तिर्यक्त्वं, दौर्भाग्यं च भवे भवे ।
भवेन्नराणां स्त्रीणां चा-न्यकान्तासक्तचेतसाम् ॥ १५९ ॥

प्राणभूतं चरित्रस्य, परब्रह्मैककारणम् ।
समाचरन् ब्रह्मचर्यं, पूजितैरपि पूज्यते ॥ १६० ॥

चिरायुषः सुसंस्थाना-दृढसंहनना नराः ।
तेजस्विनो महावीर्या, भवेयुर्ब्रह्मचर्यतः ॥ १६१ ॥

*पश्यन्ति कृष्णकुटिलां, कबरीमेव योषिताम् ।*
*तदभिष्वङ्गजन्मानं, न दुष्कर्मपरम्पराम् ॥ १६४ ॥*

*सीमन्तिनीनां सीमन्तः, पूर्णः सिन्दूररेणुना ।*
*पन्थाः सीमन्तकाख्यस्य, नरकस्येति लक्ष्यताम् ॥ १६५ ॥*

*भ्रूवल्लरीं वर्णिनीनां, वर्णयन्ति न जानते ।*
*मोक्षाध्वनि प्रस्थितानां, पुरोगामुरगीमिमाम् ॥ १६६ ॥*

*भङ्गुरान्नयनापाङ्गा-नङ्गनानां निरीक्षते ।*
*हतबुद्धिर्न तु निजं, भङ्गुरं हन्त जीवितम् ॥ १६७ ॥*

*नासावंशं प्रशंसन्ति, स्त्रीणां सरलमुन्नतम् ।*
*निजवंशं न पश्यन्ति, भ्रश्यन्तमनुरागिणः ॥ १६८ ॥*

*स्त्रीणां कपोले संक्रान्त-मात्मानं वीक्ष्य हृष्यति ।*
*संसारसरसीपङ्के, मज्जन्तं वेत्ति नो जडः ॥ १६९ ॥*

*पिबन्ति रतिसर्वस्व-बुद्ध्या बिम्बाधरं स्त्रियाः ।*
*न बुध्यन्ते यत्कृतान्तः, पिबत्यायुर्दिवानिशम् ॥ १७० ॥*

योषितां दशनान् कुन्द-सोदरान् बहु मन्वते ।
स्वदन्तभङ्गं नेक्षन्ते, तरसा जरसा कृतम् ॥ १७१ ॥

स्मरदोलाधिया कर्ण-पाशान् पश्यति योषिताम् ।
कण्ठोपकण्ठलुठितान्, कालपाशांस्तु नात्मनः ॥ १७२ ॥

योषितां प्रोषितमति-र्मुखं पश्यत्यनुक्षणम् ।
क्षणोऽपि हन्त नास्त्यस्य, कृतान्तमुखवीक्षणे ॥ १७३ ॥

नरः स्मरपराधीनः, स्त्रीकण्ठमवलम्बते ।
नात्मनो वेत्त्यसूनद्य, श्वो वा कण्ठावलम्बिनः ॥ १७४ ॥

स्त्रीणां भुजलताबन्धं, बन्धुरं बुध्यते कुधीः ।
न कर्मबन्धनैर्बद्ध-मात्मानमनुशोचति ॥ १७५ ॥

धत्ते स्त्रीपाणिभिः स्पृष्टो, हृष्टो रोमाञ्चकण्टकान् ।
स्मारयन्ति न किं तेऽस्य, कूटशाल्मलिकण्टकान् ॥ १७६ ॥

कुचकुम्भौ समालिङ्ग्य, स्त्रियाः शेते सुखं जडः ।
विस्मृता नूनमेतस्य, कुम्भीपाकोद्भवा व्यथा ॥ १७७ ॥

मध्यमध्यासते मुग्धा-मुग्धाक्षीणां क्षणे क्षणे ।
एतन्मध्यं भवाम्भोधे-रिति नैते विवञ्चते ॥ १७८ ॥

धिगङ्गनानां त्रिवली-तरङ्गैर्ह्रियते जनः ।
त्रिवलीछद्मना ह्येत-न्ननु वैतरणीत्रयम् ॥ १७९ ॥

स्मरार्त्तं मज्जति मनः, पुंसां स्त्रीनाभिवापिषु ।
प्रमादेनापि किं नेदं, साम्याम्भसि मुदास्पदे ॥ १८० ॥

स्मरारोहणनिःश्रेणीं, स्त्रीणां रोमलतां विदुः ।
नराः संसारकारायां, न पुनर्लोहशृङ्खलाम् ॥ १८१ ॥

जघन्या जघनं स्त्रीणां, भजन्ति विपुलं मुदा ।
संसारसिन्धोः पुलिन-मिति नूनं न जानते ॥ १८२ ॥

भजते करभोरूणा-मूरूनल्पमतिर्नरः ।
अनूरूक्रियमाणं तैः, सद्गतौ स्वं न बुध्यते ॥ १८३ ॥

स्त्रीणां पादैर्हन्यमान-मात्मानं बहुमन्यते ।
हताशो न तु जानाति, क्षेप्यमाणमधोगतौ ॥ १८४ ॥

दर्शनात् स्पर्शनाच्छ्लेषाद्, या हन्ति शमजीवितम् ।
हेयोग्रविषनागीव, वनिता सा विवेकिभिः ॥ १८५ ॥

इन्दुलेखेव कुटिला, सन्ध्येव क्षणरागिणी ।
निम्नगेव निम्नगति-र्वर्जनीया नितम्बिनी ॥ १८६ ॥

न प्रतिष्ठां न सौजन्यं, न दानं न च गौरवम् ।
न च स्वान्यहितं वामाः, पश्यन्ति मदनान्धलाः ॥ १८७ ॥

निरङ्कुशा नरे नारी, तत्करोत्यसमञ्जसम् ।
यत्क्रुद्धाः सिंहशार्दूलव्याला अपि न कुर्वते ॥ १८८ ॥

दूरतस्ताः परित्याज्याः, प्रादुर्भावितदुर्मदाः ।
विश्वोपतापकारिण्यः, करिण्य इव योषितः ॥ १८९ ॥

स कोऽपि स्मर्यतां मन्त्रः, स देवः कोऽप्युपास्यताम् ।
न येन स्त्रीपिशाचीयं, ग्रसते शीलजीवितम् ॥ १९० ॥

शास्त्रेषु श्रूयते यच्च, यच्च लोकेषु गीयते ।
संवादयन्ति दुःशीलं, तन्नार्यः कामविह्वलाः ॥ १९१ ॥

संपिण्ड्येवाहिदंष्ट्राग्नि-यमजिह्वाविषाङ्कुरान् ।
जगज्जिघांसुना नार्य्यः, कृताः क्रूरेण वेधसा ॥ १९२ ॥

यदि स्थिरा भवेद्विद्यु-त्तिष्ठन्ति यदि वायवः ।
दैवात्तथापि नारीणां, न स्थेम्ना स्थीयते मनः ॥ १९३ ॥

यद्विना मन्त्रतन्त्राद्यै-र्वञ्च्यन्ते चतुरा अपि ।
इन्द्रजालमिदं हन्त, नारीभिः शिक्षितं कुतः ॥ १९४ ॥

*अपूर्वा वामनेत्राणां, मृषावादेषु वैदुषी ।*
*प्रत्यक्षाण्यप्यकृत्यानि, यदपह्नुवते क्षणात्* ॥ १९५ ॥

*पीतोन्मत्तो यथा लोष्टं, सुवर्णं मन्यते जनः ।*
*तथा स्त्रीसङ्गजं दुःखं, सुखं मोहान्धमानसः* ॥ १९६ ॥

*जटी मुण्डी शिखी मौनी, नग्नो वल्की तपस्व्यथ ।*
*ब्रह्माऽप्यब्रह्मशीलश्चेत्तदा मह्यं न रोचते* ॥ १९७ ॥

*कण्डूयन् कच्छूरः कच्छूं, यथा दुःखं सुखीयति ।*
*दुर्वारमन्मथावेश-विवशो मैथुनं तथा* ॥ १९८ ॥

*नार्य्यो यैरुपमीयन्ते, काञ्चनप्रतिमादिभिः ।*
*आलिङ्ग्यालिङ्ग्य तान्येव, किमु कामी न तृप्यति* ॥ १९९ ॥

*यदेवाङ्गं कुत्सनीयं, गोपनीयं च योषिताम् ।*
*तत्रैव हि जनो रज्येत्, केनान्येन विरज्यताम्* ॥ २०० ॥

*मोहादहह नारीणा-मङ्गैर्मांसास्थिनिर्मितैः ।*
*चन्द्रेन्दिवरकुन्दादि, सदृक्षीकृत्य दूषितम्* ॥ २०१ ॥

*नारीं नितम्बजघनस्तनभूरिभारा-*
*मारोपयन्त्युरसि मूढधियो रताय ।*
*संसारवारिनिधिमध्यनिमज्जनाय,*
*जानन्ति तां न हि शिलां निजकण्ठबद्धाम्* ॥ २०२ ॥

*भवोदन्वद्वेलां, मदनमृगयुव्याधहरिणीं,*
*मदावस्थाहालां, विषयमृगतृष्णामरुभुवम् ।*
*महामोहध्वान्तो-च्चयबहुलपक्षान्तरजनीम्,*
*विपत्खानिं नारीं, परिहरत हे श्राद्धसुधियः !* ॥ २०३ ॥

असन्तोषमविश्वास-मारम्भं दुःखकारणम् ।
मत्वा मूर्च्छाफलं कुर्यात्, परिग्रहनियन्त्रणम् ॥ १६२ ॥

परिग्रहमहत्त्वाद्धि, मज्जत्येव भवाऽम्बुधौ ।
महापोत इव प्राणी, त्यजेत्तस्मात् परिग्रहं ॥ १६३ ॥

त्रसरेणुसमोऽप्यत्र, न गुणः कोऽपि विद्यते ।
दोषास्तु पर्वतस्थूलाः, प्रादुष्षन्ति परिग्रहे ॥ १६४ ॥

सङ्गाद्भवन्त्यसन्तोऽपि, रागद्वेषादयो द्विषः ।
मुनेरपि चलेच्चेतो, यत्तेनान्दोलितात्मनः ॥ १६५ ॥

संसारमूलमारम्भा-स्तेषां हेतुः परिग्रहः ।
तस्मादुपासकः कुर्या-दल्पमल्पं परिग्रहम् ॥ १६६ ॥

मुष्णन्ति विषयस्तेना, दहति स्मरपावकः ।
रुन्धन्ति वनिताव्याधाः, सङ्गैरङ्गीकृतं नरम् ॥ १६७ ॥

तृप्तो न पुत्रैः सगरः, कुचिकर्णो न गोधनैः ।
न धान्यैस्तिलकश्रेष्ठी, न नन्दः कनकोत्करैः ॥ १६८ ॥

तपःश्रुतपरीवारां, शमसाम्राज्यसंपदम् ।
परिग्रहग्रहग्रस्ता-स्त्यजेयुर्योगिनोऽपि हि ॥ १६९ ॥

असन्तोषवतः सौख्यं, न शक्रस्य न चक्रिणः ।
जन्तोः सन्तोषभाजो य-दभयस्येव जायते ॥ १७० ॥

सन्निधौ निधयस्तस्य, कामगव्यनुगामिनी ।
अमराः किङ्करायन्ते, सन्तोषो यस्य भूषणम् ॥ १७१ ॥

*धनं धान्यं स्वर्णरूप्य-कुप्यानि क्षेत्रवास्तुनी ।*
*द्विपाच्चतुष्पाच्चेति स्यु-र्नव बाह्याः परिग्रहाः* // २०४ //

*रागद्वेषौ कषायाः शुग्-हासौ रत्यरती भयम् ।*
*जुगुप्सा वेदमिथ्यात्वे, आन्तराः स्युश्चतुर्दश* // २०५ //

*बाह्यात् परिग्रहात्प्रायः, प्रकुप्यन्त्यान्तरा अपि ।*
*प्रावृषो मूषिकालार्क-विषजोपद्रवा इव* // २०६ //

प्राप्तप्रतिष्ठानपि च, वैराग्यादिमहाद्रुमान् ।
उन्मूलयति निर्मूलं, परिग्रहमहाबल: ॥ २०७ ॥

परिग्रहनिषण्णोऽपि, योऽपवर्गं विमार्गति ।
लोहोडुपनिविष्टोऽसौ, पारावारं तितीर्षति ॥ २०८ ॥

बाह्या: परिग्रहा: पुंसां, धर्मस्य ध्वंसहेतव: ।
तज्जन्मानोऽपि जायन्ते, समिधामिव वह्नय: ॥ २०९ ॥

बाह्यानपि हि य: सङ्गा-न्न नियन्त्रयितुं क्षम: ।
जयेत् क्लीब: कथं सोऽन्त: परिग्रहचमूममूम् ॥ २१० ॥

क्रीडोद्यानमविद्यानां, वारिधिर्व्यसनार्णसाम् ।
कन्दस्तृष्णामहावल्ले-रेक एव परिग्रह: ॥ २११ ॥

अहो आश्चर्यमुन्मुक्त-सर्वसङ्गान्मुनीनपि ।
धनार्थित्वेन शङ्कन्ते, धनरक्षापरायणा: ॥ २१२ ॥

राजतस्करदायाद-वह्नितोयादिभीरुभि: ।
धनैकतानैर्धनिभि-र्निशास्वपि न सुप्यते ॥ २१३ ॥

दुर्भिक्षे वा सुभिक्षे वा, वने जनपदेऽपि वा ।
शङ्काऽऽतङ्काकुलतया, धनी सर्वत्र दु:खित: ॥ २१४ ॥

निर्दोषा वा सदोषा वा, सुखं जीवन्ति निर्धना: ।
बाध्यन्ते धनिनो लोके, दोषैरुत्पादितैरपि ॥ २१५ ॥

अर्जने रक्षणे नाशे, व्यये सर्वत्र दु:खदम् ।
धत्ते कर्णगृहीताच्छ-भल्ललीलां धनं नृणाम् ॥ २१६ ॥

धिग्धनं धनवन्तो य-देकामिषजिघृक्षुभि: ।
स्वजनैरपि बाध्यन्ते, शुनका: शुनकैरिव ॥ २१७ ॥

इत्थमर्थं लभेयाहं, रक्षेयं वर्द्धयेय च ।
कृतान्तदन्तयन्त्रस्थो-ऽपीत्याशां न त्यजेद् धनी ॥ २१८ ॥

पिशाचीव धनाशेयं, यावदुच्छ्रुङ्खला भवेत् ।
तावत् प्रदर्शयेन्नृणां, नानारूपां विडम्बनाम् // २१९ //

यदीच्छसि सुखं धर्मं, मुक्तिसाम्राज्यमेव च ।
तदा परपरीहारा-देकामाशां वशीकुरु // २२० //

स्वर्गापवर्गनगर-प्रवेशप्रतिरोधिनी ।
अभेद्या वज्रधाराभि-राशैव हि महार्गला // २२१ //

आशैव राक्षसी पुंसामाशैव विषमञ्जरी ।
आशैव जीर्णमदिरा, धिगाशा सर्वदोषभूः // २२२ //

ते धन्याः पुण्यभाजस्ते, तैस्तीर्णः क्लेशसागरः ।
जगत्संमोहजननी, यैराशाऽऽशीविषी जिता // २२३ //

पापवल्लीं दुःखखानिं, सुखाग्निं दोषमातरम् ।
आशां निराशीकुरुते, यस्तिष्ठति सुखेन सः // २२४ //

आशादवाग्नेर्महिमा, कोऽपि लोकपथातिगः ।
धर्ममेघं समाधिं यो, विध्यापयति तत्क्षणात् // २२५ //

दीनं जल्पन्ति गायन्ति, नृत्यन्त्यभिनयन्ति च ।
आशापिशाचीविवशाः, पुमांसो धनिनां पुरः // २२६ //

न यान्ति वायवो यत्र, नाप्यर्केन्दुमरीचयः ।
आशामहोर्मयः पुंसां, तत्र यान्ति निरर्गलाः // २२७ //

येनाशायै ददे स्वाम्यं, तेनात्तं दास्यमात्मनः ।
आशा दासी कृता येन, तस्य स्वाम्यं जगत्त्रये // २२८ //

नाशा नैसर्गिकी पुंसि, या जीर्यति न जीर्यति ।
उत्पात एव कोऽप्येषा, तस्यां सत्यां कुतः सुखम् // २२९ //

वलयो वलयाः पुसां, पलितानि स्रजः कृताः ।
किमन्यन्मण्डनं कृत्वा, कृतार्थाऽऽशा भविष्यति // २३० //

प्राप्तेभ्योऽप्यतिरिच्यन्ते, तेऽर्थास्त्यक्ता य आशया ।
क्रोडीकरोति यानाशा, ते तु स्वप्नेऽपि दुर्लभाः ॥ २३१ ॥

यानर्थान् बहुभिर्यत्नै-रिच्छेत्साधयितुं नरः ।
अयत्नसिद्धा एवैते, कृते ह्याशानिमीलने ॥ २३२ ॥

पुण्योदयोऽस्ति चेत् पुंसां, व्यर्थैवाशापिशाचिका ।
अथ पुण्योदयो नास्ति, व्यर्थैवाशापिशाचिका ॥ २३३ ॥

अधीती पण्डितः प्राज्ञः, पापभीरुस्तपोधनः ।
स एव येन हित्वाऽऽशां, नैराश्यमुरीकृतम् ॥ २३४ ॥

सुखं सन्तोषपीयूष-जुषां यत् स्ववशात्मनाम् ।
तत्पराधीनवृत्तीना-मसन्तोषवतां कुतः ॥ २३५ ॥

सन्तोषवर्मणि व्यर्था आशानाराचपङ्क्तयः ।
ताः कथं प्रतिरोद्धव्या इति मा स्माकुलो भव ॥ २३६ ॥

वाक्येनैकेन तद्वच्मि, यद्वाच्यं वाक्यकोटिभिः ।
आशापिशाची शान्ता च, प्राप्तं च परमं पदम् ॥ २३७ ॥

तत्सन्त्यजाऽऽशावैवश्यं, मितीकृतपरिग्रहः ।
भजस्व द्रव्यसाधुत्वं, यतिधर्मानुरक्तधीः ॥ २३८ ॥

मिथ्यादृग्भ्यो विशिष्यन्ते, सम्यग्दर्शनिनो जनाः ।
तेभ्योऽपि देशविरता-मितारम्भपरिग्रहाः ॥ २३९ ॥

यामन्यतीर्थिका यान्ति, गतिं तीव्रतपोजुषः ।
उपासकाः सोमिलवत् तां विराद्धव्रता अपि ॥ २४० ॥

मासे मासे हि ये बालाः, कुशाग्रेणैव भुञ्जते ।
सन्तुष्टोपासकानां ते, कलां नार्हन्ति षोडशीम् ॥ २४१ ॥

अप्यद्भुततपोनिष्ठ-स्तामलिः पूरणोऽपि वा ।
सुश्रावकोचितगते-रतिहीनां गतिं ययौ ॥ २४३ ॥

*आशापिशाचविवशं कुरु मा स्म चेतः,*
*सन्तोषमुद्वह परिग्रहनिग्रहेण ।*
*श्रद्धां विधेहि यतिधर्मधुरीणताया-*
*मन्तर्भवाष्टकमुपैषि यथाऽपवर्गम्* *॥ २४४ ॥*

## अथ तृतीयप्रकाशः

दशस्वपि कृता दिक्षु, यत्र सीमा न लङ्घ्यते ।
ख्यातं दिग्विरतिरिति, प्रथमं तद्गुणव्रतम् ॥ १७२ ॥

चराचराणां जीवानां, विमर्दननिवर्त्तनात् ।
तप्तायोगोलकल्पस्य, सद्व्रतं गृहिणोऽप्यदः ॥ १७३ ॥

जगदाक्रममाणस्य, प्रसरल्लोभवारिधेः ।
स्खलनं विदधे तेन, येन दिग्विरतिः कृता ॥ १७४ ॥

*तदेतद्यावज्जीवं वा, सद्व्रतं गृहमेधिनाम् ।*
*चतुर्मासादिनियमा-दथवा स्वल्पकालिकम्* *॥ २४४ ॥*

*सदा सामायिकस्थानां, यतीनां तु यतात्मनाम् ।*
*न दिशि क्वचन स्यातां, विरत्यविरती इमे* *॥ २४५ ॥*

*चारणानां हि गमनं, यदूर्ध्वं मेरुमूर्द्धनि ।*
*तिर्यग्रुचकशैले च, नैषां दिग्विरतिस्ततः* *॥ २४६ ॥*

*गन्तुं सर्वासु यो दिक्षु, विदध्यादवधिं सुधीः ।*
*स्वर्गादौ निरवधयो-जायन्ते तस्य सम्पदः* *॥ २४७ ॥*

भोगोपभोगयोः संख्या, शक्त्या यत्र विधीयते ।
भोगोपभोगमानं तद्, द्वैतीयीकं गुणव्रतम् ॥ १७५ ॥

सकृदेव भुज्यते यः, स भोगोऽन्नस्त्रगादिकः ।
पुनः पुनः पुनर्भोग्य उपभोगोऽङ्गनादिकः ॥ १७६ ॥

मद्यं मांसं नवनीतं, मधूदुम्बरपञ्चकम् ।
अनन्तकायमज्ञात-फलं रात्रौ च भोजनम् ॥ १७७ ॥

आमगोरससंपृक्तं द्विदलं पुष्पितौदनम् ।
दध्यहर्द्वितयातीतं, कुथितान्नं च वर्जयेत् ॥ १७८ ॥

मदिरापानमात्रेण, बुद्धिर्नश्यति दूरतः ।
वैदग्धीबन्धुरस्यापि, दौर्भाग्येणेव कामिनी ॥ १७९ ॥

पापाः कादम्बरीपान-विवशीकृतचेतसः ।
जननीं हा प्रियीयन्ति, जननीयन्ति च प्रियाम् ॥ १८० ॥

न जानाति परं स्वं वा, मद्याच्चलितचेतनः ।
स्वामीयति वराकः स्वं, स्वामिनं किङ्करीयति ॥ १८१ ॥

मद्यपस्य शबस्येव, लुठितस्य चतुष्पथे ।
मूत्रयन्ति मुखे श्वानो, व्यात्ते विवरशंङ्कया ॥ १८२ ॥

मद्यपानरसे मग्नो, नग्नः स्वपिति चत्वरे ।
गूढं च स्वमभिप्रायं, प्रकाशयति लीलया ॥ १८३ ॥

वारुणीपानतो यान्ति, कान्तिकीर्तिमतिश्रियः ।
विचित्राश्चित्ररचना, विलुठत्कज्जलादिव ॥ १८४ ॥

भूतात्तवन्नरीनर्त्ति, रारटीति सशोकवत् ।
दाहज्वरार्तवद्भूमौ, सुरापो लोलुठीति च ॥ १८५ ॥

विदधत्यङ्गशैथिल्यं, ग्लपयन्तीन्द्रियाणि च ।
मूर्च्छामतूच्छां यच्छन्ती, हाला हालाहलोपमा ॥ १८६ ॥

विवेकः संयमो ज्ञानं, सत्यं शौचं दया क्षमा ।
मद्यात्प्रलीयते सर्वं, तृण्या वह्निकणादिव ॥ १८७ ॥

दोषाणां कारणं मद्यं, मद्यं कारणमापदाम् ।
रोगातुर इवापथ्यं, तस्मान् मद्यं विवर्जयेत् ॥ १८८ ॥

रसोद्भवाश्च भूयांसो, भवन्ति किल जन्तवः ।
तस्मान्मद्यं न पातव्यं, हिंसापातकभीरुणा // २४८ //

दत्तं न दत्तमात्तं-च, नात्तं कृतं च नो कृतम् ।
मृषोद्यराज्यादिव हा, स्वैरं वदति मद्यपः // २४९ //

गृहे बहिर्वा मार्गे वा, परद्रव्याणि मूढधीः ।
वधबन्धादिनिर्भीको, गृह्णात्याच्छिद्य मद्यपः // २५० //

बालिकां युवतीं वृद्धां, ब्राह्मणीं श्वपचीमपि ।
भुङ्क्ते परस्त्रियं सद्यो, मद्योन्मादकदर्थितः // २५१ //

रटन् गायन् लुठन् धावन्, कुप्यंस्तुष्यन् रुदन् हसन् ।
स्तभ्नन्नमन् भ्रमंस्तिष्ठन्, सुरापः पापराट् नटः // २५२ //

श्रूयते किल शाम्बेन, मद्यादन्धम्भविष्णुना ।
हतं वृष्णिकुलं सर्वं, प्लोषिता च पुरी पितुः // २५३ //

पिबन्नपि मुहुर्मद्यं, मद्यपो नैव तृप्यति ।
जन्तुजातं कवलयन्, कृतान्त इव सर्वदा // २५४ //

लौकिका अपि मद्यस्य, बहुदोषत्वमास्थिताः ।
यत्तस्य परिहार्यत्वमेवं पौराणिका जगुः // २५५ //

कश्चिदृषिस्तपस्तेपे, भीत इन्द्रः सुरस्त्रियः
क्षोभाय प्रेषयामास, तस्यागत्य च तास्तकम् // २५६ //

विनयेन समाराध्य, वरदाभिमुखं स्थितम् ।
जगुर्मद्यं तथा मांसं, सेवस्वाब्रह्म चेच्छया // २५७ //

स एवं गदितस्ताभिर्द्वयोर्नरकहेतुताम् ।
आलोच्य मद्यरूपं च, शुद्धकारणपूर्वकम् // २५८ //

मद्यं प्रपद्य तद्भोगान्, नष्टधर्मस्थितिर्मदात् ।
विदंशार्थमजं हत्वा, सर्वमेव चकार सः // २५९ //

*अवद्यमूलं नरकस्य पद्धतिं, सर्वापदां स्थानमकीर्तिकारणम् ।*
*अभव्यसेव्यं गुणिभिर्विगर्हितं, विवर्जयेन्मद्यमुपासक सदा ॥ २६० ॥*

चिखादिषति यो मांसं, प्राणिप्राणापहारतः ।
उन्मूलयत्यसौ मूलं, दयाऽऽख्यं धर्मशाखिनः ॥ १८९ ॥

अशनीयन् सदा मांसं, दयां यो हि चिकीर्षति ।
ज्वलति ज्वलने वल्लीं, स रोपयितुमिच्छति ॥ १९० ॥

हन्ता पलस्य विक्रेता, संस्कर्त्ता भक्षकस्तथा ।
क्रेताऽनुमन्ता दाता च, घातका एव यन्मनुः ॥ १९१ ॥

अनुमन्ता विशसिता, निहन्ता क्रयविक्रयी ।
संस्कर्त्ता चोपहर्त्ता च, खादकश्चेति घातकाः ॥ १९२ ॥

नाकृत्वा प्राणिनां हिंसां, मांसमुत्पद्यते क्वचित् ।
न च प्राणिवधः स्वर्ग्य-स्तस्मान्मांसं विवर्जयेत् ॥ १९३ ॥

ये भक्षयन्त्यन्यपलं, स्वकीयपलपुष्टये ।
त एव घातका यन्न, वधको भक्षकं विना ॥ १९४ ॥

मिष्टान्नान्यपि विष्टासा-दमृतान्यपि मूत्रसात् ।
स्युर्यस्मिन्नङ्गकस्यास्य, कृते कः पापमाचरेत् ? ॥ १९५ ॥

मांसाशने न दोषोऽस्ती-त्युच्यते यैर्दुरात्मभिः ।
व्याधगृध्रवृकव्याघ्र-शृगालास्तैर्गुरुकृताः ॥ १९६ ॥

मां स भक्षयिताऽमुत्र, यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वे, निरुक्तं मनुरब्रवीत् ॥ १९७ ॥

मांसास्वादनलुब्धस्य, देहिनं देहिनं प्रति ।
हन्तुं प्रवर्त्तते बुद्धिः, शाकिन्या इव दुर्धियः ॥ १९८ ॥

ये भक्षयन्ति पिशितं, दिव्यभोज्येषु सत्स्वपि ।
सुधारसं परित्यज्य, भुञ्जते ते हलाहलम् ॥ १९९ ॥

न धर्मो निर्दयस्यास्ति, पलादस्य कुतो दया ।
पललुब्धो न तद्वेत्ति, विद्याद्वोपदिशेन्नहि || २०० ||

केचिन्मांसं महामोह्रा-दश्नन्ति न परं स्वयम् ।
देवपित्रतिथिभ्योऽपि, कल्पयन्ति यदूचिरे || २०१ ||

क्रीत्वा स्वयं वाऽप्युत्पाद्य, परोपहृतमेव वा ।
देवान् पितृन् समभ्यर्च्य, स्वादन् मांसं न दुष्यति || २०२ ||

मन्त्रसंस्कृतमप्यद्या-द्यवाल्पमपि नो पलम् ।
भवेज्जीवितनाशाय, हालाहललवोऽपि हि || २०३ ||

सद्यः संमूर्च्छितानन्त-जन्तुसन्तानदूषितम् ।
नरकाध्वनि पाथेयं, कोऽश्नीयात्पिशितं सुधीः ? || २०४ ||

*मांसलुब्धैरमर्यादै-र्नास्तिकैः स्तोकदर्शिभिः ।*
*कुशास्त्रकारैर्वैयात्याद् गदितं मांसभक्षणम्* *|| २६१ ||*

*नान्यस्ततो गतघृणोनरकार्चिष्मदिन्धनम् ।*
*स्वमांसं परमांसेन, यः पोषयितुमिच्छति* *|| २६२ ||*

*स्वाङ्गं पुष्णन्नगूथेन, वरं हि गृहशूकरः ।*
*प्राणिघातोद्भवैर्मांसैर्न पुनर्निर्घृणो नरः* *|| २६३ ||*

*निःशेषजन्तुमांसानि, भक्ष्याणीति य ऊचिरे ।*
*नृमांसं वर्जितं शङ्के, स्ववधाशङ्कयैव तैः* *|| २६४ ||*

*विशेषं यो न मन्येत, नृमांसपशुमांसयोः ।*
*धार्मिकस्तु ततो नान्यः, पापीयानपि नापरः* *|| २६५ ||*

*शुक्रशोणितसम्भूतं, विष्टारसविवर्द्धितम् ।*
*लोहितं स्त्यानतामास्तं, कोऽश्नीयादकृमिः पलम् ?* *|| २६६ ||*

*अहो द्विजातयो धर्मं, शौचमूलं वदन्ति च ।*
*सप्तधातुकदेहोत्थं, मांसमश्नन्ति चाधमाः* *|| २६७ ||*

*येषां तु तुल्ये मांसान्ने, सतृणाभ्यवहारिणाम् ।*
*विषामृते समे तेषां, मृत्युजीवितदायिनी* ॥ २६८ ॥

*भक्षणीयं सतां मांसं, प्राण्यङ्गत्वेन हेतुना ।*
*ओदनादिवदित्येवं, ये चानुमिमते जडाः* ॥ २६९ ॥

*गोसम्भवत्वात्ते मूत्रं, पयोवन्न पिबन्ति किम् ? ।*
*प्राण्यङ्गतानिमित्ता च, नौदनादिषु भक्ष्यता* ॥ २७० ॥

*शङ्खादि शुचि नास्थ्यादि, प्राण्यङ्गत्वे समे यथा ।*
*ओदनादि तथा भक्ष्य-मभक्ष्यं पिशितादिकम्* ॥ २७१ ॥

*यस्तु प्राण्यङ्गमात्रत्वात्, प्राह मांसौदने समे ।*
*स्त्रीत्वमात्रान्मातृपत्न्योः, स किं साम्यं न कल्पयेत् ?* ॥ २७२ ॥

*पञ्चेन्द्रियस्यैकस्यापि, वधे तन्मांसभक्षणात् ।*
*यथा हि नरकप्राप्ति-र्न तथा धान्यभोजनात्* ॥ २७३ ॥

*न हि धान्यं भवेन्मांसं, रसरक्तविकारजम् ।*
*अमांसभोजितस्तस्मा-न्न पापा धान्यभोजिनः* ॥ २७४ ॥

*धान्यपाके प्राणिवधः परमेकोऽवशिष्यते ।*
*गृहिणां देशयमिनां, स तु नात्यन्तबाधकः* ॥ २७५ ॥

*मांसखादकगतिं विमृशन्तः, सस्यभोजनरता इह सन्तः ।*
*प्राप्नुवन्ति सुर सम्पदमुच्चै-र्जैनशासनजुषो गृहिणोऽपि* ॥ २७६ ॥

अन्तर्मुहूर्त्तात्परतः, सुसूक्ष्मा जन्तुराशयः ।
यत्र मूर्च्छन्ति तन्नाद्यं, नवनीतं विवेकिभिः ॥ २०५ ॥

एकस्यापि हि जीवस्य, हिंसने किमघं भवेत् ।
जन्तुजातमयं तत्को, नवनीतं निषेवते ? ॥ २०६ ॥

अनेकजन्तुसङ्घात-निघातनसमुद्भवम् ।
जुगुप्सनीयं लालावत्, कः स्वादयति माक्षिकम् ? ॥ २०७ ॥

भक्षयन्माक्षिकं क्षुद्र-जन्तुलक्षक्षयोद्भवम् ।
स्तोकजन्तुनिहन्तृभ्यः, सौनिकेभ्योऽतिरिच्यते ॥ २०८ ॥

एकैककुसुमक्रोडा-द्रसमापीय मक्षिकाः ।
यद्वमन्ति मधूच्छिष्टं, तदश्नन्ति न धार्मिकाः ॥ २०९ ॥

अप्यौषधकृते जग्धं, मधु श्वभ्रनिबन्धनम् ।
भक्षितः प्राणनाशाय, कालकूटकणोऽपि हि ॥ २१० ॥

मधुनोऽपि हि माधुर्य-मबोधैरहहोच्यते ।
आसाद्यन्ते यदास्वादा-च्चिरं नरकवेदनाः ॥ २११ ॥

मक्षिकामुखनिष्ठ्यूतं, जन्तुघातोद्भवं मधु ।
अहो पवित्रं मन्वाना, देवस्नाने प्रयुञ्जते ॥ २१२ ॥

उदुम्बवटप्लक्ष-काकोदुम्बरशाखिनाम् ।
पिप्पलस्य च नाश्नीयात्, फलं कृमिकुलाकुलम् ॥ २१३ ॥

अप्राप्नुवन्नन्यभक्ष्य-मपि क्षामो बुभुक्षया ।
न भक्षयति पुण्यात्मा, पञ्चोदुम्बरजं फलम् ॥ २१४ ॥

आर्द्रः कन्दः समग्रोऽपि, सर्वः किशलयोऽपि च ।
स्नुही लवणवृक्षत्वक्, कुमारी गिरिकर्णिका ॥ २१५ ॥

शतावरी विरूढानि, गुडूची कोमलाम्लिका ।
पल्यङ्कोऽमृतवल्ली च, वल्लः शूकरसंज्ञितः ॥ २१६ ॥

अनन्तकायाः सूत्रोक्ता-अपरेऽपि कृपापरैः ।
मिथ्यादृशामविज्ञाता, वर्जनीयाः प्रयत्नतः ॥ २१७ ॥

स्वयं परेण वा ज्ञातं, फलमद्याद्विशारदः ।
निषिद्धे विषफले वा, मा भूदस्य प्रवर्तनम् ॥ २१८ ॥

अन्नं प्रेतपिशाचाद्यैः, सञ्चरद्भिर्निरङ्कुशैः ।
उच्छिष्टं क्रियते यत्र, तत्र नाद्याद् दिनात्यये ॥ २१९ ॥

घोरान्धकाररुद्धाक्षैः, पतन्तो यत्र जन्तवः ।
नैव भोज्ये निरीक्ष्यन्ते, तत्र भुञ्जीत को निशि ? ॥ २२० ॥

मेधां पिपीलिका हन्तिं, यूका कुर्याज्जलोदरम् ।
कुरुते मक्षिका वान्तिं, कुष्ठरोगं च कोलिकः ॥ २२१ ॥

कण्टको दारुखण्डं च, वितनोति गलव्यथाम् ।
व्यञ्जनान्तर्निपतित-स्तालु विध्यति वृश्चिकः ॥ २२२ ॥

विलग्नश्च गले वालः, स्वरभङ्गाय जायते ।
इत्यादयो दृष्टदोषाः, सर्वेषां निशि भोजने ॥ २२३ ॥

नाप्रेक्ष्य सूक्ष्मजन्तूनि, निश्यद्यात्प्रासुकान्यपि ।
अप्युद्यत्केवलज्ञानै-र्नादृतं यन्निशाऽशनम् ॥ २२४ ॥

धर्मविन्नैव भुञ्जीत, कदाचन दिनात्यये ।
बाह्या अपि निशाभोज्यं, यदभोज्यं प्रचक्षते ॥ २२५ ॥

त्रयीतेजोमयो भानु-रिति वेदविदो विदुः ।
तत्करैः पूतमखिलं, शुभं कर्म समाचरेत् ॥ २२६ ॥

नैवाहुतिर्न च स्नानं, न श्राद्धं देवतार्चनम् ।
दानं वा विहितं रात्रौ, भोजनं तु विशेषतः ॥ २२७ ॥

दिवसस्याष्टमे भागे, मन्दीभूते दिवाकरे ।
नक्तं तद्धि विजानीया-न्न नक्तं निशि भोजनम् ॥ २२८ ॥

देवैस्तु भुक्तं पूर्वाह्णे, मध्याह्ने ऋषिभिस्तथा ।
अपराह्णे च पितृभिः, सायाह्ने दैत्यदानवैः ॥ २२९ ॥

सन्ध्यायां यक्षरक्षोभिः, सदा भुक्तं कुलोद्वह ! ।
सर्ववेलां व्यतिक्रम्य, रात्रौ भुक्तमभोजनम् ॥ २३० ॥

हन्नाभिपद्मसङ्कोच-श्चण्डरोचिरपायतः ।
अतो नक्तं न भोक्तव्यं, सूक्ष्मजीवादनादपि ॥ २३१ ॥

संसजज्जीवसङ्घातं, भुञ्जाना निशि भोजनम् ।
राक्षसेभ्यो विशिष्यन्ते, मूढात्मानः कथं नु ते ॥ २३२ ॥

वासरे च रजन्यां च, यः खादन्नेव तिष्ठति ।
शृङ्गपुच्छपरिभ्रष्टः, स्पष्टं स पशुरेव हि ॥ २३३ ॥

अह्नो मुखेऽवसाने च, यो द्वे द्वे घटिके त्यजन् ।
निशाभोजनदोषज्ञो-ऽश्नात्यसौ पुण्यभाजनम् ॥ २३४ ॥

अकृत्वा नियमं दोषा-भोजनाद्दिनभोज्यपि ।
फलं भजेन्न निर्व्याजं, न वृद्धिर्भाषितं विना ॥ २३५ ॥

ये वासरं परित्यज्य, रजन्यामेव भुञ्जते ।
ते परित्यज्य माणिक्यं, काचमाददते जडाः ॥ २३६ ॥

वासरे सति ये श्रेयस्काम्यया निशि भुञ्जते ।
ते वपन्त्यूषरक्षेत्रे, शालीन् सत्यपि पल्वले ॥ २३७ ॥

उलूककाकमार्जार-गृध्रशम्बर शूकराः ।
अहिवृश्चिकगोधाश्च, जायन्ते रात्रिभोजनात् ॥ २३८ ॥

श्रूयते ह्यन्यशपथाननादृत्यैव लक्ष्मणः ।
निशाभोजनशपथं, कारितो वनमालया ॥ २३९ ॥

करोति विरतिं धन्यो, यः सदा निशि भोजनात् ।
सोऽर्द्धं पुरुषायुषस्य, स्यादवश्यमुपोषितः ॥ २४० ॥

रजनीभोजनत्यागे, ये गुणाः परितोऽपि तान् ।
न सर्वज्ञादृते कश्चि-दपरो वक्तुमीश्वरः ॥ २४१ ॥

आमगोरससंपृक्त-द्विदलादिषु जन्तवः ।
दृष्टाः केवलिभिः सूक्ष्मा-स्तस्मात्तानि विवर्जयेत् ॥ २४२ ॥

जन्तुमिश्रं फलं पुष्पं, पत्रं चान्यदपि त्यजेत् ।
सन्धानमपि संसक्तं, जिनधर्मपरायणः ॥ २४३ ॥

आर्तं रौद्रमपध्यानं, पापकर्मोपदेशिता ।
हिंसोपकारिदानं च, प्रमादाचरणं तथा ॥ २४४ ॥

शरीराद्यर्थदण्डस्य, प्रतिपक्षतया स्थितः ।
योऽनर्थदण्डस्तत्त्याग-स्तृतीयं तु गुणव्रतम् ॥ २४५ ॥

वैरिघातो नरेन्द्रत्वं, पुरघाताग्निदीपने ।
खेचरत्वाद्यपध्यानं, मुहूर्तात्परतस्त्यजेत् ॥ २४६ ॥

वृषभान् दमय क्षेत्रं, कृष षण्ढय वाजिनः ।
दाक्षिण्याविषये पापो-पदेशोऽयं न कल्पते ॥ २४७ ॥

यन्त्रलाङ्गलशस्त्राग्नि-मुशलोदूखलादिकम् ।
दाक्षिण्याविषये हिंस्रं, नार्पयेत्करुणापरः ॥ २४८ ॥

कुतूहलाद्गीतनृत्त-नाटकादिनिरीक्षणम् ।
कामशास्त्रप्रसक्तिश्च, द्यूतमद्यादिसेवनम् ॥ २४९ ॥

जलक्रीडाऽऽन्दोलनादि-विनोदो जन्तुयोधनम् ।
रिपोः सुतादिना वैरं, भक्तस्त्रीदेशराट्कथाः ॥ २५० ॥

रोगमार्गश्रमौ मुक्त्वा, स्वापश्च सकलां निशाम् ।
एवमादि परिहरेत्, प्रमादाचरणं सुधीः ॥ २५१ ॥

विलासहासनिष्ठ्यूत-निद्राकलहदुष्कथाः ।
जिनेन्द्रभवनस्यान्त-राहारं च चतुर्विधम् ॥ २५२ ॥

त्यक्तार्त्तरौद्रध्यानस्य, त्यक्तसावद्यकर्मणः ।
मुहूर्तं समता या तां, विदुः सामायिकव्रतम् ॥ २५३ ॥

सामायिकव्रतस्थस्य, गृहिणोऽपि स्थिरात्मनः ।
चन्द्रावतंसकस्येव, क्षीयते कर्म सञ्चितम् ॥ २५४ ॥

दिग्व्रते परिमाणं यत्, तस्य संक्षेपणं पुनः ।
दिने रात्रौ च देशाव-काशिकव्रतमुच्यते ॥ २५५ ॥

चतुष्पर्व्यां चतुर्थादि-कुव्यापारनिषेधनम् ।
ब्रह्मचर्यक्रियास्नाना-दित्यागः पोषधव्रतम् ॥ २५६ ॥

गृहिणोऽपि हिं धन्यास्ते, पुण्यं ये पोषधव्रतम् ।
दुष्पालं पालयन्त्येव, यथा स चुलनीपिता ॥ २५७ ॥

दानं चतुर्विधाहार-पात्राच्छादनसद्मनाम् ।
अतिथिभ्योऽतिथिसंवि-भागव्रतमुदीरितम् ॥ २५८ ॥

*अन्नादीनामिदं दान-मुक्तं धर्मोपकारिणाम् ।*
*धर्मोपकारबाह्यानां, स्वर्णादीनां न तन्मतम् ॥ २७७ ॥*

*दत्तेन येन दीप्यन्ते, क्रोधलोभस्मरादयः ।*
*न तत् स्वर्णं चरित्रिभ्यो, दद्याच्चारित्रनाशनम् ॥ २७८ ॥*

*यस्यां विदार्यमाणायां, म्रियन्ते जन्तुराशयः ।*
*क्षितेस्तस्याः प्रशंसन्ति, न दानं करुणापराः ॥ २७९ ॥*

*यद्यच्छस्त्रं महाहिंस्त्रं, तत्तद्येन विधीयते ।*
*तदहिंस्त्रमना लोहं, कथं दद्याद्विचक्षणः ? ॥ २८० ॥*

*संमूर्च्छन्ति सदा यत्र, भूयांसस्त्रसजन्तवः ।*
*तेषां तिलानां को दानं, मनागप्यनुमन्यते ? ॥ २८१ ॥*

*दद्यादर्द्धप्रसूतां गां, यो हिं पुण्याय पर्वणि ।*
*म्रियमाणामिव हहा ! वर्ण्यते सोऽपि धार्मिकः ॥ २८२ ॥*

*यस्या अपाने तीर्थानि, मुखेनाश्नाति याऽशुचिम् ।*
*तां मन्वानाः पवित्रां गां, धर्माय ददते जडाः ॥ २८३ ॥*

*प्रत्यहं दुह्यमानायां, यस्यां वत्सः प्रपीड्यते ।*
*खुरादिभिर्जन्तुघ्नीं तां, दद्याद् गां श्रेयसे कथम् ? ॥ २८४ ॥*

*स्वर्णमयी रूप्यमयी, तिलमय्याज्यमय्यपि ।*
*विभज्य भुज्यते धेनु-स्तद्दातुः किं फलं भवेत् ? ॥ २८५ ॥*

कामगर्द्धकरी बन्धु-स्नेहद्रुमदवानलः ।
कलेः कलितरुर्दुर्ग-दुर्गतिद्वारकुञ्चिका ॥ २८६ ॥

मोक्षद्वारार्गला धर्म-धनचौरी विपत्करी ।
या कन्या दीयते साऽपि, श्रेयसे कोऽयमागमः ? ॥ २८७ ॥

विवाहसमये मूढैर्धर्मबुद्ध्या विधीयते ।
यत्तु यौतकदानं तत् स्याद्भस्मनि हुतोपमम् ॥ २८८ ॥

यत् संक्रान्तौ व्यतीपाते, वैधृते पर्वणोरपि ।
दानं प्रवर्त्तितं लुब्धै-र्मुग्धसंमोहनं हि तत् ॥ २८९ ॥

मृतस्य तृप्त्यै ये दानं, तन्वन्ति तनुबुद्धयः ।
ते हि सिञ्चन्ति मुशलं, सलिलैः पल्लवेच्छया ॥ २९० ॥

विप्रेभ्यो भोजने दत्ते, प्रीयन्ते पितरो यदि ।
एकस्मिन् भुक्तवत्यन्यः, पुष्टः किं न भवेदिह ? ॥ २९१ ॥

अपत्यदत्तं चेद्दानं, पितृणां पापमुक्तये ।
पुत्रेण तप्ते तपसि, तदा मुक्तिं पिताऽऽप्नुयात् ॥ २९२ ॥

गङ्गागयादौ दानेन, तरन्ति पितरो यदि ।
तत्रोक्ष्यन्तां प्ररोहाय, गृहे दग्धा द्रुमास्तदा ॥ २९३ ॥

गतानुगतिकैः क्लृप्तं, न दद्यादुपयाचितम् ।
फलन्ति हन्त ! पुण्यानि, पुण्याभावे मुधैव तत् ॥ २९४ ॥

न कोऽपि शक्यते त्रातुं, पूर्णे काले सुरैरपि ।
दत्तोपयाचितैस्तेषां, बिम्बैस्त्राणं महाद्भुतम् ॥ २९५ ॥

महोक्षं वा महाजं वा, श्रोत्रियायोपकल्पयन् ।
दाताऽऽत्मानं च पात्रं च , पातयेन्नरकावटे ॥ २९६ ॥

ददद्धर्मधिया दाता, न तथाऽघेन लिप्यते ।
जानन्नपि यथा दोषं, ग्रहीता मांसलोलुपः ॥ २९७ ॥

अपात्रप्राणिनो हत्वा(ऽ)पात्रं पुष्णन्ति ये पुनः ।
अनेकभेकघातेन ते, प्रीणन्ति भुजङ्गमम् ॥ २९८ ॥

न स्वर्णादीनि दानानि, देयानीत्यर्हतां मतम् ।
अन्नादीन्यपि पात्रेभ्यो दातव्यानि विपश्चिता ॥ २९९ ॥

ज्ञानदर्शनचारित्र-रूपरत्नत्रयान्विताः ।
समितीः पञ्च बिभ्राणा गुप्तित्रितयशालिनः ॥ ३०० ॥

महाव्रतमहाभार-धरणैकधुरन्धराः ।
परीषहोपसर्गारि-चमूजयमहाभटाः ॥ ३०१ ॥

निर्ममत्वाः शरीरेऽपि, किमुतान्येषु वस्तुषु ? ।
धर्मोपकरणं मुक्त्वा, परित्यक्तपरिग्रहाः ॥ ३०२ ॥

द्विचत्वारिंशता दोषैरदुष्टं भैक्षमात्रकम् ।
आददाना वपुर्धर्म-यात्रामात्रप्रवृत्तये ॥ ३०३ ॥

नवगुप्तिसनाथेन, ब्रह्मचर्येण भूषिताः ।
दन्तशोधनमात्रेऽपि, परस्वे विगतस्पृहाः ॥ ३०४ ॥

मानापमानयोर्लाभा-लाभयोः सुखदुःखयोः ।
प्रशंसानिन्दयोर्हर्ष-शोकयोस्तुल्यवृत्तयः ॥ ३०५ ॥

कृतकारितानुमति-प्रभेदारंम्भवर्जिताः ।
मोक्षैकतानमनसो, यतयः पात्रमुत्तमम् ॥ ३०६ ॥

सम्यग्दर्शनवन्तस्तु, देशचारित्रयोगिनः ।
यतिधर्मेच्छवः पात्रं, मध्यमं गृहमेधिनः ॥ ३०७ ॥

सम्यक्त्वमात्रसन्तुष्टा-व्रतशीलेषु निःसहाः ।
तीर्थप्रभावनोद्युक्ता-जघन्यं पात्रमुच्यते ॥ ३०८ ॥

कुशास्त्रश्रवणोत्पन्न-वैराग्या निष्परिग्रहाः ।
ब्रह्मचर्यरताः स्तेय-मृषाहिंसापराङ्मुखाः ॥ ३०९ ॥

घोरव्रता मौनजुषः, कन्दमूलफलाशिनः ।
शिलोञ्छवृत्तयः पत्र-भोजिनो भैक्षजीविनः ॥ ३१० ॥

कषायवस्त्रा निर्वस्त्राः, शिखामौण्ड्यजटाधराः ।
एकदण्डास्त्रिदण्डा वा, गृहारण्यनिवासिनः ॥ ३११ ॥

पञ्चाग्निसाधका ग्रीष्मे, गलन्तीधारिणो हिमे ।
भस्माङ्गरागाः खट्वाङ्ग-कपालास्थिविभूषणाः ॥ ३१२ ॥

स्वबुद्ध्या धर्मवन्तोऽपि, मिथ्यादर्शनदूषिताः ।
जिनधर्मद्विषो मूढाः, कुपात्रं स्युः कुतीर्थिनः ॥ ३१३ ॥

प्राणीप्राणापहरणा-मृषावादपरायणाः ।
परस्वहरणोद्युक्ताः, प्रकामं कामगर्दभाः ॥ ३१४ ॥

परिग्रहारम्भरता न सन्तुष्टाः कदाचन ।
मांसाशिनो मद्यरताः, कोपनाः कलहप्रियाः ॥ ३१५ ॥

कुशास्त्रमात्रपाठेन, सदा पण्डितमानिनः ।
तत्त्वतो नास्तिकप्राया-अपात्रमिति शंसिताः ॥ ३१६ ॥

इत्यपात्रं कुपात्रं च, परिहृत्य विवेकिनः ।
पात्रदानं प्रवर्त्तन्ते, सुधियो मोक्षकाङ्क्षिणः ॥ ३१७ ॥

दानं स्यात्सफलं पात्रे, कुपात्रापात्रयोरपि ।
पात्रे धर्माय तच्च स्या-दधर्माय तदन्ययोः ॥ ३१८ ॥

पयःपानं पन्नगानां, यथा विषविवृद्धये ।
कुपात्रापात्रयोर्दानं, तद्वद्भवविवृद्धये ॥ ३१९ ॥

स्वादु क्षीरं यथा क्षिप्तं, कट्वलाबुनि दुष्यति ।
दानं दत्तं शुद्धमपि, कुपात्रापात्रयोस्तथा ॥ ३२० ॥

दत्ता कुपात्रापात्राभ्यां, सर्वोर्व्यपि फलाय न ।
पात्राय दत्तो ग्रासोऽपि, श्रद्धया स्यान्महाफलः ॥ ३२१ ॥

*इयं मोक्षफले दाने, पात्रापात्रविचारणा ।*
*दयादानं तु तत्त्वज्ञैः, कुत्रापि न निषिध्यते* *॥ ३२२ ॥*

*शुद्ध्यशुद्धिकृता भङ्गा-श्चत्वारः पात्रदानयोः ।*
*आद्यः शुद्धो द्वितीयस्तु, पाक्षिकोऽन्यौ तु निष्फलौ* *॥ ३२३ ॥*

*दानेन भोगानाप्नोती-त्यविमृश्यैव भाष्यते ।*
*अनर्घ्यपात्रदानस्य क्षुद्रा भोगाः कियत्फलम् ?* *॥ ३२४ ॥*

*पात्रदाने फलं मुख्यं, मोक्षः सस्यं कृषेरिव ।*
*पलालमिव भोगास्तु, फलं स्यादानुषङ्गिकम्* *॥ ३२५ ॥*

*जिनानां दानदातारः, प्रथमे मोक्षगामिनः ।*
*धनादयो दानधर्मा-द्बोधिबीजमुपार्जयन्* *॥ ३२६ ॥*

*जिनानां पारणे भिक्षा-दातॄणां मन्दिराजिरे ।*
*सुगन्ध्युदक-पुष्पस्रग्-रत्नवृष्टिं व्यधुः सुराः* *॥ ३२७ ॥*

*इत्यतिथिसंविभाग-व्रतमेतदुदीरितं प्रपञ्चेन ।*
*देयादेये पात्रा-पात्रे ज्ञात्वा यथोचितं कुर्यात्* *॥ ३२८ ॥*

पश्य संगमको नाम, सम्पदं वत्सपालकः ।
चमत्कारकरीं प्राप, मुनिदानप्रभावतः ॥ २५९ ॥

व्रतानि सातिचाराणिं, सुकृताय भवन्ति न ।
अतिचारास्ततो हेयाः, पञ्च पञ्च व्रते व्रते ॥ २६० ॥

क्रोधाद्बन्धश्छविच्छेदो-ऽधिकभाराधिरोपणम् ।
प्रहारोऽन्नादिरोधश्चा-हिंसायां परिकीर्त्तिताः ॥ २६१ ॥

मिथ्योपदेशः सहसा-ऽभ्याख्यानं गुह्यभाषणम् ।
विश्वस्तमन्त्रभेदश्च, कूटलेखश्च सूनृते ॥ २६२ ॥

स्तेनानुज्ञा तदानीता-दानं द्विड्राज्यलङ्घनम् ।
प्रतिरूपक्रिया माना-न्यत्वं चास्तेयसंश्रिताः ॥ २६३ ॥

इत्वरात्तागमोऽनात्ता-गतिरन्यविवाहनम् ।
मदनात्याग्रहोऽनङ्ग-क्रीडा च ब्रह्मणि स्मृता: ॥ २६४ ॥

धनधान्यस्य कुप्यस्य, गवादे: क्षेत्रवास्तुन: ।
हिरण्यहेम्नश्च संख्या-ऽतिक्रमोऽत्र परिग्रहे ॥ २६५ ॥

बन्धनाद् भावतो गर्भा-द्योजनाद् दानतस्तथा ।
प्रतिपन्नव्रतस्यैष, पञ्चधाऽपि न युज्यते ॥ २६६ ॥

स्मृत्यन्तर्धानमूर्ध्वाध-स्तिर्यग्भागव्यतिक्रम: ।
क्षेत्रवृद्धिश्च पञ्चेति, स्मृता दिग्विरतिव्रते ॥ २६७ ॥

सचित्तस्तेन सम्बद्ध: सम्मिश्रोऽभिषवस्तथा ।
दुष्पक्वाहार इत्येते, भोगोपभोगमानगा: ॥ २६८ ॥

अमी भोजनतस्त्याज्या:, कर्मत: खरकर्म तु ।
तस्मिन् पञ्चदश मलान्, कर्मादानानि संत्यजेत् ॥ २६९ ॥

अङ्गार-वन-शकट-भाटक-स्फोट-जीविका: ।
दन्त-लाक्षा-रस-केश-विष-वाणिज्यकानि च ॥ २७० ॥

यन्त्रपीडा निर्लाञ्छन-मसतीपोषणं तथा ।
दवदानं सर:शोष, इति पञ्चदश त्यजेत् ॥ २७१ ॥

अङ्गारभ्राष्ट्रकरणं, कुम्भाय:स्वर्णकारिता ।
ठठारत्वेष्टकापाका-विति ह्यङ्गारजीविका ॥ २७२ ॥

छिन्नाच्छिन्नवनपत्र-प्रसूनफलविक्रय: ।
कणानां दलनात् पेषाद्, वृत्तिश्च वनजीविका ॥ २७३ ॥

शकटानां तदङ्गानां, घटनं खेटनं तथा ।
विक्रयश्चेति शकट-जीविका परिकीर्तिता ॥ २७४ ॥

शकटोक्षलुलायोष्ट्र-खराऽश्वतरवाजिनाम् ।
भारस्य वाहनाद् वृत्ति-र्भवेद्भाटकजीविका ॥ २७५ ॥

सरःकूपादिखनन-शिलाकुट्टनकर्मभिः ।
पृथिव्यारम्भसम्भूतै-र्जीवनं स्फोटजीविका ॥ २७६ ॥

दन्तकेशनखास्थित्व-ग्रोम्णो ग्रहणमाकरे ।
त्रसाङ्गस्य वणिज्यार्थं, दन्तवाणिज्यमुच्यते ॥ २७७ ॥

लाक्षामनः शिलानीली-धातकीटङ्कणादिनः ।
विक्रयः पापसदनं, लाक्षावाणिज्यमुच्यते ॥ २७८ ॥

नवनीतवसाक्षौद्र-मद्यप्रभृतिविक्रयः ।
द्विपाच्चतुष्पाद्विक्रयो, वाणिज्यं रसकेशयोः ॥ २७९ ॥

विषास्त्रहलयन्त्रायो-हरितालादिवस्तुनः ।
विक्रयो जीवितघ्नस्य, विषवाणिज्यमुच्यते ॥ २८० ॥

तिलेक्षुसर्षपैरण्ड-जलयन्त्रादिपीडनम् ।
दलतैलस्य च कृति-र्यन्त्रपीडा प्रकीर्तिता ॥ २८१ ॥

नासावेधोऽङ्कनं मुष्क-च्छेदनं पृष्ठगालनम् ।
कर्णकम्बलविच्छेदो, निर्लाञ्छनमुदीरितम् ॥ २८२ ॥

सारिकाशुकमार्जार-श्वकुर्कुटकलापिनाम् ।
पोषो दास्याश्च वित्तार्थ-मसतीपोषणं विदुः ॥ २८३ ॥

व्यसनात् पुण्यबुद्ध्या वा, दवदानं भवेद् द्विधा ।
सरःशोषः सरःसिन्धु-ह्रदादेरम्बुसंप्लवः ॥ २८४ ॥

संयुक्ताधिकरणत्व-मुपभोगातिरिक्तता ।
मौखर्य्यमथ कौत्कुच्यं, कन्दर्पोऽनर्थदण्डगाः ॥ २८५ ॥

कायवाङ्मनसां दुष्ट-प्रणिधानमनादरः ।
स्मृत्यनुपस्थापनं च, स्मृताः सामायिकव्रते ॥ २८६ ॥

प्रेष्यप्रयोगानयने, पुद्गलक्षेपणं तथा ।
शब्दरूपाऽनुपातौ च, व्रते देशावकाशिके ॥ २८७ ॥

उत्सर्गादानसंस्तारा अनवेक्ष्याप्रमृज्य च ।
अनादरः स्मृत्यनुप-स्थापनं चेति पोषधे ॥ २८८ ॥

सचित्ते क्षेपणं तेन, पिधानं काललङ्घनम् ।
मत्सरोऽन्यापदेशश्च, तुर्यशिक्षाव्रते स्मृताः ॥ २८९ ॥

एवं व्रतस्थितो भक्त्या, सप्तक्षेत्र्यां धनं वपन् ।
दयया चातिदीनेषु, महाश्रावक उच्यते ॥ २९० ॥

यः सद्बाह्यमनित्यं च, क्षेत्रेषु न धनं वपेत् ।
कथं वराकश्चारित्रं, दुश्चरं स समाचरेत् ? ॥ २९१ ॥

ब्राह्मे मुहूर्त उत्तिष्ठेत्, परमेष्ठिस्तुतिं पठन् ।
किं धर्मा किंकुलश्चाऽस्मि, किंव्रतोऽस्मीति च स्मरन् ॥ २९२ ॥

शुचिः पुष्पामिषस्तोत्रै-र्देवमभ्यर्च्य वेश्मनि ।
प्रत्याख्यानं यथाशक्ति, कृत्वा देवगृहं व्रजेत् ॥ २९३ ॥

प्रविश्य विधिना तत्र, त्रिः प्रदक्षिणयेज्जिनम् ।
पुष्पादिभिस्तमभ्यर्च्य, स्तवनैरुत्तमैः स्तुयात् ॥ २९४ ॥

ततो गुरूणामभ्यर्णे, प्रतिपत्तिपुरःसरम् ।
विदधीत विशुद्धात्मा, प्रत्याख्यानप्रकाशनम् ॥ २९५ ॥

अभ्युत्थानं तदालोके-ऽभियानं च तदागमे ।
शिरस्यञ्जलिसंश्लेषः, स्वयमासनढौकनम् ॥ २९६ ॥

आसनाभिग्रहो भक्त्या, वन्दना पर्य्युपासनम् ।
तद्यानेऽनुगमश्चेति, प्रतिपत्तिरियं गुरोः ॥ २९७ ॥

ततः प्रतिनिवृत्तः सन्, स्थानं गत्वा यथोचितम् ।
सुधीर्धर्माऽविरोधेन, विदधीतार्थचिन्तनम् ॥ २९८ ॥

ततो माध्याह्निकीं पूजां, कुर्यात् कृत्वा च भोजनम् ।
तद्विद्भिः सह शास्त्रार्थ-रहस्यानि विचारयेत् ॥ २९९ ॥

ततश्च सन्ध्यासमये, कृत्वा देवार्चनं पुनः ।
कृतावश्यककर्मा च, कुर्यात् स्वाध्यायमुत्तमम् ॥ ३०० ॥

न्याय्ये काले ततो देव-गुरुस्मृतिपवित्रितः ।
निद्रामल्पामुपासीत, प्रायेणाऽब्रह्मवर्जकः ॥ ३०१ ॥

निद्राच्छेदे योषिदङ्ग-सतत्त्वं परिचिन्तयेत् ।
स्थूलभद्रादिसाधूनां, तन्निवृत्तिं परामृशन् ॥ ३०२ ॥

यकृच्छकृन्मलश्लेष्म-मज्जास्थिपरिपूरिता ।
स्नायुस्यूता बही रम्याः, स्त्रियश्चर्म्मप्रसेविकाः ॥ ३०३ ॥

बहिरन्तर्विपर्यासः, स्त्रीशरीरस्य चेद् भवेत् ।
तस्यैव कामुकः कुर्याद्-गृध्रगोमायुगोपनम् ॥ ३०४ ॥

स्त्रीशस्त्रेणापि चेत् कामो-जगदेतज्जिगीषति ।
तुच्छपिच्छमयं शस्त्रं, किं नादत्ते स मूढधीः ? ॥ ३०५ ॥

सङ्कल्पयोनिनाऽनेन, हहा ! विश्वं विडम्बितम् ।
तदुत्खनामि सङ्कल्पं, मूलमस्येति चिन्तयेत् ॥ ३०६ ॥

यो यः स्याद् बाधको दोष-स्तस्य तस्य प्रतिक्रियाम् ।
चिन्तयेद् दोषमुक्तेषु, प्रमोदं यतिषु व्रजन् ॥ ३०७ ॥

दुःस्थां भवस्थितिं स्थेम्ना, सर्वजीवेषु चिन्तयन् ।
निसर्गसुखसर्गं ते-ष्वपवर्गं विमार्गयेत् ॥ ३०८ ॥

संसर्गेऽप्युपसर्गाणां, दृढव्रतपरायणाः ।
धन्यास्ते कामदेवाद्याः, श्लाघ्यास्तीर्थकृतामपि ॥ ३०९ ॥

जिनो देवः कृपा धर्मो, गुरवो यत्र साधवः ।
श्रावकत्वाय कस्तस्मै, न श्लाघेताऽविमूढधीः ? ॥ ३१० ॥

जिनधर्मविनिर्मुक्तो, मा भूवं चक्रवर्त्यपि ।
स्यां चेटोऽपि दरिद्रोऽपि, जिनधर्माधिवासितः ॥ ३११ ॥

त्यक्तसङ्गो जीर्णवासा, मलक्लिन्नकलेवरः ।
भजन् माधुकरीं वृत्तिं, मुनिचर्यां कदा श्रये ? ॥ ३१२ ॥

त्यजन् दुःशीलसंसर्गं, गुरुपादरजः स्पृशन् ।
कदाऽहं योगमभ्यस्यन्, प्रभवेयं भवच्छिदे ॥ ३१३ ॥

महानिशायां प्रकृते, कायोत्सर्गे पुराद् बहिः ।
स्तम्भवत् स्कन्धकषणं, वृषाःकुर्युःकदा मयि ॥ ३१४ ॥

वने पद्मासनासीनं, क्रोडस्थितमृगार्भकम् ।
कदाऽऽघ्रास्यन्ति वक्त्रे मां, जरन्तो मृगयूथपाः ॥ ३१५ ॥

शत्रौ मित्रे तृणे स्त्रैणे, स्वर्णेऽश्मनि मणौ मृदि ।
मोक्षे भवे भविष्यामि, निर्विशेषमतिः कदा ॥ ३१६ ॥

अधिरोढुं गुणश्रेणिं, निश्रेणिं मुक्तिवेश्मनः ।
परानन्दलताकन्दान्, कुर्यादिति मनोरथान् ॥ ३१७ ॥

इत्याहोरात्रिकीं चर्या-मप्रमत्तः समाचरन् ।
यथावदुक्तवृत्तस्थो, गृहस्थोऽपि विशुध्यति ॥ ३१८ ॥

सोऽथावश्यकयोगानां, भङ्गे मृत्योरथागमे ।
कृत्वा संलेखनामादौ, प्रतिपद्य च संयमम् ॥ ३१९ ॥

जन्मदीक्षाज्ञानमोक्ष-स्थानेषु श्रीमदर्हताम् ।
तदभावे गृहेऽरण्ये, स्थण्डिले जन्तुवर्जिते ॥ ३२० ॥

त्यक्त्वा चतुर्विधाऽऽहारं, नमस्कारपरायणः ।
आराधनां विधायोच्चै-श्चतुःशरणमाश्रितः ॥ ३२१ ॥

इहलोके परलोके, जीविते मरणे तथा ।
त्यक्त्वाऽऽशंसां निदानं च, समाधिसुधयोक्षितः ॥ ३२२ ॥

परीषहोपसर्गेभ्यो निर्भीको जिनभक्तिभाक् ।
प्रतिपद्येत मरण-मानन्दः श्रावको यथा ॥ ३२३ ॥

प्राप्तः स कल्पेष्विन्द्रत्व-मन्यद्वा स्थानमुत्तमम् ।
मोदतेऽनुत्तरप्राज्य-पुण्यसंभारभाक् ततः ॥ ३२४ ॥

च्युत्वोत्पद्य मनुष्येषु, भुक्त्वा भोगान् सुदुर्लभान् ।
विरक्तो मुक्तिमाप्नोति, शुद्धात्मान्तर्भवाष्टकम् ॥ ३२५ ॥

इति संक्षेपतः सम्यग्-रत्नत्रयमुदीरितम् ।
सर्वोऽपि यदनासाद्य, नासादयति निर्वृतिम् ॥ ३२६ ॥

## अथ चतुर्थप्रकाशः

आत्मैव दर्शनज्ञान-चारित्राण्यथवा यतेः ।
यत्तदात्मक एवैष-शरीरमधितिष्ठति ॥ ३२७ ॥

आत्मानमात्मना वेत्ति, मोहत्यागाद्य आत्मनि ।
तदेव तस्य चारित्रं, तज्ज्ञानं तच्च दर्शनम् ॥ ३२८ ॥

आत्माऽज्ञानभवं दुःख-मात्मज्ञानेन हन्यते ।
तपसाप्यात्मविज्ञान-हीनैश्छेत्तुं न शक्यते ॥ ३२९ ॥

अयमात्मैव चिद्रूपः, शरीरी कर्मयोगतः ।
ध्यानाग्निदग्धकर्मा तु, सिद्धात्मा स्यान्निरञ्जनः ॥ ३३० ॥

अयमात्मैव संसारः, कषायेन्द्रियनिर्जितः ।
तमेव तद्विजेतारं, मोक्षमाहुर्मनीषिणः ॥ ३३१ ॥

स्युः कषायाः क्रोधमान-मायालोभाः शरीरिणाम् ।
चतुर्विधास्ते प्रत्येकं, भेदैः संज्वलनादिभिः ॥ ३३२ ॥

पक्षं संज्वलनः प्रत्या-ख्यानो मासचतुष्टयम् ।
अप्रत्याख्यानको वर्षं, जन्मानन्तानुबन्धकः ॥ ३३३ ॥

वीतरागयतिश्राद्ध-सम्यग्दृष्टित्वघातकाः ।
ते देवत्व-मनुष्यत्व-तिर्यक्त्वनरकप्रदाः ॥ ३३४ ॥

तत्रोपतापकः क्रोधः, क्रोधो वैरस्य कारणम् ।
दुर्गतेर्वर्तनी क्रोधः, क्रोधः शमसुखार्गला || ३३५ ||

उत्पद्यमानः प्रथमं, दहत्येव स्वमाश्रयम् ।
क्रोधः कृशानुवत्पश्चा-दन्यं दहति वा न वा || ३३६ ||

આં.શ્લો.૩૨૯ થી ૩૩૬-ત્રિ.દે.સં.
શ્રીધર્મનાથજિનદેશનામધ્યે શ્લોક ૧૩ થી ૨૦

क्रोधवह्नेस्तदह्नाय, शमनाय शुभात्मभिः ।
श्रयणीया क्षमैकैव, संयमारामसारणिः || ३३७ ||

*सर्वेन्द्रियग्लानिकरं विजेतुं, कोपं प्रसर्पन्तमिवोग्रसर्पम् ।*
*विद्यां सुधीर्जाङ्गुलि कीमिवान-वद्यां क्षमां संततमाद्रियेत ३५१ ||*

આં.શ્લો. ૩૩૭ થી ૩૫૦-ત્રિ.દે.સં.
શ્રીધર્મનાથજિનદેશનામધ્યે શ્લો. ૨૨ થી ૩૫

विनयश्रुतशीलानां, त्रिवर्गस्य च घातकः ।
विवेकलोचनं लुम्पन्, मानोऽधङ्करणो नृणाम् || ३३८ ||

जातिलाभकुलैश्वर्य-बलरूपतपः श्रुतैः ।
कुर्वन् मदं पुनस्तानि, हीनानि लभते जनः || ३३९ ||

આં.શ્લો.૩૫૨ થી ૩૬૭-ત્રિ.દે.સં.
શ્રીધર્મનાથજિનદેશનામધ્યે શ્લો. ૩૯ થી ૫૪

उत्सर्पयन् दोषशाखा-गुणमूलान्यधो नयन् ।
उन्मूलनीयो मानद्रु-स्तन्मार्दवसरित्प्लवैः || ३४० ||

આં.શ્લો.૩૬૮ થી ૩૭૩-ત્રિ.દે.સં.
શ્રીધર્મનાથજિન દેશનામધ્યે શ્લોક ૫૬ થી ૬૧

*एवं च मानविषयं परिमृश्य दोषं,*
*ज्ञात्वा च मार्दवनिषेवणजं गुणौघम् ।*

*मानं विहाय यतिधर्मविशेषरूपं,*
*सद्यः समाश्रयत मार्दवमेकतानाः* *॥ ३७४ ॥*

असूनृतस्य जननी, परशुः शीलशाखिनः ।
जन्मभूमिरविद्यानां, माया दुर्गतिकारणम् ॥ ३४१ ॥

कौटिल्यपटवः पापा-मायया बकवृत्तयः ।
भुवनं वञ्चयमाना, वञ्चयन्ते स्वमेव हि ॥ ३४२ ॥

આં.શ્લો.૩૭૫ થી ૩૯૦-ત્રિ.દે.સં.
શ્રીધર્મનાથજિનદેશનામધ્યે શ્લોક ૬૫ થી ૮૦

तदार्जवमहौषध्या, जगदानन्दहेतुना ।
जयेज्जगद्द्रोहकरीं, मायां विषधरीमिव ॥ ३४३ ॥

આં.શ્લો.૩૯૧ થી ૪૦૨-ત્રિ.દે.સં.
શ્રીધર્મનાથજિનદેશનામધ્યે શ્લોક ૮૨ થી ૯૨

*सर्वं जिह्मं मृत्युपद-मार्जवं ब्रह्मणः पदम् ।*
*एतावाञ्ज्ञानविषयः, प्रलापः किं करिष्यति ?* *॥ ३९२ ॥*

*इति निगदितमुग्रं कर्मकौटिल्यभाजामृजुपरिणतिभाजां चानवद्यं चरित्रम् ।*
*तदुभयमपि बुद्धया संस्पृशन् मुक्तिकामो, निरुपममृजुभावं*
*संश्रयेच्छुद्धबुद्धिः* *॥ ४०३ ॥*

आकरः सर्वदोषाणां, गुणग्रसनराक्षसः ।
कन्दो व्यसनवल्लीनां, लोभः सर्वार्थबाधकः ॥ ३४४ ॥

धनहीनः शतमेकं, सहस्रं शतवानपि ।
सहस्राधिपतिर्लक्षं, कोटिं लक्षेश्वरोऽपि च ॥ ३४५ ॥

कोटीश्वरो नरेन्द्रत्वं, नरेन्द्रश्चक्रवर्तिताम् ।
चक्रवर्ती च देवत्वं, देवोपीन्द्रत्वमिच्छति ॥ ३४६ ॥

इन्द्रत्वेऽपि हि संप्राप्ते, यदीच्छा न निवर्तते ।
मूले लघीयांस्तल्लोभः सराव इव वर्धते ॥ ३४७ ॥

આં.શ્લો.૪૦૪ થી ૪૧૮-ત્રિ.દે.સં.
શ્રીધર્મનાથજિનદેશનામધ્યે શ્લોક ૯૮ થી ૧૧૨

लोभसागरमुद्वेल-मतिवेलं महामतिः ।
सन्तोषसेतुबन्धेन, प्रसरन्तं निवारयेत् ॥ ३४८ ॥

આં.શ્લો.૪૧૯ થી ૪૩૩-ત્રિ.દે.સં.
શ્રીધર્મનાથજિનદેશનામધ્યે શ્લો. ૧૧૪ થી ૧૨૮

*इति प्रत्यादेष्टुं निखिलमपि लोभस्य ललितं,*
*मयोक्तः संतोषः परमसुखसाम्राज्यसुभगः ।*
*कुरुध्वं लोभाग्निप्रसरपरितापं शमयितुं,*
*तदस्मिन् संतोषाऽमृतरसमये वेश्मनि रतिम् ॥ ४३४ ॥*

क्षान्त्या क्रोधो मृदुत्वेन, मानो मायाऽऽर्जवेन च ।
लोभश्चानीहया जेयाः, कषाया इति संग्रहः ॥ ३४९ ॥

विनेन्द्रियजयं नैव, कषायाञ्जेतुमीश्वरः ।
हन्यते हैमनं जाड्यं, न विना ज्वलिताऽनलम् ॥ ३५० ॥

अदान्तैरिन्द्रियहयै-श्चलैरपथगामिभिः ।
आकृष्य नरकारण्ये, जन्तुः सपदि नीयते ॥ ३५१ ॥

इन्द्रियैर्विजितो जन्तुः, कषायैरभिभूयते ।
वीरैः कृष्टेष्टकः पूर्वं, वप्रः कैः कैर्न खण्डयते ? ॥ ३५२ ॥

*कुलघाताय पाताय, बन्धाय च वधाय च ।*
अनिर्जितानि जायन्ते, करणानि शरीरिणाम् ॥ ३५३ ॥

આં.શ્લો.૪૩૫ થી ૪૪૬-ત્રિ.દે.સં.
શ્રીશાન્તિનાથજિનદેશનામધ્યે શ્લો. ૮ થી ૧૯

वशास्पर्शसुखास्वाद-प्रसारितकरः करी ।
आलानबन्धनक्लेश-मासादयति तत्क्षणात् ॥ ३५४ ॥

पयस्यगाधे विचरन्, गिलन् गलगतामिषम् ।
मैनिकस्य करे दीनो, मीनः पतति निश्चितम् ॥ ३५५ ॥

निपतन् मत्तमातङ्ग-कपोले गन्धलोलुपः ।
कर्णतालतलाघाताद्, मृत्युमाप्नोति षट्पदः ॥ ३५६ ॥

कनकच्छेदसंकाश-शिखाऽऽलोकविमोहितः ।
रभसेन पतन् दीपे, शलभो लभते मृतिम् ॥ ३५७ ॥

हरिणो हारिणि गीति-माकर्णयितुमुद्धुरः ।
आकर्णाकृष्टचापस्य, याति व्याधस्य वेध्यताम् ॥ ३५८ ॥

एवं विषय एकैकः, पञ्चत्वाय निषेवितः ।
कथं हि युगपत् पञ्च, पञ्चत्वाय भवन्ति न ? ॥ ३५९ ॥

तदिन्द्रियजयं कुर्याद्, मनःशुद्ध्या महामतिः ।
यां विना यमनियमैः, कायक्लेशो वृथा नृणाम् ॥ ३६० ॥

આં.શ્લો.૪૪૭ થી ૪૫૯-ત્રિ.દે.સં.
શ્રીશાન્તિનાથજિનદેશનામધ્યે શ્લો. ૨૭ થી ૩૯

*एवं विमृश्य विषयेषु शुभाशुभत्व-*
*मौपाधिकं तदधिमुक्तिविरक्तचेताः ।*
*हन्तेन्द्रियार्थमधिकृत्य जहीहि रागं,*
*द्वेषं तथेन्द्रियजयाय कृताभिलाषः* *॥ ४६० ॥*

मनःक्षपाचरो भ्राम्य-न्नपशङ्कं निरङ्कुशः ।
प्रपातयति संसारा-ऽऽवर्त्तगर्त्ते जगत्त्रयीम् ॥ ३६१ ॥

तप्यमानांस्तपो मुक्तौ, गन्तुकामान् शरीरिणः ।
वात्येव तरलं चेतः, क्षिपत्यन्यत्र कुत्रचित् ॥ ३६२ ॥

अनिरुद्धमनस्कः सन्, योगश्रद्धां दधाति यः ।
पद्भ्यां जिगमिषुर्ग्रामं, स पङ्गुरिव हस्यते ॥ ३६३ ॥

मनोरोधे निरुध्यन्ते, कर्माण्यपि समन्ततः ।
अनिरुद्धमनस्कस्य, प्रसरन्ति हि तान्यपि || ३६४ ||

मनःकपिरयं विश्व-परिभ्रमणलम्पटः ।
नियन्त्रणीयो यत्नेन, मुक्तिमिच्छुभिरात्मनः || ३६५ ||

दीपिका खल्वनिर्वाणा, निर्वाणपथदर्शिनी ।
एकैव मनसः शुद्धिः, समाम्नाता मनीषिभिः || ३६६ ||

सत्यां हि मनसः शुद्धौ सन्त्यसन्तोऽपि यद्गुणाः ।
सन्तोऽप्यसत्यां नो सन्ति, सैव कार्या बुधैस्ततः || ३६७ ||

मनःशुद्धिमबिभ्राणा, ये तपस्यन्ति मुक्तये ।
त्यक्त्वा नावं भुजाभ्यां ते, तितीर्षन्ति महार्णवम् || ३६८ ||

तपस्विनो मनःशुद्धि-विनाभूतस्य सर्वथा ।
ध्यानं खलु मुधा चक्षु-र्विकलस्यैव दर्पणः || ३६९ ||

तदवश्यं मनःशुद्धिः, कर्तव्या सिद्धिमिच्छता ।
तपःश्रुतयमप्रायैः, किमन्यैः कायदण्डनैः || ३७० ||

मनःशुद्ध्यै च कर्तव्यो, रागद्वेषविनिर्जयः ।
कालुष्यं येन हित्वाऽऽत्मा, स्वस्वरूपेऽवतिष्ठते || ३७१ ||

आत्मायत्तमपि स्वान्तं, कुर्वतामपि योगिनाम् ।
रागादिभिः समाक्रम्य, परायत्तं विधीयते || ३७२ ||

रक्ष्यमाणमपि स्वान्तं, समादाय मनाग् मिषम् ।
पिशाचा इव रागाद्या-श्छलयन्ति मुहुर्मुहुः || ३७३ ||

रागादितिमिरध्वस्त-ज्ञानेन मनसा जनः ।
अन्धेनान्ध इवाऽऽकृष्टः, पात्यते नरकावटे || ३७४ ||

આં.શ્લો.૪૬૧ થી ૪૭૪-ત્રિ.દે.સં.
શ્રીઅરનાથજિનદેશનામધ્યે શ્લોક ૫ થી ૧૭

*दोषक्षयक्षमाणां हि, किमुपेक्षा क्षमाऽर्हताम् ।*
*जगद्दाहकरं यत्र, शान्तं दोषप्रदीपनम् ॥ ४७२ ॥*

अस्ततन्द्रैरतः पुंभि-र्निवाणपदकाङ्क्षिभिः ।
विधातव्यः समत्वेन, रागद्वेषद्विषज्जयः ॥ ३७५ ॥

अमन्दानन्दजनने, साम्यवारिणि मज्जताम् ।
जायते सहसा पुंसां, रागद्वेषमलक्षयः ॥ ३७६ ॥

प्रणिहन्ति क्षणार्धेन, साम्यमालम्ब्य कर्म तत् ।
यन्न हन्यान्नरस्तीव्र-तपसा जन्मकोटिभिः ॥ ३७७ ॥

कर्म जीवं च संश्लिष्टं, परिज्ञातात्मनिश्चयः ।
विभिन्नीकुरुते साधुः, सामायिकशलाकया ॥ ३७८ ॥

रागादिध्वान्तविध्वंसे, कृते सामायिकांशुना ।
स्वस्मिन् स्वरूपं पश्यन्ति, योगिनः परमात्मनः ॥ ३७९ ॥

स्निह्यन्ति जन्तवो नित्यं, वैरिणोऽपि परस्परम् ।
अपि स्वार्थकृते साम्य-भाजः साधोः प्रभावतः ॥ ३८० ॥

આં.શ્લો.૪૭૫ થી ૪૮૯-ત્રિ.દે.સં.
શ્રીમલ્લિનાથજિનદેશનામધ્યે શ્લો. ૭ થી ૨૦

*विगाह्य सर्वशास्त्रार्थ - मिदमुच्चैस्तरां ब्रुवे ।*
*इहामुत्र स्वपरयोर्नान्यत् साम्यात् सुखाकरम् ॥ ४८८ ॥*

*रागद्वेषादिशत्रुप्रतिहतिनिपुणां साम्यसाम्राज्यलक्ष्मीं,*
*भुक्त्वा भुक्त्वा निरन्ताः शुभगतिपदवीं लेभिरे प्राणभाजः ।*
*तेनैतद् मानुषत्वं सपदि सफलतां नेतुकामैर्निकामं,*
*साम्ये निस्सीमसौख्यप्रचयपरिचिते न प्रमादो विधेयः ॥ ४९० ॥*

साम्यं स्याद् निर्ममत्वेन, तत्कृते भावनाः श्रयेत् ।
अनित्यतामशरणं, भवमेकत्वमन्यताम् ॥ ३८१ ॥

अशौचमाश्रवविधिं, संवरं कर्मनिर्जराम् ।
धर्मस्वाख्याततां लोकं, द्वादशीं बोधिभावनाम् ॥ ३८२ ॥

## १-अनित्यभावना-

यत्प्रातस्तन्न मध्याह्ने, यन्मध्याह्ने न तन्निशि ।
निरीक्ष्यते भवेऽस्मिन् ही !, पदार्थानामनित्यता ॥ ३८३ ॥

शरीरं देहिनां सर्व-पुरुषार्थनिबन्धनम् ।
प्रचण्डपवनोद्धूत-घनाघनविनश्वरम् ॥ ३८४ ॥

कल्लोलचपला लक्ष्मीः, संगमाः स्वप्नसंनिभाः ।
वात्याव्यतिकरोत्क्षिप्त-तूलतुल्यं च यौवनम् ॥ ३८५ ॥

આં.શ્લો.૪૯૧ થી ૫૦૯-ત્રિ.દે.સં.
શ્રીસંભવનાથજિનદેશામધ્યે શ્લો. ૨ થી ૨૦

*एतच्छरीरधनयौवनबान्धवादि,*
*तावन्न केवलमनित्यमिहासुभाजाम् ।*
*विश्वं सचेतनमचेतनमप्यशेष-*
*मुत्पत्तिधर्मकमनित्यमुशन्ति सन्तः* ॥ ५१० ॥

## २-अशरणभावना

इत्यनित्यं जगद्वृत्तं स्थिरचित्तः प्रतिक्षणम् ।
तृष्णकृष्णाहिमन्त्राय, निर्ममत्वाय चिन्तयेत् ॥ ३८६ ॥

इन्द्रोपेन्द्रादयोऽप्येते, यन्मृत्योर्यान्ति गोचरम् ।
अहो ! तदन्तकातङ्के, कः शरण्यः शरीरिणाम् ? ॥ ३८७ ॥

पितुर्मातुः स्वसुर्भ्रातु-स्तनयानां च पश्यताम् ।
अत्राणो नीयते जन्तुः, कर्मभिर्यमसद्मनि ॥ ३८८ ॥

शोचन्ति स्वजनानन्तं, नीयमानान् स्वकर्मभिः ।
नेष्यमाणं तु शोचन्ति, नात्मानं मूढबुद्धयः ॥ ३८९ ॥

*संसारे दुःखदावाग्नि-ज्वलज्ज्वालाकरालिते ।*
वने मृगार्भकस्येव, शरणं नास्ति देहिनः ॥ ३९० ॥

अष्टाङ्गेनायुर्वेदेन, जीवातुभिरथागदैः ।
मृत्युञ्जयादिभिर्मन्त्रै-स्त्राणं नैवास्ति मृत्युतः ॥ ५११ ॥

खड्गपञ्जरमध्यस्थ-श्चतुरङ्गचमूवृतः ।
रङ्कवत् कृष्यते राजा, हठेन यमकिङ्करः ॥ ५१२ ॥

जलमध्यस्थितस्तम्भ-मूर्धपञ्जरमध्यगम् ।
राज्ञः प्रियसुतं मृत्यु-श्चकर्षान्यस्य का कथा ? ॥ ५१३ ॥

षष्टिं पुत्रसहस्राणि, सगरस्यापि चक्रिणः ।
तृणवत् त्राणरहिता-न्यदहज्ज्वलनप्रभः ॥ ५१४ ॥

आस्कन्द्य स्कन्दकाचार्यं, मुनिपञ्चशतीं घ्नतः ।
न कश्चिदभवत् त्राता, पालकादन्तकादिव ॥ ५१५ ॥

આં.શ્લો.૫૧૬ થી ૫૨૧-ત્રિ.દે.સં.
શ્રીઅભિનંદનજિનદેશનામધ્યે શ્લો. ૮ થી ૧૨

स्नेहादाश्लिष्य शक्रेणा-र्द्धासनेध्यास्यते स्म यः ।
श्रेणिकः सोऽप्यशरणोऽ-श्रोतव्यां तां दशाम् ॥ ५१८ ॥

एवं विश्वमनाकुलः कवलयन्नाब्रह्म कीटावधि,
श्रान्तिं याति कथञ्चनापि न खलु त्रैलोक्यभीमो यमः ।
नैवास्य प्रतिकारकर्मणि सुराधीशोऽप्यलंभूष्णुता-
मालम्बेत शरण्यवर्जितमिदं हा ! हा ! जगत् ताम्यति ॥ ५२२ ॥

## ३-संसार भावना

श्रोत्रियः श्वपचः स्वामी, पत्तिर्ब्रह्मा कृमिश्च सः ।
संसारनाट्ये नटवत्, संसारी हन्त ! चेष्टते ॥ ३९१ ॥

न याति कतमां योनिं, कतमां वा न मुञ्चति ।
संसारी कर्मसम्बन्धा-दवक्रयकुटीमिव ॥ ३९२ ॥

समस्तलोकाकाशेऽपि, नानारूपैः स्वकर्मतः ।
वालाग्रमपि तन्नास्ति, यन्न स्पृष्टं शरीरिभिः ॥ ३९३ ॥

આં.શ્લો.૫૨૩ થી ૬૧૧-ત્રિ.દે.સં.
શ્રીપદ્મપ્રભજિનદેશનામધ્યે શ્લોક ૫ થી ૯૩

*एवं नास्ति सुखं चतुर्गतिजुषामप्यत्र संसारिणां,*
*दुःखं केवलमेव मानसमथो शारीरमत्यायतम् ।*
*ज्ञात्वैवं ममतानिरासविधये ध्यायन्तु शुद्धाशया,*
*अश्रान्तं भवभावनां भवभयच्छेदोन्मुखत्वं यदि* *॥ ६१२ ॥*

**४-एकत्वभावनाः**

एक उत्पद्यते जन्तु-रेक एव विपद्यते ।
कर्माण्यनुभवत्येकः, प्रचितानि भवान्तरे ॥ ३९४ ॥

अन्यैस्तेनार्जितं वित्तं, भूयः संभूय भुज्यते ।
स त्वेको नरकक्रोडे, क्लिश्यते निजकर्मभिः ॥ ३९५ ॥

આં.શ્લો.૬૧૩ થી ૬૨૧-ત્રિ.દે.સં.
શ્રીસુમતિનાથજિનદેશનામધ્યે શ્લોક ૫ થી ૧૩

*एकः पापात् पतति नरके याति पुण्यात् स्वरेकः,*
*पुण्यापुण्यप्रचयविगमाद् मोक्षमेकः प्रयाति ।*
*एवं ज्ञात्वा चिरमवितथां निर्ममत्वस्य हेतो-*
*रेकत्वाख्यामवहितधियो भावनां भावयन्तु* *॥ ६२१ ॥*

**५-अन्यत्वभावनाः**

यत्रान्यत्वं शरीरस्य, वैसदृश्याच्छरीरिणः ।
धनबन्धुसहायानां, तत्रान्यत्वं न दुर्वचम् ॥ ३९६ ॥

यो देहधनबन्धुभ्यो, भिन्नमात्मानमीक्षते ।
क्व शोकशङ्कुना तस्य, हन्तातङ्कः प्रतन्यते ॥ ३९७ ॥

આં.શ્લો.૬૨૩ થી ૬૩૧-ત્રિ.દે.સં.
શ્રીસુપાર્શ્વજિનદેશનામધ્યે શ્લો. ૪ થી ૧૦

*तथाहि लोहचक्रेण, क्षैरेयीपचनेन च ।*
*देहबाधेऽप्यबाधात्मा, तद्भेदज्ञोऽन्तिमो जिन* *॥ ६२८ ॥*

*नमिर्धनात्मभेदज्ञः, पूर्दाहेऽपीन्द्रमब्रवीत् ।*
*दाहेऽपि मिथिलापुर्याः, नमे किमति दह्यते* // ६३९ //

*ममेति मतिमाश्रिताः परतरेऽपि वस्तुन्यहो !,*
*निबध्य दधतेतरां स्वमिह कोशकारा इव ।*
*विविच्य तदिदं मुहुर्वितथभावनावर्जनाद्,*
*भजेत् ममताच्छिदे सततमन्यताभावनाम्* // ६३२ //

## ६-अशुचिभावना

रसाऽसृग्मांसमेदोऽस्थि-मज्जाशुक्रान्त्रवर्चसाम् ।
अशुचीनां पदं कायः, शुचित्वं तस्य तत् कुतः ? ॥ ३९८ ॥

नवस्रोतःस्रवद्विस्र-रसनिःस्यन्दपिच्छिले ।
देहेऽपि शौचसङ्कल्पो, महन्मोहविजृम्भितम् ॥ ३९९ ॥

આં.શ્લો.૬૩૩ થી ૬૪૧-ત્રિ.દે.સં.
શ્રીચંદ્રપ્રભજિનદેશનામધ્યે શ્લોક ૫ થી ૧૩

*शरीरकस्यैवमशौचभावनां, मदाभिमानस्मरसाददायिनीम् ।*
*विभावयन् निर्ममतामहाभरं वोढुं दृढः स्याद् बहुनोदितेन किम् ? ६४२*

## ७-आश्रवभावनाः

मनोवाक्कायकर्माणि, योगाः कर्म शुभाशुभम् ।
यदाश्रवन्ति जन्तूना-माश्रवास्तेन कीर्तिताः ॥ ४०० ॥

मैत्र्यादिवासितं चेतः, कर्म सूते शुभात्मकम् ।
कषायविषयाक्रान्तं, वितनोत्यशुभं पुनः ॥ ४०१ ॥

शुभार्जनाय निर्मिथ्यं, श्रुतज्ञानाश्रितं वचः ।
विपरीतं पुनर्ज्ञेय-मशुभार्जनहेतवे ॥ ४०२ ॥

शरीरेण सुगुप्तेन, शरीरी चिनुते शुभम् ।
सततारम्भिणा जन्तु-घातकेनाशुभं पुनः ॥ ४०३ ॥

कषाया विषया योगाः, प्रमादाऽविरती तथा ।
मिथ्यात्वमार्तरौद्रे चे-त्यशुभं प्रति हेतवः ॥ ४०४ ॥

આં.શ્લો.૬૪૩ થી ૬૯૧-ત્રિ.દે.સં.
શ્રીસુવિધિનાથજિનદેશનામધ્યે શ્લો. ૭ થી ૫૫

*प्रस्तावतः खलु शुभाश्रव एष उक्तो,*
*वैराग्यकारणमसौ न तु देहभाजाम् ।*
*ज्ञात्वा तदेवमशुभाश्रव एव भाव्यो,*
*भव्यैर्जनैः सपदि निर्ममतानिमित्तम्* ॥ ६९२ ॥

## ८-संवरभावना

सर्वेषामाश्रवाणां तु, निरोधः संवरः स्मृतः ।
स पुनर्भिद्यते द्वेधा, द्रव्यभावविभेदतः ॥ ४०५ ॥

यः कर्मपुद्गलादान-च्छेदः स द्रव्यसंवरः ।
भवहेतुक्रियात्यागः, स पुनर्भावसंवरः ॥ ४०६ ॥

येन येन ह्युपायेन, रुध्यते यो य आश्रवः ।
तस्य तस्य निरोधाय, स स योज्यो मनीषिभिः ॥ ४०७ ॥

क्षमया मृदुभावेन, ऋजुत्वेनाऽप्यनीहया ।
क्रोधं मानं तथा मायां, लोभं रुन्ध्याद् यथाक्रमम् ॥ ४०८ ॥

असंयमकृतोत्सेकान्, विषयान् विषसंनिभान् ।
निराकुर्यादखण्डेन, संयमेन महामतिः ॥ ४०९ ॥

तिसृभिर्गुप्तिभिर्योगान्, प्रमादं चाप्रमादतः ।
सावद्ययोगहानेनाऽविरतिं चापि, साधयेत् ॥ ४१० ॥

सद्दर्शनेन मिथ्यात्वं, शुभस्थैर्येण चेतसः ।
विजयेतार्तरौद्रे च, संवरार्थं कृतोद्यमः ॥ ४११ ॥

આં.શ્લો.૬૯૩ થી ૭૦૧-ત્રિ.દે.સં.
શ્રીશીતલનાથજિનદેશનામધ્યે શ્લો. ૯ થી ૧૭

*एवमाश्रवनिरोधकारणं, संवरः प्रकटितः प्रपञ्चतः ।*
*भावनागणशिरोमणिस्त्वयं, भावनीय इह भव्यजन्तुभिः ॥ ७०२ ॥*

## ९-निर्जराभावना

संसारबीजभूतानां, कर्मणां जरणादिह ।
निर्जरा सा स्मृता द्वेधा, सकामा कामवर्जिता ॥ ४१२ ॥

ज्ञेया सकामा यमिना-मकामा त्वन्यदेहिनाम् ।
कर्मणां फलवत् पाको, यदुपायात् स्वतोऽपि च ॥ ४१३ ॥

सदोषमपि दीप्तेन, सुवर्णं वह्निना यथा ।
तपोऽग्निनां तप्यमान-स्तथा जीवो विशुध्यति ॥ ४१४ ॥

अनशनमौनोदर्यं, वृत्तेः संक्षेपणं तथा ।
रसत्यागस्तनुक्लेशो, लीनतेति बहिस्तपः ॥ ४१५ ॥

प्रायश्चित्तं वैयावृत्यं स्वाध्यायो विनयोऽपि च ।
व्युत्सर्गोऽथ शुभं ध्यानं, षोढेत्याभ्यन्तरं तपः ॥ ४१६ ॥

दीप्यमाने तपोवह्नौ, बाह्ये चाभ्यन्तरेऽपि च ।
यमी जरति कर्माणि, दुर्जराण्यपि तत्क्षणात् ॥ ४१७ ॥

આં.શ્લો.૭૦૩ થી ૭૧૨-ત્રિ.દે.સં.
શ્રીશ્રેયાંસનાથજિનદેશનામધ્યે શ્લો. ૯ થી ૧૮

*एवं तपोभिरमितैः परिचीयमाना,*
*स्यान्निर्जरा सकलकर्मविघातहेतुः ।*
*सेतुर्भवोदधिसमुत्तरणे ममत्व-*
*व्याघातकारणमतः खलु भावयेत् ताम् ॥ ७१३ ॥*

## १०-धर्मस्वाख्यातभावना

स्वाख्यातः खलु धर्मोऽयं, भगवद्भिर्जिनोत्तमैः ।
यं समालम्बमानो हि, न मज्जेद् भवसागरे ॥ ४१८ ॥

संयमः सूनृतं शौचं, ब्रह्माकिञ्चनता तपः ।
क्षान्तिर्मार्दवमृजुता, मुक्तिश्च दशधा स तु ॥ ४१९ ॥

धर्मप्रभावतः कल्प-द्रुमाद्या ददतीप्सितम् ।
गोचरेऽपि न ते यत्स्यु-रधर्माधिष्ठितात्मनाम् ॥ ४२० ॥

अपारे व्यसनाम्भोधौ, पतन्तं पाति देहिनम् ।
सदा सविधवर्त्येक-बन्धुर्धर्मोऽतिवत्सलः ॥ ४२१ ॥

आप्लावयति नाम्भोधि-राश्वासयति चाम्बुदः ।
यन्महीं स प्रभावोऽयं, ध्रुवं धर्मस्य केवलः ॥ ४२२ ॥

न ज्वलत्यनलस्तिर्यग्, यदूर्ध्वं वाति नानिलः ।
अचिन्त्यमहिमा तत्र, धर्म एव निबन्धनम् ॥ ४२३ ॥

निरालम्बा निराधारा, विश्वाधारो वसुन्धरा ।
यच्चावतिष्ठते तत्र, धर्मादन्यद् न कारणम् ॥ ४२४ ॥

सूर्याचन्द्रमसावेतौ, विश्वोपकृतिहेतवे ।
उदयेते जगत्यस्मिन्, नूनं धर्मस्य शासनात् ॥ ४२५ ॥

अबन्धूनामसौ बन्धु-रसखीनामसौ सखा ।
अनाथानामसौ नाथो, धर्मो विश्वैकवत्सलः ॥ ४२६ ॥

रक्षोयक्षोरगव्याघ्र-व्यालानलगरादयः ।
नापकर्तुमलं तेषां, यैर्धर्मः शरणं श्रितः ॥ ४२७ ॥

धर्मो नरकपाताल-पातादवति देहिनः ।
धर्मो निरुपमं यच्छ-त्यपि सर्वज्ञवैभवम् ॥ ४२८ ॥

આં.શ્લો.૭૧૪ થી ૭૪૧-ત્રિ.દે.સં.
શ્રીવાસુપૂજ્યજિનદેશનામધ્યે શ્લોક ૧૨ થી ૩૭

*दिवसे च रजन्यां च, मुखमापृच्छ्य खादताम् ।*
*भक्ष्याभक्ष्यविवेकानां, सौगतानां कुतस्तपः ॥ ७२२ ॥*

*मृद्वी शय्या प्रातः पेया, मध्ये भक्तं सायं पानम् ।*
*द्राक्षाखण्डं रात्रेर्मध्ये, शाक्योपज्ञः साधुधर्मः* // ७२३ //

*गृह्णतां मुञ्चतां भूयो, भूयः पाशुपतव्रतम् ।*
*भेषजादिप्रयोगेण, यूकालिक्षं प्रणिघ्नताम्* // ७४२ //

*नरास्थिभूषणभृतां, शूलखट्वाङ्गवाहिनाम् ।*
*कपालभाजनभुजां, घण्टानूपुरधारिणाम्* // ७४३ //

*मद्यमांसाङ्गनाभोग-प्रसक्तानां निरन्तरम् ।*
*पुतानुबद्धघण्टानां, गायतां नृत्यतां मुहुः* // ७४४ //

આં.શ્લો.૭૪૫ થી ૭૪૯-ત્રિ.દે.સં.
શ્રીવાસુપૂજ્યજિનદેશનામધ્યે શ્લો. ૩૮ થી ૪૨

*स्वाख्याततामिति जिनाधिपतिप्रणीत-*
*धर्माश्रितामसकृदेव विभावयन्तः ।*
*मुक्ता ममत्वविषवेगविकारदोषैः,*
*साम्यं प्रकर्षपदवीं परमां नयन्ति* // ७५० //

## ११-लोकभावना

कटिस्थकरवैशाख-स्थानकस्थनराकृतिम् ।
द्रव्यैः पूर्णं स्मरेल्लोकं, स्थित्युत्पत्तिव्ययात्मकैः ॥ ४२९ ॥

लोको जगत्त्रयाकीर्णो, भुवः सप्तात्र वेष्टिताः ।
घनाम्भोधिमहावात-तनुवातैर्महाबलैः ॥ ४३० ॥

वेत्रासनसमोऽधस्तान्, मध्यतो झल्लरीनिभः ।
अग्रे मुरजसङ्काशो, लोकः स्यादेवमाकृतिः ॥ ४३१ ॥

निष्पादितो न केनापि, न धृतः केनचिच्च सः ।
स्वयंसिद्धो निराधारो, गगने किंत्ववस्थितः ॥ ४३२ ॥

*ननु लोकभावनाया, भावनात्वं कथं भवेत् ? ।*
*उच्यते निर्ममत्वं स्या-दितोऽपि हि निशम्यताम्* // ७५१ //

*सुखहेतौ क्वचिद्भावे, मनो रज्यन्मुहुर्मुहुः ।*
*लोकभावनयाऽत्यर्थं, विप्रकीर्णं विधीयते* ॥ ७५२ ॥

*भूद्वीपसागरादीनि, धर्मध्यानस्य गोचरः ।*
*इत्युक्तं ध्यानशतके, नर्ते तल्लोकभावनाम्* ॥ ७५३ ॥

*जिनोक्ते लोकरूपे च, संवादिनि विनिश्चिते ।*
*अतीन्द्रिये मोक्षमार्गेऽ-थाधत्ते प्रत्ययं जनः* ॥ ७५४ ॥

## १२-बोधिदुर्लभभावना

अकामनिर्जरारूपात्, पुण्याज्जन्तोः प्रजायते ।
स्थावरत्वात् त्रसत्वं वा, तिर्यक्त्वं वा, कथञ्चन ॥ ४३३ ॥

मानुष्यमार्यदेशश्च, जातिः सर्वाक्षपाटवम् ।
आयुश्च प्राप्यते तत्र, कथञ्चित्कर्मलाघवात् ॥ ४३४ ॥

प्राप्तेषु पुण्यतः श्रद्धा, कथकश्रवणेष्वपि ।
तत्त्वनिश्चयरूपं तद्, बोधिरत्नं सुदुर्लभम् ॥ ४३५ ॥

આં.શ્લો.૭૫૫ થી ૭૬૪-ત્રિ.દે.સં.
શ્રીવિમલનાથજિનદેશનામધ્યે શ્લો. ૪ થી ૧૩

*ये प्राप्ताः परमं पदं तदपरे प्राप्स्यन्ति ये केऽपि वा,*
*ये वा केचिदवाप्नुवन्ति विकसत्पुण्यर्द्धयः संप्रति ।*
*सर्वेऽप्यप्रतिमप्रभावविभवां बोधिं समासाद्य ते,*
*तस्माद्बोधिरुपास्यतां किमपरं संस्तूयतां स्तूयताम्* ॥ ७६५ ॥

भावनाभिरविश्रांत-मिति भावितमानसः ।
निर्ममः सर्वभावेषु, समत्वमवलम्बते ॥ ४३६ ॥

विषयेभ्यो विरक्तानां, साम्यवासितचेतसाम् ।
उपशाम्येत् कषायाग्नि-र्बोधिदीपः समुन्मिषेत् ॥ ४३७ ॥

समत्ववलम्ब्याथ, ध्यानं योगी समाश्रयेत् ।
विना समत्वमारब्धे, ध्याने स्वात्मा विडम्ब्यते ॥ ४३८ ॥

मोक्षः कर्मक्षयादेव, स चात्मज्ञानतो भवेत् ।
ध्यानसाध्यं मतं तच्च, तद्ध्यानं हितमात्मनः ॥ ४३९ ॥

न साम्येन विना ध्यानं, न ध्यानेन विना च तत् ।
निष्कम्पं जायते तस्माद्, द्वयमन्योऽन्यकारणम् ॥ ४४० ॥

मुहूर्तान्तर्मनःस्थैर्यं, ध्यानं छद्मस्थयोगिनाम् ।
धर्म्यं शुक्लं च तद् द्वेधा, योगरोधस्त्वयोगिनाम् ॥ ४४१ ॥

मुहूर्तात्परतश्चिन्ता, यद्वा ध्यानान्तरं भवेत् ।
बह्वर्थसंक्रमे तु स्याद्, दीर्घाऽपि ध्यानसंततिः ॥ ४४२ ॥

मैत्रीप्रमोदकारुण्य-माध्यस्थ्यानि नियोजयेत् ।
धर्म्यध्यानमुपस्कर्तुं, तद्धि तस्य रसायनम् ॥ ४४३ ॥

मा कार्षीत् कोऽपि पापानि, मा च भूत् कोपि दुःखितः ।
मुच्यतां जगदप्येषा, मतिर्मैत्री निगद्यते ॥ ४४४ ॥

अपास्ताशेषदोषाणां, वस्तुतत्त्वावलोकिनाम् ।
गुणेषु पक्षपातो यः स प्रमोदः प्रकीर्तितः ॥ ४४५ ॥

दीनेष्वार्तेषु भीतेषु, याचमानेषु जीवितम् ।
प्रतीकारपरा बुद्धिः, कारुण्यमभिधीयते ॥ ४४६ ॥

क्रूरकर्मसु निःशङ्कं, देवतागुरुनिन्दिषु ।
आत्मशंसिषु योपेक्षा, तन्माध्यस्थ्यमुदीरितम् ॥ ४४७ ॥

आत्मानं भावयन्नाभि-र्भावनाभिर्महामतिः ।
त्रुटितामपि संधत्ते, विशुद्धध्यानसंततिम् ॥ ४४८ ॥

तीर्थं वा स्वस्थताहेतु, यत्तद्वा ध्यानसिद्धये ।
कृतासनजयो योगी, विविक्तं स्थानमाश्रयेत् ॥ ४४९ ॥

पर्यङ्कवीरवज्राब्ज-भद्रदण्डासनानि च ।
उत्कटिका गोदोहिका, कायोत्सर्गस्तथासनम् ॥ ४५० ॥

स्याज्जङ्घयोरधोभागे, पादोपरि कृते सति ।
पर्यङ्को नाभिगोत्तान-दक्षिणोत्तरपाणिकः ॥ ४५१ ॥

वामोंऽह्रिर्दक्षिणोरूर्ध्वं, वामोरूपरि दक्षिणः ।
क्रियते यत्र तद्वीरो-चितं वीरासनं स्मृतम् ॥ ४५२ ॥

पृष्ठे वज्राकृतीभूते, दोर्भ्यां वीरासने सति ।
गृह्णीयात् पादयोर्यत्रा-ङ्गुष्ठौ वज्रासनं तु तत् ॥ ४५३ ॥

सिंहासनाधिरूढस्या-संनापनयने सति ।
तथैवावस्थितिर्या ता-मन्ये वीरासनं विदुः ॥ ४५४ ॥

जङ्घाया मध्यभागे तु, संश्लेषो यत्र जङ्घया ।
पद्मासनमिति प्रोक्तं, तदासनविचक्षणैः ॥ ४५५ ॥

संपुटीकृत्य मुष्काग्रे, तलपादौ तथोपरि ।
पाणिकच्छपिकां कुर्या-द्यत्र भद्रासनं तु तत् ॥ ४५६ ॥

श्लिष्टाङ्गुली श्लिष्टगुल्फौ, भूश्लिष्टोरू प्रसारयेत् ।
यत्रोपविश्य पादौ तद्, दण्डासनमुदीरितम् ॥ ४५७ ॥

पुतपार्ष्णिसमायोगे, प्राहुरुत्कटिकासनम् ।
पार्ष्णिभ्यां तु भुवस्त्यागे, तत्स्याद् गोदोहिकासनम् ॥ ४५८ ॥

प्रलम्बितभुजद्वन्द्व-मूर्ध्वस्थस्यासितस्य वा ।
स्थानं कायानपेक्षं यत्, कायोत्सर्गः स कीर्तितः ॥ ४५९ ॥

जायते येन येनेह, विहितेन स्थिरं मनः ।
तत्तदेव विधातव्य-मासनं ध्यानसाधनम् ॥ ४६० ॥

सुखासनसमासीनः, सुश्लिष्टाधरपल्लवः ।
नासाग्रन्यस्तदृग्द्वन्द्वो, दन्तैर्दन्तानसंस्पृशन् ॥ ४६१ ॥

प्रसन्नवदनः पूर्वा-भिमुखो वाप्युदङ्मुखः ।
अप्रमत्तः सुसंस्थानो, ध्याता ध्यानोद्यतो भवेत् ॥ ४६२ ॥

## अथ पञ्चमः प्रकाशः

प्राणायामस्ततः कैश्चिदाश्रितो ध्यानसिद्धये ।
शक्यो नेतरथा कर्तुं मनःपवननिर्जयः ॥ ४६३ ॥

मनो यत्र मरुत्तत्र मरुद्यत्र मनस्ततः ।
अतस्तुल्यक्रियावेतौ संवीतौ क्षीरनीरवत् ॥ ४६४ ॥

एकस्य नाशेऽन्यस्य स्यान्नाशो वृत्तौ च वर्तनम् ।
ध्वस्तयोरिन्द्रियमतिध्वंसान्मोक्षश्च जायते ॥ ४६५ ॥

प्राणायामो गतिच्छेदः श्वासप्रश्वासयोर्मतः ।
रेचकः पूरकश्चैव कुम्भश्चेति स त्रिधा ॥ ४६६ ॥

प्रत्याहारस्तथा शान्त उत्तरश्चाधरस्तथा ।
एभिर्भेदैश्चतुर्भिस्तु सप्तधा कीर्त्यते परैः ॥ ४६७ ॥

यत्कोष्ठादतियत्नेन नासाब्रह्मपुराननैः ।
बहिः प्रक्षेपणं वायोः स रेचक इति स्मृतः ॥ ४६८ ॥

समाकृष्य यदापानात् पूरणं स तु पूरकः ।
नाभिपद्मे स्थिरीकृत्य रोधनं स तु कुम्भकः ॥ ४६९ ॥

स्थानात्स्थानान्तरोत्कर्षः प्रत्याहारः प्रकीर्तितः ।
तालुनासाननद्वारैर्निरोधः शान्त उच्यते ॥ ४७० ॥

आपीयोर्ध्वं यदुत्कृष्य हृदयादिषु धारणम् ।
उत्तरः स समाख्यातो विपरीतस्ततोऽधरः ॥ ४७१ ॥

रेचनादुदरव्याधेः कफस्य च परिक्षयः ।
पुष्टिः पूरकयोगेन व्याधिघातश्च जायते ॥ ४७२ ॥

विकसत्याशु हृत्पद्मं ग्रन्थिरन्तर्विभिद्यते ।
बलस्थैर्यविवृद्धिश्च कुम्भकाद्भवति स्फुटम् ॥ ४७३ ॥

प्रत्याहाराद् बलं कान्तिर्दोषशान्तिश्च शान्ततः ।
उत्तराधरसेवातः स्थिरता कुम्भकस्य तु ॥ ४७४ ॥

प्राणमपानसमानावुदानं व्यानमेव च ।
प्राणायामैर्जयेत् स्थानवर्णक्रियार्थबीजवित् ॥ ४७५ ॥

प्राणो नासाग्रहृन्नाभिपादाङ्गुष्ठान्तगो हरित् ।
गमागमप्रयोगेण तज्जयो धारणेन वा ॥ ४७६ ॥

नासादिस्थानयोगेन पूरणाद्रेचनान्मुहुः ।
गमागमप्रयोगः स्याद्धारणं कुम्भनात् पुनः ॥ ४७७ ॥

अपानः कृष्णरुग्मन्यापृष्ठपृष्ठान्तपार्ष्णिगः ।
जेयः स्वस्थानयोगेन रेचनात् पूरणान्मुहुः ॥ ४७८ ॥

शुक्लः समानो हृन्नाभिसर्वसन्धिष्ववस्थितः ।
जेयः स्वस्थानयोगेनासकृद्रेचनपूरणात् ॥ ४७९ ॥

रक्तो हृत्कण्ठतालुभ्रूमध्यमूर्धनि संस्थितः ।
उदानो वश्यतां नेयो गत्यागतिनियोगतः ॥ ४८० ॥

नासाकर्षणयोगेन स्थापयेत्तं हृदादिषु ।
बलादुत्कृष्यमाणं च रुद्ध्वा रुद्ध्वा वशं नयेत् ॥ ४८१ ॥

सर्वत्वग्वृत्तिको व्यानः शक्रकार्मुकसन्निभः ।
जेतव्यः कुम्भकाभ्यासात्सङ्कोचप्रसृतिक्रमात् ॥ ४८२ ॥

प्राणापानसमानोदानव्यानेष्वेषु वायुषु ।
यैँ पैँ वैँ रौँ लौँ बीजानि ध्यातव्यानि यथाक्रमम् ॥ ४८३ ॥

प्राबल्यं जाठरस्याग्नेर्दीर्घश्वासमरुज्जयौ ।
लाघवं च शरीरस्य प्राणस्य विजये भवेत् ॥ ४८४ ॥

रोहणं क्षतभङ्गादेरुदराग्नेः प्रदीपनम् ।
वर्चोऽल्पत्वं व्याधिघातः समानापानयोर्जये ॥ ४८५ ॥

उत्क्रान्तिर्वारिपङ्काद्यैश्चाबाधोदाननिर्जये ।
जये व्यानस्य शीतोष्णासङ्गः कान्तिररोगिता ॥ ४८६ ॥

यत्र यत्र भवेत् स्थाने जन्तो रोगः प्रपीडकः ।
तच्छान्त्यै धारयेत्तत्र प्राणादिमरुतः सदा ॥ ४८७ ॥

एवं प्राणादिविजये कृताभ्यासः प्रतिक्षणम् ।
धारणादिकमभ्यस्यन्मनःस्थैर्यकृते सदा ॥ ४८८ ॥

उक्तासनसमासीनो रेचयित्वाऽनिलं शनैः ।
आपादाङ्गुष्ठपर्यन्तं वाममार्गेण पूरयेत् ॥ ४८९ ॥

पादाङ्गुष्ठे मनः पूर्वं रुद्ध्वा पादतले ततः ।
पार्ष्णौ गुल्फे च जङ्घायां जानुन्यूरौ गुदे ततः ॥ ४९० ॥

लिङ्गे नाभौ च तुन्दे च हृत्कण्ठरसनेऽपि च ।
तालुनासाग्रनेत्रे च भ्रुवोर्भाले शिरस्यथ ॥ ४९१ ॥

एवं रश्मिक्रमेणैव धारयन्मरुता सह ।
स्थानात्स्थानान्तरं नीत्वा यावद् ब्रह्मपुरं नयेत् ॥ ४९२ ॥

ततः क्रमेण तेनैव पादाङ्गुष्ठान्तमानयेत् ।
नाभिपद्मान्तरं नीत्वा ततो वायुं विरेचयेत् ॥ ४९३ ॥

पादाङ्गुष्ठादौ जङ्घायां जानूरुगुदमेहने ।
धारितः क्रमशो वायुः शीघ्रगत्यै बलाय च ॥ ४९४ ॥

नाभौ ज्वरादिघाताय जठरे कायशुद्धये ।
ज्ञानाय हृदये कूर्मनाड्यां रोगजराच्छिदे ॥ ४९५ ॥

कण्ठे क्षुत्तर्षनाशाय जिह्वाग्रे रससंविदे ।
गन्धज्ञानाय नासाग्रे रूपज्ञानाय चक्षुषोः ॥ ४९६ ॥

भाले तद्रोगनाशाय क्रोधस्योपशमाय च ।
ब्रह्मरन्ध्रे च सिद्धानां साक्षाद्दर्शनहेतवे ॥ ४९७ ॥

अभ्यस्य धारणामेवं सिद्धीनां कारणं परम् ।
चेष्टितं पवमानस्य जानीयाद् गतसंशयः ॥ ४९८ ॥

नाभेर्निष्क्रामतश्चारं हृन्मध्ये नयतो गतिम् ।
तिष्ठतो द्वादशान्ते तु विन्द्यात्स्थानं नभस्वतः ॥ ४९९ ॥

तच्चारगमनस्थानज्ञानादभ्यासयोगतः ।
जानीयात् कालमायुश्च शुभाशुभफलोदयम् ॥ ५०० ॥

ततः शनैः समाकृष्य पवनेन समं मनः ।
योगी हृदयपद्मान्तर्विनिवेश्य नियन्त्रयेत् ॥ ५०१ ॥

ततोऽविद्या विलीयन्ते विषयेच्छा विनश्यति ।
विकल्पा विनिवर्तन्ते ज्ञानमन्तर्विजृम्भते ॥ ५०२ ॥

क्व मण्डले गतिर्वायोः संक्रमः क्व क्व विश्रमः ।
का च नाडीति जानीयात्तत्र चित्ते स्थिरीकृते ॥ ५०३ ॥

मण्डलानि च चत्वारि नासिकाविवरे विदुः ।
भौमवारुणवायव्याग्नेयाख्यानि यथोत्तरम् ॥ ५०४ ॥

पृथिवीबीजसंपूर्णं वज्रलाञ्छनसंयुतम् ।
चतुरस्रं द्रुतस्वर्णप्रभं स्याद्भौममण्डलम् ॥ ५०५ ॥

स्यादर्धचन्द्रसंस्थानं वारुणाक्षरलाञ्छितम् ।
चन्द्राभममृतस्यन्दसान्द्रं वारुणमण्डलम् ॥ ५०६ ॥

स्निग्धाञ्जनघनच्छायं सुवृत्तं बिन्दुसंकुलम् ।
दुर्लक्ष्यं पवनाक्रान्तं चञ्चलं वायुमण्डलम् ॥ ५०७ ॥

ऊर्ध्वज्वालाञ्चितं भीमं त्रिकोणं स्वस्तिकान्वितम् ।
स्फुलिङ्गपिङ्गं तद्बीजं ज्ञेयमाग्नेयमण्डलम् ॥ ५०८ ॥

अभ्यासेन स्वसंवेद्यं स्यान्मण्डलचतुष्टयम् ।
क्रमेण संचरन्नत्र वायुर्ज्ञेयश्चतुर्विधः ॥ ५०९ ॥

नासिकारन्ध्रमापूर्य पीतवर्णः शनैर्वहन् ।
कवोष्णोऽष्टाङ्गुलः स्वच्छो भवेद्वायुः पुरन्दरः ॥ ५१० ॥

धवलः शीतलोऽधस्तात्त्वरितत्वरितं वहन् ।
द्वादशाङ्गुलमानश्च वायुर्वरुण उच्यते ॥ ५११ ॥

उष्णः शीतश्च कृष्णश्च वहन् तिर्यगनारतम् ।
षडङ्गुलप्रमाणश्च वायुः पवनसंज्ञितः ॥ ५१२ ॥

बालादित्यसमज्योतिरत्युष्णश्चतुरङ्गुलः ।
आवर्तवान् वहन्नूर्ध्वं पवनो दहनः स्मृतः ॥ ५१३ ॥

इन्द्रं स्तम्भादिकार्येषु वरुणं शस्तकर्मसु ।
वायुं मलिनलोलेषु वश्यादौ वह्निमादिशेत् ॥ ५१४ ॥

छत्रचामरहस्त्यश्वरामाराज्यादिसम्पदम् ।
मनीषितं फलं वायुः समाचष्टे पुरन्दरः ॥ ५१५ ॥

रामाराज्यादिसंपूर्णैः पुत्रस्वजनबन्धुभिः ।
सारेण वस्तुना चापि योजयेद्वरुणः क्षणात् ॥ ५१६ ॥

कृषिसेवादिकं सर्वमपि सिद्धं विनश्यति ।
मृत्युभीः कलहो वैरं त्रासश्च पवनं भवेत् ॥ ५१७ ॥

भयं शोकं रुजं दुःखं विघ्नव्यूहपरम्पराम् ।
संसूचयेद्विनाशं च दहनो दहनात्मकः ॥ ५१८ ॥

शशाङ्करविमार्गेण वायवो मण्डलेष्वमी ।
विशन्तः शुभदाः सर्वे निष्क्रान्तोऽन्यथा स्मृताः ॥ ५१९ ॥

प्रवेशसमये वायुर्जीवो मृत्युस्तु निर्गमे ।
उच्यते ज्ञानिभिस्तादृक्फलमप्यनयोस्ततः ॥ ५२० ॥

पथेन्दोरिन्द्रवरुणौ विशन्तौ सर्वसिद्धिदौ ।
रविमार्गेण निर्यान्तौ प्रविशन्तौ च मध्यमौ ॥ ५२१ ॥

दक्षिणेन विनिर्यान्तौ विनाशायानिलानलौ ।
निःसरन्तौ विशन्तौ च मध्यमावितरेण तु ॥ ५२२ ॥

इडा च पिङ्गला चैव सुषुम्णा चेति नाडिकाः ।
शशिसूर्यशिवस्थानं वामदक्षिणमध्यगाः ॥ ५२३ ॥

पीयूषमिव वर्षन्ती सर्वगात्रेषु सर्वदा ।
वामाऽमृतमयी नाडी सम्मताऽभीष्टसूचिका ॥ ५२४ ॥

वहन्त्यनिष्टशंसित्री संहर्त्री दक्षिणा पुनः ।
सुषुम्णा तु भवेत् सिद्धिनिर्वाणफलकारणम् ॥ ५२५ ॥

वामैवाभ्युदयादीष्टशस्तकार्येषु सम्मता ।
दक्षिणा तु रताहारयुद्धादौ दीप्तकर्मणि ॥ ५२६ ॥

वामा शस्तोदये पक्षे सिते कृष्णे तु दक्षिणा ।
त्रीणि त्रीणि दिनानीन्दुसूर्ययोरुदयः शुभः ॥ ५२७ ॥

शशाङ्केनोदये वायोः सूर्येणास्तं शुभावहम् ।
उदये रविणा त्वस्य शशिनास्तं शिवं मतम् ॥ ५२८ ॥

सितपक्षे दिनारम्भे यत्नेन प्रतिपद्दिने ।
वायोर्वीक्षेत संचारं प्रशस्तमितरं तथा ॥ ५२९ ॥

उदेति पवनः पूर्वं शशिन्येष त्र्यहं ततः ।
संक्रामति त्र्यहं सूर्ये शशिन्येव पुनस्त्र्यहम् ॥ ५३० ॥

वहेद्यावद् बृहत्पर्व क्रमेणानेन मारुतः ।
कृष्णपक्षे पुनः सूर्योदयपूर्वमयं क्रमः ॥ ५३१ ॥

त्रीन् पक्षानन्यथात्वेऽस्य मासषट्केन पञ्चता ।
पक्षद्वयं विपर्यासेऽभीष्टबन्धुविपद्भवेत् ॥ ५३२ ॥

भवेत्तु दारुणो व्याधिरेकं पक्षं विपर्यये ।
द्वित्र्याद्यहविपर्यासे कलहादिकमुद्दिशेत् ॥ ५३३ ॥

एकं द्वे त्रीण्यहोरात्राण्यर्क एव मरुद्वहन् ।
वर्षैस्त्रिभिर्द्वाभ्यामेकेनान्तायेन्दौ रुजे पुनः ॥ ५३४ ॥

मासमेकं रवावेव-वहन् वायुर्विनिर्दिशेत् ।
अहोरात्रावधिं मृत्युं शशाङ्के तु धनक्षयम् ॥ ५३५ ॥

वायुस्त्रिमार्गगः शंसेन्मध्याह्नात् परतो मृतिम् ।
दशाहं तु द्विमार्गस्थः संक्रान्तौ मरणं दिशेत् ॥ ५३६ ॥

दशाहं तु वहन्निन्दावेवोद्वेगरुजे मरुत् ।
इतश्चेतश्च यामार्धं वहन् लाभार्चनादिकृत् ॥ ५३७ ॥

विषुवत्समयप्राप्तौ स्पन्देते यस्य चक्षुषी ।
अहोरात्रेण जानीयात्तस्य नाशमसंशयम् ॥ ५३८ ॥

पञ्चातिक्रम्य संक्रान्तीर्मुखे वायुर्वहन् दिशेत् ।
मित्रार्थहानी निस्तेजोऽनर्थान् सर्वान्मृतिं विना ॥ ५३९ ॥

संक्रान्तीः समतिक्रम्य त्रयोदश समीरणः ।
प्रवहन् वामनासायां रोगोद्वेगादि सूचयेत् ॥ ५४० ॥

मार्गशीर्षस्य संक्रान्तिकालादारभ्य मारुतः ।
वहन् पञ्चाहमाचष्टे वत्सरेऽष्टादशे मृतिम् ॥ ५४१ ॥

शरत्संक्रान्तिकालाच्च पञ्चाहं मारुतो वहन् ।
ततः पञ्चदशाब्दानामन्ते मरणमादिशेत् ॥ ५४२ ॥

श्रावणादेः समारभ्य पञ्चाहमनिलो वहन् ।
अन्ते द्वादशवर्षाणां मरणं परिसूचयेत् ॥ ५४३ ॥

वहन् ज्येष्ठादिदिवसाद्दशाहानि समीरणः ।
दिशेन्नवमवर्षस्य पर्यन्ते मरणं ध्रुवम् ॥ ५४४ ॥

आरभ्य चैत्राद्यदिनात् पञ्चाहं पवनो वहन् ।
पर्यन्ते वर्षषट्कस्य मृत्युं नियतमादिशेत् ॥ ५४५ ॥

आरभ्य माघमासादेः पञ्चाहानि मरुद्वहन् ।
संवत्सरत्रयस्यान्ते संसूचयति पञ्चताम् ॥ ५४६ ॥

सर्वत्र द्वित्रिचतुरो वायुश्चेद्दिवसान् वहेत् ।
अब्दभागैस्तु ते शोध्या यथावदनुपूर्वशः ॥ ५४७ ॥

अथेदानीं प्रवक्ष्यामि कञ्चित् कालस्य निर्णयम् ।
सूर्यमार्गं समाश्रित्य स च पौष्णेऽवगम्यते ॥ ५४८ ॥

जन्मऋक्षगते चन्द्रे समंसप्तगते रवौ ।
पौष्णनामा भवेत्कालो मृत्युनिर्णयकारर्णम् ॥ ५४९ ॥

दिनार्धं दिनमेकं च यदा सूर्ये मरुद्वहन् ।
चतुर्दशे द्वादशेऽब्दे मृत्यवे भवति क्रमात् ॥ ५५० ॥

तथैव च वहन् वायुरहोरात्रं द्व्यहं त्र्यहम् ।
दशमाष्टमषष्ठाब्देष्वन्ताय भवति क्रमात् ॥ ५५१ ॥

वहन् दिनानि चत्वारि तुर्येऽब्दे मृत्यवे मरुत् ।
साशीत्यहःसहस्रे तु पञ्चाहानि वहन् पुनः ॥ ५५२ ॥

एकद्वित्रिचतुःपञ्चचतुर्विंशत्यहःक्षयात् ।
षडादीन् दिवसान् पञ्च शोधयेदिह तद्यथा ॥ ५५३ ॥

षट्कं दिनानामध्यर्कं वहमाने समीरणे ।
जीवत्यह्नां सहस्रं षट्पञ्चाशद्दिवसाधिकम् ॥ ५५४ ॥

सहस्रं साष्टकं जीवेद्वायौ सप्ताहवाहिनि ।
सषट्त्रिंशन्नवशतीं जीवेदष्टाहवाहिनि ॥ ५५५ ॥

एकत्रैव नवाहानि तथा वहति मारुते ।
अह्नामष्टशतीं जीवेच्चत्वारिंशद्दिनाधिकाम् ॥ ५५६ ॥

तथैव वायौ प्रवहत्येकत्र दश वासरान् ।
विंशत्यभ्यधिकामह्नां जीवेत्सप्तशतीं ध्रुवम् ॥ ५५७ ॥

एकद्वित्रिचतुःपञ्चचतुर्विंशत्यहःक्षयात् ।
एकादशादिपञ्चाहान्यत्र शोध्यानि तद्यथा ॥ ५५८ ॥

एकादश दिनान्यर्कनाड्यां वहति मारुते ।
षण्णवत्यधिकान्यह्नां षट् शतान्येव जीवति ॥ ५५९ ॥

तथैव द्वादशाहानि वायौ वहति जीवति ।
दिनानां षट्शतीमष्टचत्वारिंशत्समन्विताम् ॥ ५६० ॥

त्रयोदश दिनान्यर्कनाडीचारिणि मारुते ।
जीवेत्पञ्चशतीमह्नां षट्सप्ततिदिनाधिकाम् ॥ ५६१ ॥

चतुर्दश दिनान्येवं प्रवाहिणि समीरणे ।
अशीत्यभ्यधिकं जीवेदह्नां शतचतुष्टयम् ॥ ५६२ ॥

तथा पञ्चदशाहानि यावद्वहति मारुते ।
जीवेत् षष्टिदिनोपेतं दिवसानां शतत्रयम् ॥ ५६३ ॥

एकद्वित्रिचतुःपञ्चद्वादशाहक्रमक्षयात् ।
षोडशाद्यानि पञ्चाहान्यत्र शोध्यानि तद्यथा ॥ ५६४ ॥

प्रवहत्येकनासायां षोडशाहानि मारुते ।
जीवेत्सहाष्टचत्वारिंशतं दिनशतत्रयीम् ॥ ५६५ ॥

वहमाने तथा सप्तदशाहानि समीरणे ।
अह्नां शतत्रये मृत्युश्चतुर्विंशतिसंयुते ॥ ५६६ ॥

पवने विचरत्यष्टादशाहानि तथैव च ।
नाशोऽष्टाशीतिसंयुक्ते गते दिनशतद्वये ॥ ५६७ ॥

विचरत्यनिले तद्वद्दिनान्येकोनविंशतिम् ।
चत्वारिंशद्युते याते मृत्युर्दिनशतद्वये ॥ ५६८ ॥

विंशतिदिवसानेकनासाचारिणि मारुते ।
साशीतौ वासरशते गते मृत्युर्न संशयः ॥ ५६९ ॥

एकद्वित्रिचतुःपञ्चदिनषट्ककक्रमक्षयात् ।
एकविंशादिपञ्चाहान्यत्र शोध्यानि तद्यथा ॥ ५७० ॥

एकविंशत्यहं त्वर्कनाडीवाहिनि मारुते ।
चतुःसप्ततिसंयुक्ते मृत्युर्दिनशते भवेत् ॥ ५७१ ॥

द्वाविंशतिं दिनान्येवं सद्विषष्टावहःशते ।
षड्दिनोनैः पञ्चमासैस्त्रयोविंशत्यहानुगे ॥ ५७२ ॥

तथैव वायौ वहति चतुर्विंशतिवासरीम् ।
विंशत्यभ्यधिके मृत्युर्भवेद्दिनशते गते ॥ ५७३ ॥

पञ्चविंशत्यहं चैवं वायौ मासत्रये मृतिः ।
मासद्वये पुनर्मृत्युः षड्विंशतिदिनानुगे ॥ ५७४ ॥

सप्तविंशत्यहं वहे नाशो मासेन जायते ।
मासार्धेन पुनर्मृत्युरष्टाविंशत्यहानुगे ॥ ५७५ ॥

एकोनत्रिंशदहगे मृतिः स्याद्दशमेऽहनि ।
त्रिंशद्दिनीचरे तु स्यात्पञ्चत्वं पञ्चमे दिने ॥ ५७६ ॥

एकत्रिंशदहचरे वायौ मृत्युर्दिनत्रये ।
द्वितीयदिवसे नाशो द्वात्रिंशदहवाहिनि ॥ ५७७ ॥

त्रयस्त्रिंशदहचरे त्वेकाहेनापि पञ्चता ।
एवं यदीन्दुनाड्यां स्यात्तदा व्याध्यादिकं दिशेत् ॥ ५७८ ॥

अध्यात्मं वायुमाश्रित्य प्रत्येकं सूर्यसोमयोः ।
एवमभ्यासयोगेन जानीयात्कालनिर्णयम् ॥ ५७९ ॥

अध्यात्मिकविपर्यासः संभवेद्व्याधितोऽपि हि ।
तन्निश्चयाय बध्नामि बाह्यं कालस्य लक्षणम् ॥ ५८० ॥

नेत्रश्रोत्रशिरोभेदात् स च त्रिविधलक्षणः ।
निरीक्ष्यः सूर्यमाश्रित्य यथेष्टमपरः पुनः ॥ ५८१ ॥

वामे तत्रेक्षणे पद्मं षोडशच्छदमैन्दवम् ।
जानीयाद्भानवीयं तु दक्षिणे द्वादशच्छदम् ॥ ५८२ ॥

खद्योतद्युतिवर्णानि चत्वारि च्छदनानि तु ।
प्रत्येकं तत्र दृश्यानि स्वाङ्गुलीविनिपीडनात् ॥ ५८३ ॥

सोमाधो भ्रूलतापाङ्गघ्राणान्तिकदलेषु तु ।
दले नष्टे क्रमान्मृत्युः षट्त्रियुग्मैकमासतः ॥ ५८४ ॥

अयमेव क्रमःपद्मे भानवीये यदा भवेत् ।
दशपञ्चत्रिद्विदिनैः क्रमान्मृत्युस्तदा भवेत् ॥ ५८५ ॥

एतान्यपीड्यमानानि द्वयोरपि हि पद्मयोः ।
दलानि यदि वीक्षेत मृत्युर्दिनशतात्तदा ॥ ५८६ ॥

ध्यात्वा हृद्यष्टपत्राब्जं श्रोत्रे हस्ताग्रपीडिते ।
न श्रूयेताग्निनिर्घोषो यदि स्वः पञ्च वासरान् ॥ ५८७ ॥

दश वा पञ्चदश वा विंशतिं पञ्चविंशतिम् ।
तदा पञ्चचतुस्त्रिद्व्येकवर्षैर्मरणं क्रमात् ॥ ५८८ ॥

एकद्वित्रिचतुःपञ्चचतुर्विंशत्यहःक्षयात् ।
षडादिषोडशदिनान्यान्तराण्यपि शोधयेत् ॥ ५८९ ॥

ब्रह्मद्वारे प्रसर्पन्तीं पञ्चाहं धूममालिकाम् ।
न चेत् पश्येत्तदा ज्ञेयो मृत्युः संवत्सरैस्त्रिभिः ॥ ५९० ॥

प्रतिपद्दिवसे कालचक्रज्ञानाय शौचवान् ।
आत्मनो दक्षिणं पाणिं शुक्लपक्षं प्रकल्पयेत् ॥ ५९१ ॥

अधोमध्योर्ध्वपर्वाणि कनिष्ठाङ्गुलीगानि तु ।
क्रमेण प्रतिपत्षष्ठ्येकादशीः कल्पयेत्तिथीः ॥ ५९२ ॥

अवशेषाङ्गुलीपर्वाण्यवशेषतिथीस्तथा ।
पञ्चमीदशमीराकाः पर्वाण्यङ्गुष्ठगानि तु ॥ ५९३ ॥

वामपार्णि कृष्णपक्षतिथीस्तद्वच्च कल्पयेत् ।
ततश्च निर्जने देशे बद्धपद्मासनः सुधीः ॥ ५९४ ॥

प्रसन्नः सितसंव्यानः कोशीकृत्य करद्वयम् ।
ततस्तदन्तः शून्यं तु कृष्णं वर्णं विचिन्तयेत् ॥ ५९५ ॥

उद्घाटितकराम्भोजस्ततो यत्राङ्गुलीतिथौ ।
वीक्ष्यते कालबिन्दुः स काल इत्यत्र कीर्त्यते ॥ ५९६ ॥

क्षुतविण्मेदमूत्राणि भवन्ति युगपद्यदि ।
मासे तत्र तिथौ तत्र वर्षान्ते मरणं तदा ॥ ५९७ ॥

रोहिणीं शशभृल्लक्ष्म महापथमरुन्धतीम् ।
ध्रुवं च न यदा पश्येद्वर्षेण स्यात्तदा मृतिः ॥ ५९८ ॥

स्वप्ने स्वं भक्ष्यमाणं श्वगृध्रकाकनिशाचरैः ।
उह्यमानं खरोष्ट्राद्यैर्यदा पश्येत्तदा मृतिः ॥ ५९९ ॥

रश्मिनिर्मुक्तमादित्यं रश्मियुक्तं हविर्भुजम् ।
यदा पश्येद्विपद्येत तदैकादशमासतः ॥ ६०० ॥

वृक्षाग्रे कुत्रचित् पश्येद् गन्धर्वनगरं यदि ।
पश्येत् प्रेतान् पिशाचान् वा दशमे मासि तन्मृतिः ॥ ६०१ ॥

छर्दि मूत्रं पुरीषं वा सुवर्णरजतानि वा ।
स्वप्ने पश्येद्यदि तदा मासान्नवैव जीवति ॥ ६०२ ॥

स्थूलोऽकस्मात् कृशोऽकस्मादकस्मादतिकोपनः ।
अकस्मादतिभीरुर्वा मासानष्टैव जीवति ॥ ६०३ ॥

समग्रमपि विन्यस्तं पांशौ वा कर्दमेऽपि वा ।
स्याच्चेत्खण्डं पदं सप्तमास्यन्ते म्रियते तदा ॥ ६०४ ॥

तारां श्यामां यदा पश्येच्छुष्येदधरतालु च ।
न स्वाङ्गुलित्रयं मायाद्राजदन्तद्वयान्तरे ॥ ६०५ ॥

गृध्रः काकः कपोतो वा क्रव्यादोऽन्योऽपि वा खगः ।
निलीयेत यदा मूर्ध्नि षण्मास्यन्ते मृतिस्तदा ॥ ६०६ ॥

प्रत्यहं पश्यतानभ्रेऽहन्यापूर्य जलैर्मुखम् ।
विहिते पूत्कृते शक्रधन्वा तु तत्र दृश्यते ॥ ६०७ ॥

यदा न दृश्यते तत्तु मासैः षड्भिर्मृतिस्तदा ।
परनेत्रे स्वदेहं चेन्न पश्येन्मरणं तदा ॥ ६०८ ॥

कूर्परौ न्यस्य जान्वोर्मूर्ध्न्येकीकृत्य करौ सदा ।
रम्भाकोशनिभां छायां लक्षयेदन्तरोद्भवाम् ॥ ६०९ ॥

विकासि च दलं तत्र यदैकं परिलक्ष्यते ।
तस्यामेव तिथौ मृत्युः षण्मास्यन्ते भवेत्तदा ॥ ६१० ॥

इन्द्रनीलसमच्छाया वक्रीभूताः सहस्रशः ।
मुक्ताफलालङ्करणाः पन्नगाः सूक्ष्ममूर्त्तयः ॥ ६११ ॥

दिवा संमुखमायान्तो दृश्यन्ते व्योम्नि सन्निधौ ।
न दृश्यन्ते यदा ते तु षण्मास्यन्ते मृतिस्तदा ॥ ६१२ ॥

स्वप्ने मुण्डितमभ्यक्तं रक्तगन्धस्रगम्बरम् ।
पश्येद् याम्यां खरे यान्तं स्वं योऽब्दार्धं स जीवति ॥ ६१३ ॥

घण्टानादो रतान्ते चेदकस्मादनुभूयते ।
पञ्चता पञ्चमास्यन्ते तदा भवति निश्चितम् ॥ ६१४ ॥

शिरो वेगात्समारुह्य कृकलासो व्रजन् यदि ।
दध्याद्वर्णत्रयं पञ्चमास्यन्ते मरणं तदा ॥ ६१५ ॥

वक्रीभवति नासा चेद्वर्तुलीभवतो दृशौ ।
स्वस्थानाद् भ्रश्यतः कर्णौ चतुर्मास्यां तदा मृतिः ॥ ६१६ ॥

कृष्णं कृष्णपरीवारं लोहदण्डधरं नरम् ।
यदा स्वप्ने निरीक्षेत मृत्युर्मासैस्त्रिभिस्तदा ॥ ६१७ ॥

इन्दुमुष्णं रविं शीतं छिद्रं भूमौ रवावपि ।
जिह्वां श्यामां मुखं कोकनदाभं च यदेक्षते ॥ ६१८ ॥

तालुकम्पो मनःशोको वर्णोऽङ्गे नैकधा यदा ।
नाभेश्चाकस्मिकी हिक्का मृत्युर्मासद्वयात्तदा ॥ ६१९ ॥

जिह्वा नास्वादमादत्ते मुहुः स्खलति भाषणे ।
श्रोत्रे न श्रुणुतः शब्दं गन्धं वेत्ति न नासिका ॥ ६२० ॥

स्पन्देते नयने नित्यं दृष्टवस्तुन्यपि भ्रमः ।
नक्तमिन्द्रधनुः पश्येत् तथोल्कापतनं दिवा ॥ ६२१ ॥

न च्छायामात्मनः पश्येद्दर्पणे सलिलेऽपि वा ।
अनब्दां विद्युतं पश्येच्छिरोऽकस्मादपि ज्वलेत् ॥ ६२२ ॥

हंसकाकमयूराणां पश्येच्च क्वापि संहतिम् ।
शीतोष्णखरमृद्वादेरपि स्पर्शं न वेत्ति च ॥ ६२३ ॥

अमीषां लक्ष्मणां मध्याद्यदैकमपि दृश्यते ।
जन्तोर्भवति मासेन तदा मृत्युर्न संशयः ॥ ६२४ ॥

शीते हकारे फुत्कारे चोष्णे स्मृतिगतिक्षये ।
अङ्गपञ्चकशैत्ये च स्याद्दशाहेन पञ्चता ॥ ६२५ ॥

अर्धोष्णमर्धशीतं च शरीरं जायते यदा ।
ज्वालाकस्माज्ज्वलेद्वाङ्गे सप्ताहेन तदा मृतिः ॥ ६२६ ॥

स्नातमात्रस्य हृत्पादं तत्क्षणाद्यदि शुष्यति ।
दिवसे जायते षष्ठे तदा मृत्युरसंशयम् ॥ ६२७ ॥

जायते दन्तघर्षश्चेच्छवगन्धश्च दुःसहः ।
विकृता भवति च्छाया त्र्यहेण म्रियते तदा ॥ ६२८ ॥

न स्वनासां स्वजिह्वां न न ग्रहान्नामला दिशः ।
नापि सप्तऋषीन् यर्हि पश्यति म्रियते तदा ॥ ६२९ ॥

प्रभाते यदि वा सायं ज्योत्स्नावत्यामथो निशि ।
प्रवितत्य निजौ बाहू निजच्छायां विलोक्य च ॥ ६३० ॥

शनैरुत्क्षिप्य नेत्रे स्वच्छायां पश्येत्ततोऽम्बरे ।
न शिरो दृश्यते तस्यां यदा स्यान्मरणं तदा ॥ ६३१ ॥

नेक्ष्यते वामबाहुश्चेत् पुत्रदारक्षयस्तदा ।
यदि दक्षिणबाहुर्नेक्ष्यते भ्रातृक्षयस्तदा ॥ ६३२ ॥

अदृष्टे हृदये मृत्युरुदरे च धनक्षयः ।
गुह्ये पितृविनाशस्तु व्याधिरूरुयुगे भवेत् ॥ ६३३ ॥

अदर्शने पादयोश्च विदेशगमनं भवेत् ।
अदृश्यमाने सर्वाङ्गे सद्यो मरणमादिशेत् ॥ ६३४ ॥

विद्यया दर्पणाङ्गुष्ठकुड्यासिष्ववतारिता ।
विधिना देवता पृष्टा ब्रूते कालस्य निर्णयम् ॥ ६३५ ॥

सूर्येन्दुग्रहणे विद्यां नरवीरठवेत्यसौ ।
साध्या दशसहस्र्याष्टोत्तरया जपकर्मतः ॥ ६३६ ॥

अष्टोत्तरसहस्रस्य जापात् कार्यक्षणे पुनः ।
देवता लीयतेऽस्यादौ ततः कन्याऽऽह निर्णयम् ॥ ६३७ ॥

सत्साधकगुणाकृष्टा स्वयमेवाथ देवता ।
त्रिकालविषयं ब्रूते निर्णयं गतसंशयम् ॥ ६३८ ॥

अथवा शकुनाद्विन्द्यात्सज्जो वा यदिवाऽऽतुरः ।
स्वतो वा परतो वाऽपि गृहे वा यदिवा बहिः ॥ ६३९ ॥

अहिवृश्चिककृम्याखुगृहगोधापिपीलिकाः ।
यूकामत्कुणलूताश्च वल्मीकोऽथोपदेहिकाः ॥ ६४० ॥

कीटिका घृतवर्णाश्च भ्रमर्यश्च यदाऽधिकाः ।
उद्वेगकलहव्याधिमरणानि तदा दिशेत् ॥ ६४१ ॥

उपानद्वाहनच्छत्रशस्त्रच्छायाङ्गकुन्तलान् ।
चञ्च्वा चुम्बेद्यदा काकस्तदाऽऽसन्नैव पञ्चता ॥ ६४२ ॥

अश्रुपूर्णदृशो गावो गाढं पादैर्वसुन्धराम् ।
खनन्ति चेत्तदानीं स्याद्रोगो मृत्युश्च तत्प्रभोः ॥ ६४३ ॥

अनातुरकृते ह्येतच्छकुनं परिकीर्तितम् ।
अधुनाऽऽतुरमुद्दिश्य शकुनं परिकीर्त्यते ॥ ६४४ ॥

दक्षिणस्यां वलित्वा चेत् श्वा गुदं लेढ्युरोऽथवा ।
लाङ्गुलं वा तदा मृत्युरेकद्वित्रिदिनैः क्रमात् ॥ ६४५ ॥

शेते निमित्तकाले चेत् श्वा संकोच्याखिलं वपुः ।
धूत्वा कर्णौ वलित्वाङ्गं धूनोत्यथ ततो मृतिः ॥ ६४६ ॥

यदि व्यात्तमुखो लालां मुञ्चन् संकोचितेक्षणः ।
अङ्गं संकोच्य शेते श्वा तदा मृत्युर्न संशयः ॥ ६४७ ॥

यद्यातुरगृहस्योर्ध्वं काकपक्षिगणो मिलन् ।
त्रिसन्ध्यं दृश्यते नूनं तदा मृत्युरुपस्थितः ॥ ६४८ ॥

महानसे तथा शय्यागारे काकाः क्षिपन्ति चेत् ।
चर्मास्थि रज्जुं केशान् वा तदासन्नैव पञ्चता ॥ ६४९ ॥

अथवोपश्रुतेर्विन्द्याद्विद्वान् कालस्य निर्णयम् ।
प्रशस्ते दिवसे स्वप्नकाले शस्तां दिशं श्रितः ॥ ६५० ॥

पूत्वा पञ्चनमस्कृत्याचार्यमन्त्रेण वा श्रुती ।
गेहाच्छन्नश्रुतिर्गच्छेच्छिल्पिचत्वरभूमिषु ॥ ६५१ ॥

चन्दनेनार्चयित्वा क्ष्मां क्षिप्त्वा गन्धाक्षतादि च ।
सावधानस्ततस्तत्रोपश्रुतेः शृणुयाद् ध्वनिम् ॥ ६५२ ॥

अर्थान्तरापदेश्यश्च सरूपश्चेति स द्विधा ।
विमर्शगम्यस्तत्राद्यः स्फुटोक्तार्थोऽपरः पुनः ॥ ६५३ ॥

यथैष भवनस्तम्भः पञ्चषड्भिरयं दिनैः ।
पक्षैर्मासैरथो वर्षैर्भङ्क्ष्यते यदि वा न वा ॥ ६५४ ॥

मनोहरतरश्चासीत् किन्त्वयं लघु भङ्क्ष्यते ।
अर्थान्तरापदेश्या स्यादेवमादिरुपश्रुतिः ॥ ६५५ ॥

एषा स्त्री पुरुषो वाऽसौ स्थानादस्मान्न यास्यति ।
दास्यामो न वयं गन्तुं गन्तुकामो न चाप्ययम् ॥ ६५६ ॥

विद्यते गन्तुकामोऽयमहं च प्रेषणोत्सुकः ।
तेन यास्यत्यसौ शीघ्रं स्यात्सरूपेत्युपश्रुतिः ॥ ६५७ ॥

कर्णोद्घाटनसंज़ातोपश्रुत्यन्तरमात्मनः ।
कुशलाः कालमासन्नमनासन्नं च जानते ॥ ६५८ ॥

शनिः स्याद्यत्र नक्षत्रे तद्दातव्यं मुखे ततः ।
चत्वारि दक्षिणे पाणौ त्रीणि त्रीणि च पादयोः ॥ ६५९ ॥

चत्वारि वामहस्ते तु क्रमशः पञ्च वक्षसि ।
त्रीणि शीर्षे दृशोर्द्वे द्वे गुह्य एकं शनौ नरे ॥ ६६० ॥

निमित्तसमये तत्र पतितं स्थापनाक्रमात् ।
जन्मर्क्षं नामऋक्षं वा गुह्यदेशे भवेद्यदि ॥ ६६१ ॥

दृष्टं श्लिष्टं ग्रहैर्दुष्टैः सौम्यैरप्रेक्षितायुतम् ।
सज्जस्यापि तदा मृत्युः का कथा रोगिणः पुनः ॥ ६६२ ॥

पृच्छायामथ लग्नास्तचतुर्थदशमस्थिताः ।
ग्रहाः क्रूराः शशी षष्ठाष्टमश्चेत्स्यात्तदा मृतिः ॥ ६६३ ॥

पृच्छायाः समये लग्नाधिपतिर्भवति ग्रहः ।
यदिवाऽस्तमितो मृत्युः सज्जस्यापि तदा भवेत् ॥ ६६४ ॥

लग्नस्थश्चेच्छशी सौरिर्द्वादशो नवमः कुजः ।
अष्टमोऽर्कस्तदा मृत्युः स्याच्चेन्न बलवान् गुरुः ॥ ६६५ ॥

रविः षष्ठः तृतीयो वा शशी च दशमस्थितः ।
यदा भवति मृत्युः स्यात्तृतीये दिवसे तदा ॥ ६६६ ॥

पापग्रहाश्चेदुदयात्तुर्ये वा द्वादशेऽथवा ।
दिशन्ति तद्विदो मृत्युं तृतीये दिवसे तदा ॥ ६६७ ॥

उदये पञ्चमे वाऽपि यदि पापग्रहो भवेत् ।
अष्टभिर्दशभिर्वा स्याद्दिवसैः पञ्चता तदा ॥ ६६८ ॥

धनुर्मिथुनयोः सप्तमयोर्यद्यशुभा ग्रहाः ।
तदा व्याधिर्मृतिर्वा स्याज्ज्योतिषामिति निर्णयः ॥ ६६९ ॥

अन्तस्थाधिकृतप्राणिनामप्रणवगर्भितम् ।
कोणस्थरेफमाग्नेयपुरं ज्वालाशताकुलम् ॥ ६७० ॥

सानुस्वारैरकाराद्यैः षट्स्वरैः पार्श्वतो वृतम् ।
स्वस्तिकाङ्कबहिःकोणं स्वाक्षरान्तः प्रतिष्ठितम् ॥ ६७१ ॥

चतुःपार्श्वस्थगुरुयं यन्त्रं वायुपुरावृतम् ।
कल्पयित्वा परिन्यस्येत् पादहृच्छीर्षसन्धिषु ॥ ६७२ ॥

सूर्योदयक्षणे सूर्यं पृष्ठे कृत्वा ततः सुधीः ।
स्वपरायुर्विनिश्चेतुं निजच्छायां विलोकयेत् ॥ ६७३ ॥

पूर्णां छायां यदीक्षेत तदा वर्षं न पञ्चता ।
कर्णाभावे तु पञ्चत्वं वर्षैर्द्वादशभिर्भवेत् ॥ ६७४ ॥

हस्ताङ्गुलिस्कन्धकेशपार्श्वनासाक्षये क्रमात् ।
दशाष्टसप्तपञ्चत्र्येकवर्षैर्मरणं दिशेत् ॥ ६७५ ॥

षण्मास्या म्रियते नाशे शिरसश्चिबुकस्य वा ।
ग्रीवानाशे तु मासेनैकादशाहेन दृक्क्षये ॥ ६७६ ॥

सच्छिद्रे हृदये मृत्युर्दिवसैः सप्तभिर्भवेत् ।
यदि च्छायाद्वयं पश्येद्यमपार्श्वं तदा व्रजेत् ॥ ६७७ ॥

इति यन्त्रप्रयोगेण जानीयात्कालनिर्णयम् ।
यदि वा विद्यया विन्द्याद्वक्ष्यमाणप्रकारया ॥ ६७८ ॥

प्रथमं न्यस्य चूडायां स्वाशब्दमों च मस्तके ।
क्षिं नेत्रे हृदये पञ्च नाभ्यब्जे हाक्षरं ततः ॥ ६७९ ॥

अनया विद्ययाऽष्टाग्रशतवारं विलोचने ।
स्वच्छायां चाभिमन्त्र्यार्कं पृष्ठे कृत्वाऽरुणोदये ॥ ६८० ॥

परच्छायां परकृते स्वच्छायां स्वकृते पुनः ।
सम्यक्तत्कृतपूजः सन्नुपयुक्तो विलोकयेत् ॥ ६८१ ॥

सम्पूर्णां यदि पश्येत्तामावर्षं न मृतिस्तदा ।
क्रमजङ्घाजान्वभावे त्रिद्व्येकाब्दैर्मृतिः पुनः ॥ ६८२ ॥

ऊरोरभावे दशभिर्मासैर्नश्येत्कटेः पुनः ।
अष्टभिर्नवभिर्वापि तुन्दाभावे तु पञ्चषैः ॥ ६८३ ॥

ग्रीवाऽभावे चतुस्त्रिद्व्येकमासैर्म्रियते पुनः ।
कक्षाभावे तु पक्षेण दशाहेन भुजक्षये ॥ ६८४ ॥

दिनैः स्कन्धक्षयेऽष्टाभिश्चतुर्याम्या तु हृत्क्षये ।
शीर्षाभावे तु यामाभ्यां सर्वाभावे तु तत्क्षणात् ॥ ६८५ ॥

एवमाध्यात्मिकं कालं विनिश्चेतुं प्रसङ्गतः ।
बाह्यस्यापि हि कालस्य निर्णयः परिभाषितः ॥ ६८६ ॥

को जेष्यति द्वयोर्युद्धे इति पृच्छत्यवस्थितः ।
जयः पूर्वस्य पूर्णे स्याद्रिक्ते स्यादितरस्य तु ॥ ६८७ ॥

यत्त्यजेत्संचरन् वायुस्तद्रिक्तमभिधीयते ।
संक्रमेद्यत्र तु स्थाने तत्पूर्णं कथितं बुधैः ॥ ६८८ ॥

प्रष्टाऽऽदौ नाम चेज्ज्ञातुर्गृह्णात्यन्वातुरस्य तु ।
स्यादिष्टस्य तदा सिद्धिर्विपर्यासे विपर्ययः ॥ ६८९ ॥

वामबाहुस्थिते दूते समनामाक्षरो जयेत् ।
दक्षिणाबाहुगे त्वाजौ विषमाक्षरनामकः ॥ ६९० ॥

भूतादिभिर्गृहीतानां दष्टानां वा भुजङ्गमैः ।
विधिः पूर्वोक्त एवासौ विज्ञेयः खलु मान्त्रिकैः ॥ ६९१ ॥

पूर्णा संजायते वामा विशता वरुणेन चेत् ।
कार्याण्यारभ्यमाणानि तदा सिध्यन्त्यसंशयम् ॥ ६९२ ॥

जयजीवितलाभादिकार्याणि निखिलान्यपि ।
निष्फलान्येव जायन्ते पवने दक्षिणास्थिते ॥ ६९३ ॥

ज्ञानी बुध्द्वाऽनिलं सम्यक् पुष्पं हस्तात्प्रपातयेत् ।
मृतजीवितविज्ञाने ततः कुर्वीत निश्चयम् ॥ ६९४ ॥

त्वरितो वरुणे लाभश्चिरेण तु पुरन्दरे ।
जायते पवने स्वल्पः सिद्धोऽप्यग्नौ विनश्यति ॥ ६९५ ॥

आयाति वरुणे यातः तत्रैवास्ते सुखं क्षितौ ।
प्रयाति पवनेऽन्यत्र मृत इत्यनले वदेत् ॥ ६९६ ॥

दहने युद्धपृच्छायां युद्धभङ्गश्च दारुणः ।
मृत्युः सैन्यविनाशो वा पवने जायते पुनः ॥ ६९७ ॥

महेन्द्रे विजयो युद्धे वरुणे वाञ्छिताधिकः ।
रिपुभङ्गेन सन्धिर्वा स्वसिद्धिपरिसूचकः ॥ ६९८ ॥

भौमे वर्षति पर्जन्यो वरुणे तु मनोमतम् ।
पवने दुर्दिनाम्भोदौ वह्नौ वृष्टिः कियत्यपि ॥ ६९९ ॥

वरुणे सस्यनिष्पत्तिरतिश्लाघ्या पुरन्दरे ।
मध्यस्था पवने च स्यान्न स्वल्पाऽपि हुताशने ॥ ७०० ॥

महेन्द्रवरुणौ शस्तौ गर्भप्रश्ने सुतप्रदौ ।
समीरदहनौ स्त्रीदौ शून्यं गर्भस्य नाशकम् ॥ ७०१ ॥

गृहे राजकुलादौ च प्रवेशे निर्गमेऽथवा ।
पूर्णाङ्गपादं पुरतः कुर्वतः स्यादभीप्सितम् ॥ ७०२ ॥

गुरुबन्धुनृपामात्या अन्येऽपीप्सितदायिनः ।
पूर्णाङ्गे खलु कर्तव्याः कार्यसिद्धिमभीप्सता ॥ ७०३ ॥

आसने शयने वाऽपि पूर्णाङ्गे विनिवेशिताः ।
वशीभवन्ति कामिन्यो न कार्मणमतः परम् ॥ ७०४ ॥

अरिचौराधमर्णाद्या अन्येऽप्युत्पातविग्रहाः ।
कर्तव्याः खलु रिक्ताङ्गे जयलाभसुखार्थिभिः ॥ ७०५ ॥

प्रतिपक्षप्रहारेभ्यः पूर्णाङ्गे योऽभिरक्षति ।
न तस्य रिपुभिः शक्तिर्बलिष्ठैरपि हन्यते ॥ ७०६ ॥

वहन्तीं नासिकां वामां दक्षिणां वाऽभिसंस्थितः ।
पृच्छेद्यदि तदा पुत्रो रिक्तायां तु सुता भवेत् ॥ ७०७ ॥

सुषुम्णावाहभागे द्वौ शिशू रिक्ते नपुंसकम् ।
सङ्क्रान्तौ गर्भहानिः स्यात् समे क्षेममसंशयम् ॥ ७०८ ॥

चन्द्रे स्त्री पुरुषः सूर्ये मध्यभागे नपुंसकम् ।
प्रश्नकाले तु विज्ञेयमिति कैश्चिन्निगद्यते ॥ ७०९ ॥

यदा न ज्ञायते सम्यक् पवनः संचरन्नपि ।
पीतश्वेतारुणश्यामैर्निश्चेतव्यः स बिन्दुभिः ॥ ७१० ॥

अङ्गुष्ठाभ्यां श्रुती मध्याङ्गुलीभ्यां नासिकापुटे ।
अन्त्योपान्त्याङ्गुलीभिश्च पिधाय वदनाम्बुजम् ॥ ७११ ॥

कोणावक्ष्णोर्निपीड्याद्याङ्गुलीभ्यां श्वासरोधतः ।
यथावर्णं निरीक्षेत बिन्दुमव्यग्रमानसः ॥ ७१२ ॥

पीतेन बिन्दुना भौमं सितेन वरुणं पुनः ।
कृष्णेन पवनं विन्द्यादरुणेन हुताशनम् ॥ ७१३ ॥

निरुरुत्सेद्वहन्तीं यां वामां वा दक्षिणामथ ।
तदङ्गं पीडयेत्सद्यो यथा नाडीतरा वहेत् ॥ ७१४ ॥

अग्रे वामविभागे हि शशिक्षेत्रं प्रचक्षते ।
*पृष्ठे दक्षिणभागे तु रविक्षेत्रं मनीषिणः* ॥ ७१५ ॥

लाभालाभौ सुखं दुःखं जीवितं मरणं तथा ।
विदन्ति विरलाः सम्यग् वायुसंचारवेदिनः ॥ ७१६ ॥

अखिलं वायुजन्मेदं सामर्थ्यं तस्य जायते ।
कर्तुं नाडीविशुद्धिं यः सम्यग् जानात्यमूढधीः ॥ ७१७ ॥

नाभ्यब्जकर्णिकारूढं कलाबिन्दुपवित्रितम् ।
रेफाक्रान्तं स्फुरद्भासं हकारं परिचिन्तयेत् ॥ ७१८ ॥

तं ततश्च तडिद्वेगं स्फुलिङ्गार्चिःशताञ्चितम् ।
रेचयेत्सूर्यमार्गेण प्रापयेच्च नभस्तलम् ॥ ७१९ ॥

अमृतैः प्लावयन्तं तमवतार्य शनैस्ततः ।
चन्द्राभं चन्द्रमार्गेण नाभिपद्मे निवेशयेत् ॥ ७२० ॥

निष्क्रमं च प्रवेशं च यथामार्गमनारतम् ।
कुर्वन्नेवं महाभ्यासो नाडीशुद्धिमवाप्नुयात् ॥ ७२१ ॥

नाडीशुद्धाविति प्राज्ञः संपन्नाभ्यासकौशलः ।
स्वेच्छया घटयेद्वायुं पुटयोस्तत्क्षणादपि ॥ ७२२ ॥

द्वे एव घटिके सार्धे एकस्यामवतिष्ठते ।
तामुत्सृज्यापरां नाडीमधितिष्ठति मारुतः ॥ ७२३ ॥

षट्शताभ्यधिकान्याहुः सहस्राण्येकविंशतिम् ।
अहोरात्रे नरि स्वस्थे प्राणवायोर्गमागमम् ॥ ७२४ ॥

मुग्धधीर्यः समीरस्य संक्रान्तिमपि वेत्ति न ।
तत्त्वनिर्णयवार्तां स कथं कर्तुं प्रवर्तते ॥ ७२५ ॥

पूरितं पूरकेणाधोमुखं हृत्पद्ममुन्मिषेत् ।
ऊर्ध्वश्रोतो भवेत्तच्च कुम्भकेन प्रबोधितम् ॥ ७२६ ॥

आक्षिप्य रेचकेनाथ कर्षेद्वायुं हृदम्बुजात् ।
ऊर्ध्वश्रोतःपथग्रन्थिं भित्त्वा ब्रह्मपुरं नयेत् ॥ ७२७ ॥

ब्रह्मरन्ध्रान्निष्क्रमय्य योगी कृतकुतूहलः ।
समाधितोऽर्कतूलेषु वेधं कुर्याच्छनैः शनैः ॥ ७२८ ॥

मुहुस्तत्र कृताभ्यासो मालतीमुकुलादिषु ।
स्थिरलक्ष(क्ष्य)तया वेधं सदा कुर्यादतन्द्रितः ॥ ७२९ ॥

दृढाभ्यासस्ततः कुर्याद्वेधं वरुणवायुना ।
कर्पूरागरुकुष्ठादिगन्धद्रव्येषु सर्वतः ॥ ७३० ॥

एतेषु लब्धलक्षो(क्ष्यो)ऽथ वायुसंयोजने पटुः ।
पक्षिकायेषु सूक्ष्मेषु विदध्याद्वेधमुद्यतः ॥ ७३१ ॥

पतङ्गभृङ्गकायेषु जाताभ्यासो मृगेष्वपि ।
अनन्यमानसो धीरः संचरेद्विजितेन्द्रियः ॥ ७३२ ॥

नराश्वकरिकायेषु प्रविशन्निःसरन्निति ।
कुर्वीत संक्रमं पुस्तोपलरूपेष्वपि क्रमात् ॥ ७३३ ॥

एवं परासुदेहेषु प्रविशेद्वामनासया ।
जीवद्देहप्रवेशस्तु नोच्यते पापशङ्कया ॥ ७३४ ॥

क्रमेणैवं परपुरप्रवेशाभ्यासशक्तितः ।
विमुक्त इव निर्लेपः स्वेच्छया संचरेत् सुधीः ॥ ७३५ ॥

## अथ षष्ठः प्रकाशः

इह चायं परपुरप्रवेशश्चित्रमात्रकृत् ।
सिध्येन्न वा प्रयासेन कालेन महताऽपि हि ॥ ७३६ ॥

जित्वाऽपि पवनं नानाकरणैः क्लेशकारणैः ।
नाडीप्रचारमायत्तं विधायापि वपुर्गतम् ॥ ७३७ ॥

अश्रद्धेयं परपुरे साधयित्वाऽपि संक्रमम् ।
विज्ञानैकप्रसक्तस्य मोक्षमार्गो न सिध्यति ॥ ७३८ ॥

तन्नाप्नोति मनःस्वास्थ्यं प्राणायामैः कदर्थितम् ।
प्राणस्यायमने पीडा तस्यां स्याच्चित्तविप्लवः ॥ ७३९ ॥

पूरणे कुम्भने चैवं रेचने च परिश्रमः ।
चित्तसंक्लेशकरणान्मुक्तेः प्रत्यूहकारणम् ॥ ७४० ॥

इन्द्रियैः सममाकृष्य विषयेभ्यः प्रशान्तधीः ।
धर्मध्यानकृते तस्मान्मनः कुर्वीत निश्चलम् ॥ ७४१ ॥

नाभिहृदयनासाग्रभालभ्रूतालुदृष्टयः ।
मुखं कर्णौ शिरश्चेति ध्यानस्थानान्यकीर्तयन् ॥ ७४२ ॥

एषामेकत्र कुत्रापि स्थाने स्थापयतो मनः ।
उत्पद्यन्ते स्वसंवित्तेर्बहवः प्रत्ययाः किल ॥ ७४३ ॥

## अथ सप्तमः प्रकाशः

*ध्यानं विधित्सता* ज्ञेयं ध्याता ध्येयं तथा फलम् ।
सिध्यन्ति न हि सामग्रीं विना कार्याणि कर्हिचित् ॥ ७४४ ॥

अमुञ्चन् प्राणनाशेऽपि संयमैकधूरीणताम् ।
परमप्यात्मवत् पश्यन् स्वस्वरूपापरिच्युतः ॥ ७४५ ॥

उपतापमसंप्राप्तः शीतवातातपादिभिः ।
पिपासुरमरीकारि योगामृतरसायनम् ॥ ७४६ ॥

रागादिभिरनाक्रान्तं क्रोधादिभिरदूषितम् ।
आत्मारामं मनः कुर्वन्निर्लेपः सर्वकर्मसु ॥ ७४७ ॥

विरत: कामभोगेभ्य: स्वशरीरेऽपि नि:स्पृह: ।
संवेगह्रदनिर्मग्न: सर्वत्र समतां श्रयन् ॥ ७४८ ॥

नरेन्द्रे वा दरिद्रे वा तुल्यकल्याणकामन: ।
अमात्रकरुणापात्रं भवसौख्यपराङ्मुख: ॥ ७४९ ॥

सुमेरुरिव निष्कम्प: शशीवानन्ददायक: ।
समीर इव नि:सङ्ग: सुधीर्ध्याता प्रशस्यते ॥ ७५० ॥

पिण्डस्थं च पदस्थं च रूपस्थं रूपवर्जितम् ।
चतुर्धा ध्येयमाम्नातं ध्यानस्यालम्बनं बुधै: ॥ ७५१ ॥

पार्थिवी स्यादथाग्नेयी मारुती वारुणी तथा ।
तत्रभू: पञ्चमी चेति पिण्डस्थे पञ्च धारणा: ॥ ७५२ ॥

तिर्यग्लोकसमं ध्यायेत् क्षीराब्धिं तत्र चाम्बुजम् ।
सहस्रपत्रं स्वर्णाभं जम्बूद्वीपसमं स्मरेत् ॥ ७५३ ॥

तत्केसरततेरन्त: स्फुरत्पिङ्गप्रभाञ्चिताम् ।
स्वर्णाचलप्रमाणां च कर्णिकां परिचिन्तयेत् ॥ ७५४ ॥

श्वेतसिंहासनासीनं कर्मनिर्मूलनोद्यतम् ।
आत्मानं चिन्तयेत्तत्र पार्थिवी धारणेत्यसौ ॥ ७५५ ॥

विचिन्तयेत्तथा नाभौ कमलं षोडशच्छदम् ।
कर्णिकायां महामन्त्रं प्रतिपत्रं स्वरावलिम् ॥ ७५६ ॥

रेफबिन्दुकलाक्रान्तं महामन्त्रे यदक्षरम् ।
तस्य रेफाद्विनिर्यान्तीं शनैर्धूमशिखां स्मरेत् ॥ ७५७ ॥

स्फुलिङ्गसंतर्तिं ध्यायेज्ज्वालमालामनन्तरम् ।
ततो ज्वालाकलापेन दहेत् पद्मं हृदि स्थितम् ॥ ७५८ ॥

तदष्टकर्मनिर्माणमष्टपत्रमधोमुखम् ।
दहत्येव महामन्त्रध्यानोत्थ: प्रबलानल: ॥ ७५९ ॥

ततो देहाद् बहिर्ध्यायेत् त्र्यस्रं वह्निपुरं ज्वलत् ।
लाञ्छितं स्वस्तिकेनान्ते वह्निबीजसमन्वितम् ॥ ७६० ॥

देहं पद्मं च मन्त्रार्चिरन्तर्वह्निपुरं बहिः ।
कृत्वाऽऽशु भस्मसाच्छाम्येत्स्यादाग्नेयीति धारणा ॥ ७६१ ॥

ततस्त्रिभुवनाभोगं पूरयन्तं समीरणम् ।
चालयन्तं गिरीनब्धीन् क्षोभयन्तं विचिन्तयेत् ॥ ७६२ ॥

तच्च भस्मरजस्तेन शीघ्रमुध्दूय वायुना ।
दृढाभ्यासः प्रशान्तिं तमानयेदिति मारुती ॥ ७६३ ॥

स्मरेद्वर्षत्सुधासारैर्घनमालाकुलं नभः ।
ततोऽर्धेन्दुसमाक्रान्तं मण्डलं वारुणाङ्कितम् ॥ ७६४ ॥

नभस्तलं सुधाम्भोभिः प्लावयेत्तत्पुरं ततः ।
तद्रजः कायसंभूतं क्षालयेदिति वारुणी ॥ ७६५ ॥

सप्तधातुविनाभूतं पूर्णेन्दुविशदद्युतिम् ।
सर्वज्ञकल्पमात्मानं शुद्धबुद्धिः स्मरेत्ततः ॥ ७६६ ॥

ततः सिंहासनारूढं सर्वातिशयभासुरम् ।
विध्वस्ताशेषकर्माणं कल्याणमहिमान्वितम् ॥ ७६७ ॥

स्वाङ्गगर्भेनिराकारं संस्मरेदिति तत्रभूः ।
साभ्यास इति पिण्डस्थे योगी शिवसुखं भजेत् ॥ ७६८ ॥

अश्रान्तमिति पिण्डस्थे कृताभ्यासस्य योगिनः ।
प्रभवन्ति न दुर्विद्या मन्त्रमण्डलशक्तयः ॥ ७६९ ॥

शाकिन्यः क्षुद्रयोगिन्यः पिशाचाः पिशिताशनाः ।
त्रस्यन्ति तत्क्षणादेव तस्य तेजोऽसहिष्णवः ॥ ७७० ॥

दुष्टाः करटिनः सिंहाः शरभाः पन्नगा अपि ।
जिघांसवोऽपि तिष्ठन्ति स्तम्भिता इव दूरतः ॥ ७७१ ॥

## अथाष्टमः प्रकाशः

यत्पदानि पवित्राणि समालम्ब्य विधीयते ।
तत्पदस्थं समाख्यातं ध्यानं सिद्धान्तपारगैः ॥ ७७२ ॥

तत्र षोडशपत्राढ्ये नाभिकन्दगतेऽम्बुजे ।
स्वरमालां यथापत्रं भ्रमन्तीं परिचिन्तयेत् ॥ ७७३ ॥

चतुर्विंशतिपत्रं च हृदि पद्मं सकर्णिकम् ।
वर्णान् यथाक्रमं तत्र चिन्तयेत् पञ्चविंशतिम् ॥ ७७४ ॥

वक्त्राब्जेऽष्टदले वर्णाष्टकमन्यत्ततः स्मरेत् ।
संस्मरन्मातृकामेवं स्याच्छ्रुतज्ञानपारगः ॥ ७७५ ॥

ध्यायतोऽनादिसंसिद्धान् वर्णानेतान् यथाविधि ।
नष्टादिविषये ज्ञानं ध्यातुरुत्पद्यते क्षणात् ॥ ७७६ ॥

अथवा नाभिकन्दाधः पद्ममष्टदलं स्मरेत् ।
स्वरालीकेसरं रम्यं वर्गाष्टकयुतैर्दलैः ॥ ७७७ ॥

दलसन्धिषु सर्वेषु सिद्धस्तुतिविराजितम् ।
दलाग्रेषु समग्रेषु मायाप्रणवपावितम् ॥ ७७८ ॥

तस्यान्तरन्तिमं वर्णमाद्यवर्णपुरस्कृतम् ।
रेफाक्रान्तं कलाबिन्दुरम्यं प्रालेयनिर्मलम् ॥ ७७९ ॥

अर्हमित्यक्षरं प्राणप्रान्तसंस्पर्शि पावनम् ।
ह्रस्वं दीर्घं प्लुतं सूक्ष्ममतिसूक्ष्मं ततः परम् ॥ ७८० ॥

ग्रन्थीन् विदारयन्नाभिकन्दहृद्घण्टिकादिकान् ।
सुसूक्ष्मध्वनिना मध्यमार्गयायि स्मरेत्ततः ॥ ७८१ ॥

अथ तस्यान्तरात्मानं प्लाव्यमानं विचिन्तयेत् ।
बिन्दुतप्तकलानिर्यत्क्षीरगौरामृतोर्मिभिः ॥ ७८२ ॥

ततः सुधासरःसूतषोडशाब्जदलोदरे ।
आत्मानं न्यस्य पत्रेषु विद्यादेवीश्च षोडश ॥ ७८३ ॥

स्फुटस्फटिकभृङ्गारक्षरत्क्षीरसितामृतैः ।
आभिराप्लाव्यमानं स्वं चिरं चित्ते विचिन्तयेत् ॥ ७८४ ॥

अथास्य मन्त्रराजस्याभिधेयं परमेष्ठिनम् ।
अर्हन्तं मूर्धनि ध्यायेत् शुद्धस्फटिकनिर्मलम् ॥ ७८५ ॥

तद्ध्यानावेशतः सोऽहं सोऽहमित्यालपन्मुहुः ।
निःशङ्कमेकतां विन्द्यादात्मनः परमात्मना ॥ ७८६ ॥

ततो नीरागमद्वेषममोहं सर्वदर्शिनम् ।
सुरार्च्यं समवसृतौ कुर्वाणं धर्मदेशनाम् ॥ ७८७ ॥

ध्यायन्नात्मानमेवेत्थमभिन्नं परमात्मना ।
लभते परमात्मत्वं ध्यानी निर्धूतकल्मषः ॥ ७८८ ॥

यद्वा मन्त्राधिपं धीमानूर्ध्वाधोरेफसंयुतम् ।
कलाबिन्दुसमाक्रान्तमनाहतयुतं तथा ॥ ७८९ ॥

कनकाम्भोजगर्भस्थं सान्द्रचन्द्रांशुनिर्मलम् ।
गगने संचरन्तं च व्याप्नुवन्तं दिशः स्मरेत् ॥ ७९० ॥

ततो विशन्तं वक्त्राब्जे भ्रमन्तं भ्रूलतान्तरे ।
स्फुरन्तं नेत्रपत्रेषु तिष्ठन्तं भालमण्डले ॥ ७९१ ॥

निर्यान्तं तालुरन्ध्रेण स्रवन्तं च सुधारसम् ।
स्पर्धमानं शशाङ्केन स्फुरन्तं ज्योतिरन्तरे ॥ ७९२ ॥

संचरन्तं नभोभागे योजयन्तं शिवश्रिया ।
सर्वावयवसंपूर्णं कुम्भकेन विचिन्तयेत् ॥ ७९३ ॥

महातत्त्वमिदं योगी यदैव ध्यायति स्थिरः ।
तदैवानन्दसंपद्भूर्मुक्तिश्रीरुपतिष्ठते ॥ ७९४ ॥

रेफबिन्दुकलाहीनं शुभ्रं ध्यायेत्ततोऽक्षरम् ।
ततोऽनक्षरतां प्राप्तमनुच्चार्यं विचिन्तयेत् ॥ ७९५ ॥

निशाकरकलाकारं सूक्ष्मं भास्करभास्वरम् ।
अनाहताभिधं देवं विस्फुरन्तं विचिन्तयेत् ॥ ७९६ ॥

तदेव च क्रमात्सूक्ष्मं ध्यायेद्वालाग्रसन्निभम् ।
क्षणमव्यक्तमीक्षेत जगज्ज्योतिर्मयं ततः ॥ ७९७ ॥

प्रच्याव्यमानसंलक्ष्यादलक्ष्ये दधतः स्थिरम् ।
ज्योतिरक्षयमत्यक्षमन्तरुन्मीलति क्रमात् ॥ ७९८ ॥

इति लक्ष्यं समालम्ब्य लक्ष्यभावः प्रकाशितः ।
निषण्णमनसस्तत्र सिध्यत्यभिमतं मुनेः ॥ ७९९ ॥

तथा हृत्पद्ममध्यस्थं शब्दब्रह्मैककारणम् ।
स्वरव्यञ्जनसंवीतं वाचकं परमेष्ठिनः ॥ ८०० ॥

मूर्धसंस्थितशीतांशुकलामृतरसप्लुतम् ।
कुम्भकेन महामन्त्रं प्रणवं परिचिन्तयेत् ॥ ८०१ ॥

पीतं स्तम्भेऽरुणं वश्ये क्षोभणे विद्रुमप्रभम् ।
कृष्णं विद्वेषणे ध्यायेत् कर्मघाते शशिप्रभम् ॥ ८०२ ॥

तथा पुण्यतमं मन्त्रं जगत्त्रितयपावनम् ।
योगी पञ्चपरमेष्ठिनमस्कारं विचिन्तयेत् ॥ ८०३ ॥

अष्टपत्रे सिताम्भोजे कर्णिकायां कृतस्थितिम् ।
आद्यं सप्ताक्षरं मन्त्रं पवित्रं चिन्तयेत्ततः ॥ ८०४ ॥

सिद्धादिकचतुष्कं च दिक्पत्रेषु यथाक्रमम् ।
चूलापादचतुष्कं च विदिक्पत्रेषु चिन्तयेत् ॥ ८०५ ॥

त्रिशुद्ध्या चिन्तयंस्तस्य शतमष्टोत्तरं मुनिः ।
भुञ्जानोऽपि लभेतैव चतुर्थतपसः फलम् ॥ ८०६ ॥

एवमेव महामन्त्रं समाराध्येह योगिनः ।
त्रिलोक्याऽपि महीयन्तेऽधिगताः परमां श्रियम् ॥ ८०७ ॥

कृत्वा पापसहस्राणि हत्वा जन्तुशतानि च ।
अमुं मन्त्रं समाराध्य तिर्यञ्चोऽपि दिवं गताः ॥ ८०८ ॥

गुरुपञ्चकनामोत्था विद्या स्यात् षोडशाक्षरा ।
जपन् शतद्वयं तस्याश्चतुर्थस्याप्नुयात्फलम् ॥ ८०९ ॥

शतानि त्रीणि षड्वर्णं चत्वारि चतुरक्षरम् ।
पञ्चावर्णं जपन् योगी चतुर्थफलमश्नुते ॥ ८१० ॥

प्रवृत्तिहेतुरेवैतदमीषां कथितं फलम् ।
फलं स्वर्गापवर्गौ तु वदन्ति परमार्थतः ॥ ८११ ॥

पञ्चवर्णमयी पञ्चतत्त्वा विद्योध्दृता श्रुतात् ।
अभ्यस्यमाना सततं भवक्लेशं निरस्यति ॥ ८१२ ॥

मङ्गलोत्तमशरणपदान्यव्यग्रमानसः ।
चतुःसमाश्रयाण्येव स्मरन् मोक्षं प्रपद्यते ॥ ८१३ ॥

मुक्तिसौख्यप्रदां ध्यायेद्विद्यां पञ्चदशाक्षराम् ।
सर्वज्ञाभं स्मरेन्मन्त्रं सर्वज्ञानप्रकाशकम् ॥ ८१४ ॥

वक्तुं न कश्चिदप्यस्य प्रभावं सर्वतः क्षमः ।
समं भगवता साम्यं सर्वज्ञेन बिभर्ति यः ॥ ८१५ ॥

यदीच्छेद्भवदावाग्नेः समुच्छेदं क्षणादपि ।
स्मरेत्तदादिमन्त्रस्य वर्णसप्तकमादिमम् ॥ ८१६ ॥

पञ्चवर्णं स्मरेन्मन्त्रं कर्मनिर्घातकं तथा ।
वर्णमालाञ्चितं मन्त्रं ध्यायेत्सर्वाभयप्रदम् ॥ ८१७ ॥

ध्यायेत्सिताब्जं वक्त्रान्तरष्टवर्गीं दलाष्टके ।
ओं नमो अरिहंताणमिति वर्णानपि क्रमात् ॥ ८१८ ॥

केसरालीं स्वरमयीं सुधाबिन्दुविभूषिताम् ।
कर्णिकां कर्णिकायां च चन्द्रबिम्बात्समापतत् ॥ ८१९ ॥

संचरमाणं वक्त्रेण प्रभामण्डलमध्यगम् ।
सुधादीधितिसंकाशं मायाबीजं विचिन्तयेत् ॥ ८२० ॥

ततो भ्रमन्तं पत्रेषु संचरन्तं नभस्तले ।
ध्वंसयन्तं मनोध्वान्तं स्रवन्तं च सुधारसम् ॥ ८२१ ॥

तालुरन्ध्रेण गच्छन्तं लसन्तं भ्रूलतान्तरे ।
त्रैलोक्याचिन्त्यमाहात्म्यं ज्योतिर्मयमिवाद्भुतम् ॥ ८२२ ॥

इत्यमुं ध्यायतो मन्त्रं पुण्यमेकाग्रचेतसः ।
वाग्मनोमलमुक्तस्य श्रुतज्ञानं प्रकाशते ॥ ८२३ ॥

मासैः षड्भिः कृताभ्यासः स्थिरीभूतमनास्ततः ।
निःसरन्तीं मुखाम्भोजाच्छिखां धूमस्य पश्यति ॥ ८२४ ॥

संवत्सरं कृताभ्यासस्ततो ज्वालां विलोकते ।
ततः संजातसंवेगः सर्वज्ञमुखपङ्कजम् ॥ ८२५ ॥

स्फुरत्कल्याणमाहात्म्यं संपन्नातिशयं ततः ।
भामण्डलगतं साक्षादिव सर्वज्ञमीक्षते ॥ ८२६ ॥

ततः स्थिरीकृतस्वान्तस्तत्र संजातनिश्चयः ।
मुक्त्वा संसारकान्तारमध्यास्ते सिद्धिमन्दिरं ॥ ८२७ ॥

शशिबिम्बादिवोद्भूतां स्रवन्तीममृतं सदा ।
विद्यां क्ष्वीं इति भालस्थां ध्यायेत्कल्याणकारणम् ॥ ८२८ ॥

क्षीराम्भोधेर्विनिर्यान्तीं प्लावयन्तीं सुधाम्बुभिः ।
भाले शशिकलां ध्यायेत् सिद्धिसोपानपद्धतिम् ॥ ८२९ ॥

अस्याः स्मरणमात्रेण त्रुट्यद्भवनिबन्धनः ।
प्रयाति परमानन्दकारणं पदमव्ययम् ॥ ८३० ॥

नासाग्रे प्रणवः शून्यमनाहतमिति त्रयम् ।
ध्यायन् गुणाष्टकं लब्ध्वा ज्ञानमाप्नोति निर्मलम् ॥ ८३१ ॥

शङ्खकुन्दशशाङ्काभांस्त्रीनमून् ध्यायतः सदा ।
समग्रविषयज्ञानप्रागल्भ्यं जायते नृणाम् ॥ ८३२ ॥

द्विपार्श्वप्रणवद्वन्द्वं प्रान्तयोर्मायया वृतम् ।
सोऽहं मध्ये विमूर्धानं अर्हम्लींकारं विचिन्तयेत् ॥ ८३३ ॥

कामधेनुमिवाचिन्त्यफलसंपादनक्षमाम् ।
अनवद्यां जपेद्विद्यां गणभृद्वदनोद्गताम् ॥ ८३४ ॥

षट्कोणेऽप्रतिचक्रे फडिति प्रत्येकमक्षरम् ।
सव्ये न्यसेद्विचक्राय स्वाहा बाह्येऽपसव्यतः ॥ ८३५ ॥

भूतान्तं बिन्दुसंयुक्तं तन्मध्ये न्यस्य चिन्तयेत् ।
नमो जिणाणमित्याद्यैरोंपूर्वैर्वेष्टयेद् बहिः ॥ ८३६ ॥

अष्टपत्रेऽम्बुजे ध्यायेदात्मानं दीप्रतेजसम् ।
प्रणवाद्यस्य मन्त्रस्य वर्णान् पत्रेषु च क्रमात् ॥ ८३७ ॥

पूर्वाशाभिमुखः पूर्वमधिकृत्यादिमण्डलम् ।
एकादशशतान्यष्टाक्षरं मन्त्रं जपेत्ततः ॥ ८३८ ॥

पूर्वाशानुक्रमादेवमुद्दिश्यान्यदलान्यपि ।
अष्टरात्रं जपेद्योगी सर्वप्रत्यूहशान्तये ॥ ८३९ ॥

अष्टरात्रे व्यतिक्रान्ते कमलस्यास्य वर्तिनः ।
निरूपयति पत्रेषु वर्णानेताननुक्रमम् ॥ ८४० ॥

भीषणाः सिंहमातङ्गरक्षः प्रभृतयः क्षणात् ।
शाम्यन्ति व्यन्तराश्चान्ये ध्यानप्रत्यूहहेतवः ॥ ८४१ ॥

मन्त्रः प्रणवपूर्वोऽयं फलमैहिकमिच्छुभिः ।
ध्येयः प्रणवहीनस्तु निर्वाणपदकाङ्क्षिभिः ॥ ८४२ ॥

चिन्तयेदन्यमप्येनं मन्त्रं कर्मौघशान्तये ।
स्मरेत्सत्त्वोपकाराय विद्यां तां पापभक्षिणीम् ॥ ८४३ ॥

प्रसीदति मनः सद्यः पापकालुष्यमुज्झति ।
प्रभावातिशयादस्या ज्ञानदीपः प्रकाशते ॥ ८४४ ॥

ज्ञानवद्भिः समाम्नातं वज्रस्वाम्यादिभिः स्फुटम् ।
विद्यावादात्समुध्दृत्य बीजभूतं शिवश्रियः ॥ ८४५ ॥

जन्मदावहुताशस्य प्रशान्तिनववारिदम् ।
गुरूपदेशाद्विज्ञाय सिद्धचक्रं विचिन्तयेत् ॥ ८४६ ॥

नाभिपद्मे स्थितं ध्यायेदकारं विश्वतोमुखम् ।
सिवर्णं मस्तकाम्भोजे आकारं वदनाम्बुजे ॥ ८४७ ॥

उकारं हृदयाम्भोजे साकारं कण्ठपङ्कजे ।
सर्वकल्याणकारीणि बीजान्यन्यान्यपि स्मरेत् ॥ ८४८ ॥

श्रुतसिन्धुसमुद्भूतमन्यदप्यक्षरं पदम् ।
अशेषं ध्यायमानं स्यान्निर्वाणपदसिद्धये ॥ ८४९ ॥

वीतरागो भवेद्योगी यत्किञ्चिदपि चिन्तयेत् ।
तदेव ध्यानमाम्नातमतोऽन्ये ग्रन्थविस्तराः ॥ ८५० ॥

एवं च मन्त्रविद्यानां वर्णेषु च पदेषु च ।
विश्लेषः क्रमशः कुर्याल्लक्ष्मीभावोपपत्तये ॥ ८५१ ॥

इति गणधरधुर्याविष्कृतादुध्दृतानि, प्रवचनजलराशेस्तत्त्वरत्नान्यमूनि ।
हृदयमुकुरमध्ये धीमतामुल्लसन्तु, प्रचितभवशतोत्थक्लेशनिर्नाशहेतोः॥ ८५२ ॥

## अथ नवमः प्रकाशः

मोक्षश्रीसम्मुखीनस्य विध्वस्ताखिलकर्मणः ।
चतुर्मुखस्य निःशेषभुवनाभयदायिनः ॥ ८५३ ॥

इन्दुमण्डलसंकाशच्छत्रत्रितयशालिनः ।
लसद्भामण्डलाभोगविडम्बितविवस्वतः ॥ ८५४ ॥

दिव्यदुन्दुभिनिर्घोषगीतसाम्राज्यसम्पदः ।
रणद्द्विरेफझङ्कारमुखराशोकशोभिनः ॥ ८५५ ॥

सिंहासननिषण्णस्य वीज्यमानस्य चामरैः ।
सुरासुरशिरोरत्नदीप्रपादनखद्युतेः ॥ ८५६ ॥

दिव्यपुष्पोत्कराकीर्णासङ्कीर्णपरिषद्भुवः ।
उत्कन्धरैर्मृगकुलैः पीयमानकलध्वनेः ॥ ८५७ ॥

शान्तवैरेभसिंहादिसमुपासितसन्निधेः ।
प्रभोः समवसरणस्थितस्य परमेष्ठिनः ॥ ८५८ ॥

सर्वातिशययुक्तस्य केवलज्ञानभास्वतः ।
अर्हतो रूपमालम्ब्य ध्यानं पदस्थमुच्यते ॥ ८५९ ॥

रागद्वेषमहामोहविकारैरकलङ्कितम् ।
शान्तं कान्तं मनोहारि सर्वलक्षणलक्षितम् ॥ ८६० ॥

तीर्थिकैरपरिज्ञातयोगमुद्रामनोरमम् ।
अक्ष्णोरमन्दमानन्दनिःस्यन्दं ददद‌द्भुतम् ॥ ८६१ ॥

जिनेन्द्रप्रतिमारूपमपि निर्मलमानसः ।
निर्निमेषदृशा ध्यायन् रूपस्थध्यानवान् भवेत् ॥ ८६२ ॥

योगी चाभ्यासयोगेन तन्मयत्वमुपागतः ।
सर्वज्ञीभूतमात्मानमवलोकयति स्फुटम् ॥ ८६३ ॥

सर्वज्ञो भगवान् योऽयमहमेवास्मि स ध्रुवम् ।
एवं तन्मयतां यातः सर्ववेदीति मन्यते ॥ ८६४ ॥

वीतरागो विमुच्येत वीतरागं विचिन्तयन् ।
रागिणं तु समालम्ब्य रागी स्यात्क्षोभणादिकृत् ॥ ८६५ ॥

येन येन हि भावेन युज्यते यन्त्रवाहकः ।
तेन तन्मयतां याति विश्वरूपो मणिर्यथा ॥ ८६६ ॥

नासध्द्यानानि सेव्यानि कौतुकेनापि किन्त्विह ।
स्वनाशायैव जायन्ते सेव्यमानानि तानि यत् ॥ ८६७ ॥

सिध्यन्ति सिद्धयः सर्वाः स्वयं मोक्षावलम्बिनाम् ।
संदिग्धा सिद्धिरन्येषां स्वार्थभ्रंशस्तु निश्चितः ॥ ८६८ ॥

## अथ दशमः प्रकाशः

अमूर्त्तस्य चिदानन्दरूपस्य परमात्मनः ।
निरञ्जनस्य सिद्धस्य ध्यानं स्याद्रूपवर्जितम् ॥ ८६९ ॥

इत्यजस्रं स्मरन् योगी तत्स्वरूपावलम्बनः ।
तन्मयत्वमवाप्नोति ग्राह्यग्राहकवर्जितम् ॥ ८७० ॥

अनन्यशरणीभूय स तस्मिन् लीयते तथा ।
ध्यातृध्यानोभयाभावे ध्येयेनैक्यं यथा व्रजेत् ॥ ८७१ ॥

सोऽयं समरसीभावस्तदेकीकरणं मतम् ।
आत्मा यदपृथक्त्वेन लीयते परमात्मनि ॥ ८७२ ॥

अलक्ष्यं लक्ष्यसंबन्धात् स्थूलात्सूक्ष्मं विचिन्तयेत् ।
सालम्बाच्च निरालम्बं तत्त्ववित्तत्त्वमञ्जसा ॥ ८७३ ॥

एवं चतुर्विधध्यानामृतमग्नं मुनेर्मनः ।
साक्षात्कृतजगत्तत्त्वं विधत्ते शुद्धिमात्मनः ॥ ८७४ ॥

आज्ञापायविपाकानां संस्थानस्य च चिन्तनात् ।
इत्थं वा ध्येयभेदेन धर्म्यं ध्यानं चतुर्विधम् ॥ ८७५ ॥

आज्ञां यत्र पुरस्कृत्य सर्वज्ञानामबाधिताम् ।
तत्त्वतश्चिन्तयेदर्थांस्तदाज्ञाध्यानमुच्यते ॥ ८७६ ॥

सर्वज्ञवचनं सूक्ष्मं हन्यते यत्र हेतुभिः ।
तदाज्ञारूपमादेयं न मृषाभाषिणो जिनाः ॥ ८७७ ॥

रागद्वेषकषायाद्यैर्जायमानान् विचिन्तयेत् ।
यत्रापायांस्तदपायविचयध्यानमिष्यते ॥ ८७८ ॥

ऐहिकामुष्मिकापायपरिहारपरायणः ।
ततः प्रतिनिवर्तेत समन्तात् पापकर्मणः ॥ ८७९ ॥

प्रतिक्षणसमुद्भूतो यत्र कर्मफलोदयः ।
चिन्त्यते चित्ररूपः स विपाकविचयो मतः ॥ ८८० ॥

या संपदाऽर्हतो या च विपदा नारकात्मनः ।
एकातपत्रता तत्र पुण्यापुण्यस्य कर्मणः ॥ ८८१ ॥

अनाद्यन्तस्य लोकस्य स्थित्युत्पत्तिव्ययात्मनः ।
आकृतिं चिन्तयेद्यत्र संस्थानविचयः स तु ॥ ८८२ ॥

नानाद्रव्यगतानन्तपर्यायपरिवर्तनात् ।
सदा सक्तं मनो नैव रागाद्याकुलतां व्रजेत् ॥ ८८३ ॥

धर्मध्याने भवेद्भावः क्षायोपशमिकादिकः ।
लेश्याः क्रमविशुद्धाः स्युः पीतपद्मसिताः पुनः ॥ ८८४ ॥

अस्मिन्नितान्तवैराग्यव्यतिषङ्गतरङ्गिते ।
जायते देहिनां सौख्यं स्वसंवेद्यमतीन्द्रियम् ॥ ८८५ ॥

त्यक्तसङ्गास्तनुं त्यक्त्वा धर्मध्यानेन योगिनः ।
ग्रैवेयकादिस्वर्गेषु भवन्ति त्रिदशोत्तमाः ॥ ८८६ ॥

महामहिमसौभाग्यं शरच्चन्द्रनिभप्रभम् ।
प्राप्नुवन्ति वपुस्तत्र स्रग्भूषाम्बरभूषितम् ॥ ८८७ ॥

विशिष्टवीर्यबोधाढ्यं कामार्तिज्वरवर्जितम् ।
निरन्तरायं सेवन्ते सुखं चानुपमं चिरम् ॥ ८८८ ॥

इच्छासंपन्नसर्वार्थमनोहारि सुखामृतम् ।
निर्विघ्नमुपभुञ्जाना गतं जन्म न जानते ॥ ८८९ ॥

दिव्यभोगावसाने च च्युत्वा त्रिदिवतस्ततः ।
उत्तमेन शरीरेणावतरन्ति महीतले ॥ ८९० ॥

दिव्यवंशे समुत्पन्ना नित्योत्सवमनोरमान् ।
भुञ्जते विविधान् भोगानखण्डितमनोरथाः ॥ ८९१ ॥

ततो विवेकमाश्रित्य विरज्याशेषभोगतः ।
ध्यानेन ध्वस्तकर्माणः प्रयान्ति पदमव्ययम् ॥ ८९२ ॥

## अथैकादशः प्रकाशः

स्वर्गापवर्गहेतुर्धर्मध्यानमिति कीर्तितं तावत् ।
अपवर्गैकनिदानं शुक्लमतः कीर्त्यते ध्यानम् ॥ ८९३ ॥

इदमादिमसंहनना एवालं पूर्ववेदिनः कर्तुम् ।
स्थिरतां न याति चित्तं कथमपि यत्स्वल्पसत्त्वानाम् ॥ ८९४ ॥

धत्ते न खलु स्वास्थ्यं व्याकुलितं तनुमतां मनोविषयैः ।
शुक्लध्याने तस्मान्नास्त्यधिकारोऽल्पसाराणाम् ॥ ८९५ ॥

अनवच्छित्त्याम्नायः समागतोऽस्येति कीर्त्यतेऽस्माभिः ।
दुष्करमप्याधुनिकैः शुक्लध्यानं यथाशास्त्रम् ॥ ८९६ ॥

ज्ञेयं नानात्वश्रुतविचारमैक्यश्रुताविचारं च ।
सूक्ष्मक्रियमुत्सन्नक्रियमिति भेदैश्चतुर्धा तत् ॥ ८९७ ॥

एकत्र पर्ययाणां विविधनयानुसरणं श्रुताद् द्रव्ये ।
अर्थव्यञ्जनयोगान्तरेषु संक्रमणयुक्तमाद्यं तत् ॥ ८९८ ॥

एवं श्रुतानुसारादेकत्ववितर्कमेकपर्याये ।
अर्थव्यञ्जनयोगान्तरेष्वसंक्रमणमन्यत्तु ॥ ८९९ ॥

निर्वाणगमनसमये केवलिनो दरनिरुद्धयोगस्य ।
सूक्ष्मक्रियाप्रतिपाति तृतीयं कीर्तितं शुक्लम् ॥ १०० ॥

केवलिनः शैलेशीगतस्य शैलवदकम्पनीयस्य ।
उत्सन्नक्रियमप्रतिपाति तुरीयं परमशुक्लम् ॥ १०१ ॥

एकत्रियोगभाजामाद्यं स्यादपरमेकयोगानाम् ।
तनुयोगिनां तृतीयं निर्योगाणां चतुर्थं तु ॥ १०२ ॥

छद्मस्थितस्य यद्वन्मनः स्थिरं ध्यानमुच्यते तज्ज्ञैः ।
निश्चलमङ्गं तद्वत्केवलिनां कीर्तितं ध्यानम् ॥ १०३ ॥

पूर्वाभ्यासाज्जीवोपयोगतः कर्मजरणहेतोर्वा ।
शब्दार्थबहुत्वाद्वा जिनवचनाद्वाऽप्ययोगिनो ध्यानम् ॥ १०४ ॥

आद्ये श्रुतावलम्बनपूर्वे पूर्वश्रुतार्थसंबन्धात् ।
पूर्वधराणां छद्मस्थयोगिनां प्रायशो ध्याने ॥ १०५ ॥

सकलालम्बनविरहप्रथिते द्वे त्वन्तिमे समुद्दिष्टे ।
निर्मलकेवलदृष्टिज्ञानानां क्षीणदोषाणाम् ॥ १०६ ॥

तत्र श्रुताद् गृहीत्वैकमर्थमर्थाद् व्रजेच्छब्दम् ।
शब्दात् पुनरप्यर्थं योगाद्योगान्तरं च सुधीः ॥ १०७ ॥

संक्रामत्यविलम्बितमर्थप्रभृतिषु यथा किल ध्यानी ।
व्यावर्तते स्वयमसौ पुनरपि तेन प्रकारेण ॥ १०८ ॥

इति नानात्वे निशिताभ्यासः संजायते यदा योगी ।
आविर्भूतात्मगुणस्तदैकताया भवेद्योग्यः ॥ १०९ ॥

उत्पादस्थितिभङ्गादिपर्ययाणां यदेकयोगः सन् ।
ध्यायति पर्ययमेकं तत्स्यादेकत्वमविचारम् ॥ ११० ॥

त्रिजगद्विषयं ध्यानादणुसंस्थं धारयेत् क्रमेण मनः ।
विषमिव सर्वाङ्गगतं मन्त्रबलान्मान्त्रिको दंशे ॥ १११ ॥

अपसारितेन्धनभरः शेषः स्तोकेन्धनोऽनलो ज्वलितः ।
तस्मादपनीतो वा निर्वाति यथा मनस्तद्वत् ॥ ११२ ॥

ज्वलति ततश्च ध्यानज्वलने भृशमुज्ज्वले यतीन्द्रस्य ।
निखिलानि विलीयन्ते क्षणमात्राद् घातिकर्माणि ॥ ११३ ॥

ज्ञानावरणीयं दृष्ट्यावरणीयं च मोहनीयं च ।
विलयं प्रयान्ति सहसा सहान्तरायेण कर्माणि ॥ ११४ ॥

संप्राप्य केवलज्ञानदर्शने दुर्लभे ततो योगी ।
जानाति पश्यति तथा लोकालोकं यथावस्थम् ॥ ११५ ॥

देवस्तदा स भगवान् सर्वज्ञः सर्वदर्श्यनन्तगुणः ।
विहरत्यवनीवलयं सुरासुरनरोरगैः प्रणतः ॥ ११६ ॥

वाग्ज्योत्स्नयाऽखिलान्यपि विबोधयति भव्यजन्तुकुमुदानि ।
उन्मूलयति क्षणतो मिथ्यात्वं द्रव्यभावगतम् ॥ ११७ ॥

तन्नामग्रहमात्रादनादिसंसारसंभवं दुःखम् ।
भव्यात्मनामशेषं परिक्षयं यांति सहसैव ॥ ११८ ॥

अपि कोटिशतसङ्ख्याः समुपासितुमागताः सुरनराद्याः ।
क्षेत्रे योजनमात्रे मान्ति तदाऽस्य प्रभावेण ॥ ११९ ॥

त्रिदिवौकसो मनुष्यास्तिर्यञ्चोऽन्येऽप्यमुष्य बुध्यन्ते ।
निजनिजभाषानुगतं वचनं धर्मावबोधकरम् ॥ १२० ॥

आयोजनशतमुग्रा रोगाः शाम्यन्ति तत्प्रभावेण ।
उदयिनि शीतमरीचाविव तापरुजः क्षितेः परितः ॥ १२१ ॥

मारीतिदुर्भिक्षातिवृष्ट्यनावृष्टिडमरवैराणि ।
न भवन्त्यस्मिन् विहरति सहस्ररश्मौ तमांसीव ॥ १२२ ॥

मार्त्तण्डमण्डलश्रीविडम्बि भामण्डलं विभोः परितः ।
आविर्भवत्यनुवपुः प्रकाशयत्सर्वतोऽपि दिशः ॥ १२३ ॥

संचारयन्ति विकचान्यनुपादन्यासमाशु कमलानि ।
भगवति विहरति तस्मिन् कल्याणीभक्तयो देवाः ॥ १२४ ॥

अनुकूलो वाति मरुत् प्रदक्षिणं यान्त्यमुष्य शकुनाश्च ।
तरवोऽपि नमन्ति भवन्त्यधोमुखाः कण्टकाश्च तदा ॥ १२५ ॥

आरक्तपल्लवोऽशोकपादपः स्मेरकुसुमगन्धाढ्यः ।
प्रकृतस्तुतिरिव मधुकरविरुतैर्विलसत्युपरि तस्य ॥ १२६ ॥

षडपि समकालमृतवो भगवन्तं तं तदोपतिष्ठन्ते ।
स्मरसाहाय्यककरण- प्रायश्चित्तं ग्रहीतुमिव ॥ १२७ ॥

अस्य पुरस्तान्निनदन् विजृम्भते दुन्दुभिर्नभसि तारम् ।
कुर्वाणो निर्वाणप्रयाणकल्याणमिव सद्यः ॥ १२८ ॥

पञ्चापि चेन्द्रियार्थाः क्षणान्मनोज्ञीभवन्ति तदुपान्ते ।
को वा न गुणोत्कर्षं सविधे महतामवाप्नोति ॥ १२९ ॥

अस्य नखा रोमाणि च वर्धिष्णून्यपि न हि प्रवर्धन्ते ।
भवशतसंचितकर्मच्छेदं दृष्ट्वेव भीतानि ॥ १३० ॥

शमयन्ति तदभ्यर्णे रजांसि गन्धजलवृष्टिभिर्देवाः ।
*उन्निद्रकुसुमवृष्टिभिरशेषतः सुरभयन्ति भुवम् ॥ १३१ ॥*

छत्त्रत्रयी पवित्रा विभोरुपरि भक्तितस्त्रिदशराजैः ।
गङ्गाश्रोतस्त्रितयीव धार्यते मण्डलीकृत्य ॥ १३२ ॥

अयमेक एव नः प्रभुरित्याख्यातुं बिडौजसोन्नमितः ।
अङ्गुलिदण्ड इवोच्चैश्चकास्ति रत्नध्वजस्तस्य ॥ १३३ ॥

अस्य शरदिन्दुदीधितिचारूणि च चामराणि धूयन्ते ।
वदनारविन्दसंपातिराजहंसभ्रमं दधति ॥ १३४ ॥

प्राकारास्त्रय उच्चैर्विभान्ति समवसरणस्थितस्यांस्य ।
कृतविग्रहाणि सम्यक्चारित्रज्ञानदर्शनानीव ॥ १३५ ॥

चतुरशावर्तिजनान् युगपदिवानुग्रहीतुकामस्य ।
चत्वारि भवन्ति मुखान्यङ्गानि च धर्ममुपदिशतः ॥ १३६ ॥

अभिवन्द्यमानपादैः सुरासुरनरोरगैस्तदा भगवान् ।
सिंहासनमधितिष्ठति भास्वानिव पूर्वगिरिशृङ्गम् ॥ १३७ ॥

तेजःपुञ्जप्रसरप्रकाशिताशेषदिक्कमस्य तदा ।
त्रैलोक्यचक्रवर्तित्वचिह्नमग्रे भवति चक्रम् ॥ १३८ ॥

भवनपतिविमानपतिज्योतिःपतिवानमन्तराः सविधे ।
तिष्ठन्ति समवसरणे जघन्यतः कोटिपरिमाणाः ॥ १३९ ॥

तीर्थकरनामसंज्ञं न यस्य कर्मास्ति सोऽपि योगबलात् ।
उत्पन्नकेवलः सन् सत्यायुषि बोधयत्युर्वीम् ॥ १४० ॥

संपन्नकेवलज्ञानदर्शनोऽन्तर्मुहूर्त्तशेषायुः ।
अर्हति योगी ध्यानं तृतीयमपि कर्तुमचिरेण ॥ १४१ ॥

आयुः कर्मसकाशादधिकानि स्युर्यदाऽन्यकर्माणि ।
तत्साम्याय तदोपक्रमेत योगी समुद्घातम् ॥ १४२ ॥

दण्डकपाटे मन्थानकं च समयत्रयेण निर्माय ।
तुर्ये समये लोकं निःशेषं पूरयेद्योगी ॥ १४३ ॥

समयैस्ततश्चतुर्भिर्निवर्त्तते लोकपूरणादस्मात् ।
विहितायुःसमकर्मा ध्यानी प्रतिलोममार्गेण ॥ १४४ ॥

श्रीमानचिन्त्यवीर्यः शरीरयोगेऽथ बादरे स्थित्वा ।
अचिरादेव हि निरुणद्धि बादरौ वाङ्मनसयोगौ ॥ १४५ ॥

सूक्ष्मेण काययोगेन काययोगं स बादरं रुन्ध्यात् ।
तस्मिन्ननिरुद्धे सति शक्यो रोध्दुं न सूक्ष्मतनुयोगः ॥ १४६ ॥

वचनमनोयोगयुगं सूक्ष्मं निरुणद्धि सूक्ष्मात्तनुयोगात् ।
विदधाति ततो ध्यानं सूक्ष्मक्रियमसूक्ष्मतनुयोगम् ॥ १४७ ॥

तदनन्तरं समुत्सन्नक्रियमाविर्भवेदयोगस्य ।
अस्यान्ते क्षीयन्ते त्वघातिकर्माणि चत्वारि ॥ १४८ ॥

लघुवर्णपञ्चकोद्गिरणतुल्यकालामवाप्य शैलेशीम् ।
क्षपयति युगपत् परितो वेद्यायुर्नामगोत्राणि ॥ १४९ ॥

औदारिकतैजसकार्मणानि संसारमूलकरणानि ।
हित्वेह ऋजुश्रेण्या समयेनैकेन याति लोकान्तम् ॥ १५० ॥

नोर्ध्वमुपग्रहविरहादधोऽपि वा नैव गौरवाभावात् ।
योगप्रयोगविगमात् न तिर्यगपि तस्य गतिरस्ति ॥ १५१ ॥

लाघवयोगाद् धूमवदलाबुफलवच्च सङ्गविश्लेषेण ।
बन्धनविरहादेरण्डवच्च सिद्धस्य गतिरूर्ध्वम् ॥ १५२ ॥

सादिकमनन्तमनुपममव्याबाधं स्वभावजं सौख्यम् ।
प्राप्तः सकेवलज्ञानदर्शनो मोदते मुक्तः ॥ १५३ ॥

## अथ द्वादशः प्रकाशः

श्रुतसिन्धोर्गुरुमुखतो यदधिगतं तदिह दर्शितं सम्यक् ।
अनुभवसिद्धमिदानीं प्रकाश्यते तत्त्वमिदममलम् ॥ १५४ ॥

इह विक्षिप्तं यातायातं श्लिष्टं तथा सुलीनं च ।
चेतश्चतुःप्रकारं तज्ज्ञचमत्कारकारि भवेत् ॥ १५५ ॥

विक्षिप्तं चलमिष्टं यातायातं च किमपि सानन्दम् ।
प्रथमाभ्यासे द्वयमपि विकल्पविषयग्रहं तत्स्यात् ॥ १५६ ॥

श्लिष्टं स्थिरसानन्दं सुलीनमतिनिश्चलं परानन्दम् ।
तन्मात्रकविषयग्रहमुभयमपि बुधैस्तदाम्नातम् ॥ १५७ ॥

एवं क्रमशोऽभ्यासावेशाद् ध्यानं भजेन्निरालम्बम् ।
समरसभावं यातः परमानन्दं ततोऽनुभवेत् ॥ १५८ ॥

बाह्यात्मानमपास्य प्रसत्तिभाजान्तरात्मना योगी ।
सततं परमात्मानं विचिन्तयेत्तन्मयत्वाय ॥ १५९ ॥

आत्मधिया समुपात्तः कायादिः कीर्त्यतेऽत्र बहिरात्मा ।
कायादेः समधिष्ठायको भवत्यन्तरात्मा तु ॥ १६० ॥

चिद्रूपानन्दमयो निःशेषोपाधिवर्जितः शुद्धः ।
अत्यक्षोऽनन्तगुणः परमात्मा कीर्त्तितस्तज्ज्ञैः ॥ १६१ ॥

पृथगात्मानं कायात्पृथक् च विद्यात्सदात्मनः कायम् ।
उभयोर्भेदज्ञातात्मनिश्चये न स्खलेद्योगी ॥ १६२ ॥

अन्तःपिहितज्योतिः संतुष्यत्यात्मनोऽन्यतो मूढः ।
तुष्यत्यात्मन्येव हि बहिर्निवृत्तभ्रमो ज्ञानी ॥ १६३ ॥

पुंसामयत्नलभ्यं ज्ञानवतामव्ययं पदं नूनम् ।
यद्यात्मन्यात्मज्ञानमात्रमेते समीहन्ते ॥ १६४ ॥

श्रयते सुवर्णभावं सिद्धरसस्पर्शतो यथा लोहम् ।
आत्मध्यानादात्मा परमात्मत्वं तथाऽऽप्नोति ॥ १६५ ॥

जन्मान्तरसंस्कारात्स्वयमेव किल प्रकाशते तत्त्वम् ।
सुप्तोत्थितस्य पूर्वप्रत्ययवन्निरुपदेशमपि ॥ १६६ ॥

अथवा गुरुप्रसादादिहैव तत्त्वं समुन्मिषति नूनम् ।
गुरुचरणोपास्तिकृतः प्रशमजुषः शुद्धचित्तस्य ॥ १६७ ॥

तत्र प्रथमे तत्त्वज्ञाने संवादको गुरुर्भवति ।
दर्शयिता त्वपरस्मिन् गुरुमेव सदा भजेत्तस्मात् ॥ १६८ ॥

यद्वत्सहस्रकिरणः प्रकाशको निचिततिमिरमग्नस्य ।
तद्वद् गुरुरत्र भवेदज्ञानध्वान्तपतितस्य ॥ १६९ ॥

प्राणायामप्रभृतिक्लेशपरित्यागतस्ततो योगी ।
उपदेशं प्राप्य गुरोरात्माभ्यासे रतिं कुर्यात् ॥ १७० ॥

वचनमनःकायानां क्षोभं यत्नेन वर्जयेच्छान्तः ।
रसभाण्डमिवात्मानं सुनिश्चलं धारयेन्नित्यम् ॥ १७१ ॥

औदासीन्यपरायणवृत्तिः किञ्चिदपि चिन्तयेन्नैव ।
यत्संकल्पाकुलितं चित्तं नासादयेत् स्थैर्यम् ॥ १७२ ॥

यावत्प्रयत्नलेशो यावत्सङ्कल्पकल्पना काऽपि ।
तावन्न लयस्यापि प्राप्तिस्तत्त्वस्य का नु कथा ॥ १७३ ॥

यदिदं तदिति न वक्तुं साक्षाद् गुरुणाऽपि हन्त शक्येत ।
औदासीन्यपरस्य प्रकाशते तत्स्वयं तत्त्वम् ॥ १७४ ॥

एकान्तेऽतिपवित्रे रम्ये देशे सदा सुखासीनः ।
आचरणाग्रशिखाग्राच्छिथिलीभूताखिलावयवः ॥ १७५ ॥

रूपं कान्तं पश्यन्नपि शृण्वन्नपि गिरं कलमनोज्ञाम् ।
जिघ्रन्नपि च सुगन्धीन्यपि भुञ्जानो रसान् स्वादून् ॥ १७६ ॥

भावान् स्पृशन्नपि मृदूनवारयन्नपि च चेतसो वृत्तिम् ।
परिकलितौदासीन्यः प्रणष्टविषयभ्रमो नित्यम् ॥ १७७ ॥

बहिरन्तश्च समन्ताच्चिन्ताचेष्टापरिच्युतो योगी ।
तन्मयभावं प्राप्तः कलयति भृशमुन्मनीभावम् ॥ १७८ ॥

गृह्णन्ति ग्राह्याणि स्वानि स्वानीन्द्रियाणि नो रुन्ध्यात् ।
न खलु प्रवर्तयेद्वा प्रकाशते तत्त्वमचिरेण ॥ १७९ ॥

चेतोऽपि यत्र यत्र प्रवर्तते नो ततस्ततो वार्यम् ।
अधिकीभवति हि वारितमवारितं शान्तिमुपयाति ॥ १८० ॥

मत्तो हस्ती यत्नान्निवार्यमाणोऽधिकीभवति यद्वत् ।
अनिवारितस्तु कामान् लब्ध्वा शाम्यति मनस्तद्वत् ॥ १८१ ॥

यर्हि यथा यत्र यतः स्थिरीभवति योगिनश्चलं चेतः ।
तर्हि तथा तत्र ततः कथञ्चिदपि चालयेन्नैव ॥ १८२ ॥

अनया युक्त्याऽभ्यासं विदधानस्यातिलोलमपि चेतः ।
अङ्गुल्यग्रस्थापितदण्ड इव स्थैर्यमाश्रयति ॥ १८३ ॥

निःसृत्यादौ दृष्टिः संलीना यत्र कुत्रचित्स्थाने ।
तत्रासाद्य स्थैर्यं शनैः शनैर्विलयमाप्नोति ॥ १८४ ॥

सर्वत्रापि प्रसृता प्रत्यग्भूता शनैः शनैर्दृष्टिः ।
परतत्त्वामलमुकुरे निरीक्षते ह्यात्मनाऽऽत्मानम् ॥ १८५ ॥

औदासीन्यनिमग्नः प्रयत्नपरिवर्जितः सततमात्मा ।
भावितपरमानन्दः क्वचिदपि न मनो नियोजयति ॥ १८६ ॥

करणानि नाधितिष्ठत्युपेक्षितं चित्तमात्मना जातु ।
ग्राह्ये ततो निजनिजे करणान्यपि न प्रवर्तन्ते ॥ १८७ ॥

नात्मा प्रेरयति मनो न मनः प्रेरयति यर्हि करणानि ।
उभयभ्रष्टं तर्हि स्वयमेव विनाशमाप्नोति ॥ १८८ ॥

नष्टे मनसि समन्तात् सकले विलयं च सर्वतो याते ।
निष्कलमुदेति तत्त्वं निर्वातस्थायिदीप इव ॥ १८९ ॥

अङ्गमृदुत्वनिदानं स्वेदनमर्दनविवर्जनेनापि ।
स्निग्धीकरणमतैलं प्रकाशमानं हि तत्त्वमिदम् ॥ १९० ॥

अमनस्कतया संजायमानया नाशिते मनःशल्ये ।
शिथिलीभवति शरीरं छत्रमिव स्तब्धतां त्यक्त्वा ॥ १९१ ॥

शल्यीभूतस्यान्तःकरणस्य क्लेशदायिनः सततम् ।
अमनस्कतां विनाऽन्यद् विशल्यकरणौषधं नास्ति ॥ १९२ ॥

कदलीवच्चाविद्या लोलेन्द्रियपत्रला मनःकन्दा ।
अमनस्कफले दृष्टे नश्यति सर्वप्रकारेण ॥ १९३ ॥

अतिचञ्चलमतिसूक्ष्मं दुर्लक्ष्यं वेगवत्तया चेतः ।
अश्रान्तमप्रमादादमनस्कशलाकया भिन्द्यात् ॥ १९४ ॥

विश्लिष्टमिव प्लुष्टमिवोड्डीनमिव प्रलीनमिव कायम् ।
अमनस्कोदयसमये योगी जानात्यसत्कल्पम् ॥ ९९५ ॥

समदैरिन्द्रियभुजगै रहिते विमनस्कनवसुधाकुण्डे ।
मग्नोऽनुभवति योगी परामृतास्वादमसमानम् ॥ ९९६ ॥

रेचकपूरककुम्भककरणाभ्यासक्रमं विनाऽपि खलु ।
स्वयमेव नश्यति मरुद्विमनस्के सत्ययत्नेन ॥ ९९७ ॥

चिरमाहितप्रयत्नैरपि धर्तुं यो हि शक्यते नैव ।
सत्यमनस्के तिष्ठति स समीरस्तत्क्षणादेव ॥ ९९८ ॥

जातेऽभ्यासे स्थिरतामुदयति विमले च निष्कले तत्त्वे ।
मुक्त इव भाति योगी समूलमुन्मूलितश्वासः ॥ ९९९ ॥

यो जाग्रदवस्थायां स्वस्थः सुप्त इव तिष्ठति लयस्थः ।
श्वासोच्छ्वासविहीनः स हीयते न खलु मुक्तिजुषः ॥ १००० ॥

जागरणस्वप्नजुषो जगतीतलवर्तिनः सदा लोकाः ।
तत्त्वविदो लयमग्ना नो जाग्रति शेरते नापि ॥ १००१ ॥

भवति खलु शून्यभावः स्वप्ने विषयग्रहश्च जागरणे ।
एतद्द्वितयमतीत्यानन्दमयमवस्थितं तत्त्वम् ॥ १००२ ॥

कर्माण्यपि दुःखकृते निष्कर्मत्वं सुखाय विदितं तु ।
न ततः प्रयतेत कथं निष्कर्मत्वे सुलभमोक्षे ॥ १००३ ॥

मोक्षोऽस्तु मास्तु यदिवा परमानन्दस्तु वेद्यते स खलु ।
यस्मिन्निखिलसुखानि प्रतिभासन्ते न किञ्चिदिव ॥ १००४ ॥

मधु न मधुरं नैताः शीतास्त्विषस्तुहिनद्युते-
रमृतममृतं नामैवास्याः फले तु मुधा सुधा ।
तदलममुना संरम्भेण प्रसीद सखे मनः,
फलमविकलं त्वय्येवैतत्प्रसादमुपेयुषि ॥ १००५ ॥

सत्येतस्मिन्नरतिरतिदं गृह्यते वस्तु दूरा-
दप्यासन्नेऽप्यसति तु मनस्याप्यते नैव किञ्चित् ।
पुंसामित्यप्यवगतवतामुन्मनीभावहेता-
विच्छा बाढं न भवति कथं सद्गुरूपासनायाम् ॥ १००६ ॥

तांस्तानापरमेश्वरादपि परान् भावैः प्रसादं नयन्,
तैस्तैस्तत्तदुपायमूढ भगवन्नात्मन् किमायस्यसि ।
हन्तात्मानमपि प्रसादय मनाग् येनासतां संपदः,
साम्राज्यं परमेऽपि तेजसि तव प्राज्यं समुज्जृम्भते ॥ १००७ ॥

या शास्त्रात्सुगुरोर्मुखादनुभवाच्चाज्ञायि किञ्चित् क्वचित्,
योगस्योपनिषद्विवेकिपरिषच्चेतश्चमत्कारिणी ।
श्रीचौलुक्यकुमारपालनृपतेरत्यर्थमभ्यर्थना-
दाचार्येण निवेशिता पथि गिरां श्रीहेमचन्द्रेण सा ॥ १००८ ॥

महोपाध्यायश्रीमेघविजयजीविरचिता

# ॥ अर्हद्गीता ॥

## पीठिका

सरस्वती सदा भूया-दार्हती शाश्वती श्रिये ।
पूर्णा प्रभातसञ्जात-प्रभेवेन्दुविवस्वतोः ॥ १ ॥

यस्यां नैकान्तजडता नोष्मता न तमोलवः ।
निर्दोषां सुप्रकाशार्ङ्गीं स्तुमस्तामार्हतीं गिरम् ॥ २ ॥

मेघगम्भीरघोषत्वा-द्यदीयाऽव्यक्तवर्णता ।
गीतारम्भ इवाऽन्वर्थ- दर्शने स्पष्टवर्णता ॥ ३ ॥

साध्यक्षा श्रुतदेवीवा-ऽनुयोगाङ्गचतुर्भुजा ।
आत्मानुशासनाद् ब्राह्मी संविदे हंसगामिनी ॥ ४ ॥

बृहत्त्वाद् ब्रह्म सद्ज्ञानं तद् ब्रह्माऽर्हति केवलम् ।
परे ब्रह्मणि निर्माय शिवे सिद्धे स्वरूपतः ॥ ५ ॥

ब्रह्मास्मिन्निति जीवोऽपि ब्रह्मात्मैव तदाश्रयात् ।
वह्नेराश्रयतोङ्गारो वह्निमण्डलमंशुमान् ॥ ६ ॥

ब्रह्मणा ज्ञायमानोऽर्थः सर्वो ब्रह्माऽभिधीयते ।
तत्तद्विषयिणः शुद्धे-र्विषयेऽध्यवसायतः ॥ ७ ॥

सुधेयमिति चिन्तायां गोचरः सलिलं सुधा ।
राजवाग् विषयोऽप्यर्थो राजवागीयमुच्यते ॥ ८ ॥

वस्तु यत्कर्मविषय-स्तत्कर्मार्चादिकं स्फुटम् ।
व्यापारविषये भावे व्यापारोऽयमिति स्थितिः ॥ ९ ॥

ब्रह्मणो विषयादेवं यत्सत्तद् ब्रह्म निश्चितम् ।
जीवोऽपि ब्रह्म शुद्धस्य तस्य ब्रह्मपदं शिवम् ॥ १० ॥

जीवन्मुक्तोऽपि सर्वज्ञः प्रास्तदोषः सुसंवृतः ।
ब्रह्मचर्यपरः साक्षा-त्परब्रह्मतयोच्यते ॥ ११ ॥

लोकालोकोप्यनन्तत्वा-द्बृंहणो ब्रह्मनामभृत् ।
तद्ज्ञानमपि सद्ब्रह्म ह्यग्निज्ञमनुजेऽग्निवत् ॥ १२ ॥

स्त्रियां स्त्रीवाचको ग्रामः ग्रामाख्या ग्रामवासिनी ।
नष्टे ग्रामो गतो ग्राम-इत्याद्याश्रयलक्षणात् ॥ १३ ॥

ज्ञाता ज्ञेयं तथा ब्रह्म ब्रह्मत्रयमपि स्मृतं ।
श्रेष्ठत्वात्परमं ब्रह्म-सिद्धोऽर्हन्नासकेवलः ॥ १४ ॥

तदुक्तार्थानुसारेण सूत्रं तद्गीतमुच्यते ।
तस्यैवार्थस्तु भाष्यादि-र्गीतार्थस्तद्विदाम्वरः ॥ १५ ॥

गीतार्थमननात्पूज्यः श्रीगीतार्थोऽपि सूरिवत् ।
अतः प्रथमतो गीता-भ्यास एव विधीयताम् ॥ १६ ॥

## ॥ प्रथमोऽध्यायः ॥ १ ॥

अर्हन्तं श्रमणं वीरं भगवन्तं नमन् जगौ ।
तस्मिन् कालेऽथ समये चम्पायां गौतमो गणी ॥ १ ॥

श्री गौतम उवाच

देवाधिदेव ! भगवन् ! लोकालोकप्रकाशक !
योगिनोऽपि मनो वश्यं जायते तद्वदाधुना ॥ २ ॥

श्री भगवानुवाच

प्राप्तेपि नृभवे यत्नः कार्यः प्राणभृता तथा ।
परमेष्ठिपदं येन लभ्यतेऽत्राऽपुनर्भवम् ॥ ३ ॥

हेतुस्तस्य पुनर्ज्ञानं वैराग्यजनकं क्रमात् ।
तद्ज्ञानं प्रथमं गीता-भ्याससाध्यं पशोरपि ॥ ४ ॥

मनोदमनकृद् गीता-भ्यासो हि शिवसाधनम् ।
इच्छाविनाशाद् द्रव्याणां पर्यायपरिभावनैः ॥ ५ ॥

जायते पवनाभ्यासा-ज्जाड्यमैहिकसिद्धये।
देवाः सागरसंख्यानै-रनपानैर्न मुक्तिगाः ॥ ६ ॥

सूक्ष्माः स्युः प्राणसञ्चारा-स्तथैकेन्द्रियदेहिनाम्।
बाह्यस्तु तेषां पवना-भ्यास एव न केवलः ॥ ७ ॥

तथापि न कथा मुक्ते-रेषां पुद्गलसंग्रहात्।
भयाहारादिसंज्ञाभिः स्थावराणां भवभ्रमः ॥ ८ ॥

भवेद् ज्ञानान्मनोऽनिच्छं भावोऽनित्यादिभावनात्।
शिवाय शाश्वतो ध्येयः स्वभावः परमात्मनः ॥ ९ ॥

इदमाध्यात्मिकं तत्त्वं परमैश्वर्यलक्षणम्।
पन्था मृत्युञ्जयस्यायं शिवस्यावश्यमात्मनाम् ॥ १० ॥

तावान् कषायविषय-हेतुर्थस्य परिग्रहः।
तस्यापि भरतस्याऽभूत् कैवल्यमात्मभावनात् ॥ ११ ॥

येनात्मात्मन्यवस्थाता तद्वैराग्यं प्रशस्यते।
आत्मैव ह्यात्मना वेद्यो ज्ञानात् शिवमयोऽव्ययः ॥ १२ ॥

अज्ञानात्केचन प्राहु-र्मुक्तिं केचित्तपोबलात्।
भजनात्केवलात्केचि-द्वयं चाध्यात्मभावनात् ॥ १३ ॥

शास्त्रानुवादादध्यात्म-कथनान्नात्मभावनम्।
नेच्छाद्युपरमो याव-त्तावन्नाध्यात्मिको जनः ॥ १४ ॥

अनिच्छुर्विषयाऽसक्तो-प्याध्यात्मिकशिरोमणिः।
यतिर्योगी ब्राह्मणो वापीच्छवान्नात्मबोधकः ॥ १५ ॥

आध्यात्मिकं तारतम्य-मिच्छाविजयतः क्रमात्।
गुणस्थानानि तेनैव, प्रोचुरूच्चावचान्यपि ॥ १६ ॥

अमुक्तोपि क्रमान्मुक्तो, निश्चयात्स्यादनिच्छया।
अज्ञानं मोहमेवाहु-स्तस्मादिच्छा ततो भवः ॥ १७ ॥

इच्छयानिच्छयापि स्यात्, क्रियैकापि स्वरूपतः ।
मुख्यैव कर्मबन्धाय, निर्जरायै परा पुनः ॥ १८ ॥

कैवल्यायात्मनो ज्ञानं, ध्यानं वस्तुविरागता ।
भवायानात्मनो ज्ञानं, ध्यानं वस्तुविरागता ॥ १९ ॥

आध्यात्मिको विरक्तः स्यात्तदेवाध्यात्मलक्षणम् ।
कषायविषयैर्वान्तिः, स्यादध्यात्मसुधारसे ॥ २० ॥

औदासीन्यात्प्रवृत्तिः स्याद्, ज्ञानिनो निर्जरास्पदम् ।
तत्त्वज्ञानादतो मुक्ति,जगुर्नैयायिकाः जिनाः ॥ २१ ॥

## ॥ द्वितीयोऽध्यायः ॥ २ ॥

### श्री गौतम उवाच

ऐन्द्रं ज्योतिर्जगज्ज्येष्ठं, श्रेष्ठं केवलमुज्ज्वलम् ।
सिद्धमार्हन्त्यमाबिभ्रत्, कथं तत्प्रकटीभवेत् ॥ १ ॥

### श्री भगवानुवाच

परमैश्वर्यभागिन्द्रः शान्तं कान्तं च तन्महः ।
ज्ञानलक्षणमाम्नातं, ख्यातं धर्मपदेन तत् ॥ २ ॥

ज्ञानं धर्मस्तस्य धर्मी, परमात्मेति गीयते ।
मोहरूपाऽज्ञानमुक्तः, ऐन्द्रं ज्योतिः स्फुटं भवेत् ॥ ३ ॥

इन्द्र आत्मा तदन्वेष्टा, श्रवणान्मननाद्गुरोः ।
ध्यानेन साक्षात्कारेण, स हि श्रावक उच्यते ॥ ४ ॥

यच्चिह्नमिन्द्रियं लोके, ज्ञेया तेनेन्द्रतात्मनि ।
तज्ज्योतिश्चेत्प्रसन्नं स्या-न्नश्येत्तर्हि तमोभरः ॥ ५ ॥

ऐन्द्रं ज्योतिर्नतास्त्विन्द्राः, शक्रचक्रभृतोऽधिपाः ।
इन्द्रानुजार्कचन्द्राद्याः, मणयो जगदम्बुधौ ॥ ६ ॥

जीवयोनिषु मानुष्यं, मुख्यं तत्र सुबोधिता ।
तत्रापि केवलं ज्ञानं, तच्चित्तं परमार्हति ॥ ७ ॥

क्षणिकं विद्युतस्तेजो, दीपे मौहूर्तिकं च तत् ।
घस्रे दैवसिकं धिष्ण्ये रात्रिकं पाक्षिकं विधौ ॥ ८ ॥

अयनं तु सहस्रांशौ, भूषणे वार्षिकं महः ।
इच्छामलविनिर्मुक्तं, ऐन्द्रं ज्योतिस्तु शाश्वतम् ॥ ९ ॥

ऐन्द्रमेवान्तरं चक्षु-र्ज्ञानं जन्तोः समुन्मिषेत् ।
तदा स चक्षुष्मान् विश्वं पश्येदात्मसमं क्षमी ॥ १० ॥

दीपः प्रकाशयेद् गेहं, मण्डलं रविमण्डलम् ।
ऐन्द्रं ज्योतिर्जगत्पूज्यं, लोकालोकप्रकाशकम् ॥ ११ ॥

द्रव्यप्रकाशात् सूर्यादे-र्यत्तमो न विलीयते ।
तद् ज्ञानभानुना नाश्यं, धर्माचरणकारिणा ॥ १२ ॥

येनाचारेण यावत्स्याद्, ज्ञानिनो मोहवर्जनम् ।
तावान् धर्मोदयस्तत्र, गतिस्तदनुसारिणी ॥ १३ ॥

स्वल्पोपि धर्मसंसिद्धो, सौवर्ण्यं कुरुतेऽयसः ।
भावितो विविधैर्भावै-र्ज्ञानधर्मस्तथाङ्गिनः ॥ १४ ॥

महान्मोहोदयो यस्मि-न्नाचारे धर्मतानवम् ।
त्याज्यः स धर्माचारोपि, शक्तेनारोहकर्मणि ॥ १५ ॥

जानाति सर्वं ज्ञानेन, सम्यग्दृष्टिस्ततो भवेत् ।
विरमेत्पातकाज्जीवो, मोहोदयविधायिनः ॥ १६ ॥

तत्पूर्वं ज्ञानमादेयं, हेयोपादेयगोचरम् ।
चक्षुर्जन्मनि बालोपि, पूर्वमुन्मीलयेद्यतः ॥ १७ ॥

विद्याभ्यासस्ततः पूर्वं जनैर्बालस्य कार्यते ।
कार्ये कार्यः पुरो दीपो-रात्रौ ज्ञानं पुरस्तथा ॥ १८ ॥

पठनान्नोच्यते ज्ञानी, यावत्तत्त्वं न विन्दति ।
रामनाम शुको जल्पन्, न तैरश्च्यः तदर्थवित् ॥ १९ ॥

तृष्णां कषायविषय-विषयां यस्त्यजेज्जनः ।
ज्ञानी धर्मी विवेकी स, मुर्त्तो धूर्तस्ततोऽपरः ॥ २० ॥

आर्जीविकायै शास्त्रज्ञाः केपि वैराग्यशालिनः ।
सम्यग्ज्ञानधना नैते, योऽनिच्छुःपूज्य एव सः ॥ २१ ॥

## ॥ तृतीयोऽध्यायः॥ ३ ॥

### श्रीगौतम उवाच

ऐन्द्रं ज्योतिः कथं साक्षा-न्नेक्ष्यते तपनादिवत् ।
कथं तदव्ययं नाथ, ततः स्यात्कीदृशं फलम् ॥ १ ॥

### श्री भगवानुवाच

ज्योतिश्चान्द्रं विषयभूः सौरं तेजः कषायभूः ।
आभ्यां यत्परमं ज्योति-स्तदैन्द्रं परिभाव्यते ॥ २ ॥

यत्प्रसादेन विषये व्याप्तावपि न लिप्यते ।
पवित्रमैन्द्रं तज्ज्योतिः शङ्खेश्वर इवोन्नतम् ॥ ३ ॥

राज्ञस्तेजोर्कवत्साक्षा-न्नैवं नैशतमोपहम् ।
तथैव दीपयेन्न्याय-धर्ममिन्द्रमहस्तथा ॥ ४ ॥

सेविता एव संशुद्धयै विषया नन्दिषेणवत् ।
क्षारमृन्मेलनात् किं स्या-त्सद्यः शुद्धं न चीवरम् ॥ ५ ॥

देवतामिव निसेवतां विषेनोन्मितं विषयजं सुखं सुधीः ।
चित्तधैर्यविधयेति किं जनो, नाहिफेनमपि कार्यसाधनम् ॥ ६ ॥

सेवितेन विषयेन दुर्लभा, प्राप्यते यदि विरागजा सभा ।
नागरे पथि यतः शिवं भवे-च्चौर एव स हि पौरपुङ्गवः ॥ ७ ॥

ऐन्द्रं ज्योतिः प्रभावेन, विकटापि तमोघटा: ।
दिग्मोहं न मनाक् कुर्यात्, तदेव समुपास्यते ॥ ८ ॥

ज्ञानाद्दानं तपः शीलं, पूजा ध्यानं च भावना ।
क्षणान्मोक्षफलं दत्ते, नामृतं ज्ञानतः परम् ॥ ९ ॥

पथ्यं विनापि भैषज्यं, निरुज्यं कुरुते जने ।
तथा ज्ञानं विना कष्टं, स्पष्टं निष्टङ्कयेच्छिवम् ॥ १० ॥

विना ज्ञानं न दानादि-रवदातक्रिया मनाक् ।
फलं किञ्चन संधत्ते, प्रत्युतानर्थसंभवः ॥ ११ ॥

ज्ञानं चक्षुः स्वतो जन्तो, र्मार्गामार्गविवेचनात् ।
विश्वप्रकाशात् सहस्रः, सहस्रांशूदयायते ॥ १२ ॥

ध्रौव्यभावनया द्रव्ये, ध्रुवनिष्ठं ध्रुवं स्वतः ।
निर्मलं केवलं ज्ञानं, दत्ते शिवं ध्रुवं फलम् ॥ १३ ॥

यथाञ्जनादिना चक्षु, नैर्मल्यं लभतेञ्जसा ।
लोकभावनया ज्ञानं, तथा भवति शाश्वतम् ॥ १४ ॥

विद्यमाने यथा भानौ, न ग्रहे रुचिरा रूचिः ।
सम्यग्ज्ञानोदये तद्व-त्परिग्रहरुचिः क्वचित् ॥ १५ ॥

कान्तारागमिवाऽसेव्यं, कान्तारागं स मन्यते ।
दुःखं कञ्चुकिसंसर्गं, मत्वा तत्वाशयः पुमान् ॥ १६ ॥

संयोगान्सकलान्दत्ते, विप्रयोगान्विमर्शयन् ।
पुर्वमेव वियोगार्थी, यतिर्जयति विद्विषः ॥ १७ ॥

वैभवं वै भवं चित्ते, चिन्तयन् सुकृतैक्दृक् ।
भोगानिव भुजङ्गानां, भोगान् स दूरतस्त्यजेत् ॥ १८ ॥

निर्विक्रियाः क्रियाः कुर्व-न्नशुभध्यानरोधिकाः ।
ज्ञानवानश्नुते लीलाः, शिववासे न रोधिकाः ॥ १९ ॥

अनन्तमव्ययं भास्वत्, स्वतो जातमहोदयम्।
ऐन्द्रं ज्योतिर्जनमभ्रं, भ्राजतां शुचि सौरवत् ॥ २० ॥

अनालम्बमनाछाद्यं, न मूर्तं व्याप्तमञ्जसा।
तेजोऽनन्तमिवानन्त-मैन्द्रं जयतु भास्वरम् ॥ २१ ॥

## ॥ चतुर्थोध्याय: ॥ ४ ॥

ऐन्दव्यपि कला वृद्धिं, लभतेऽनुक्रमाद्यथा।
तथेह तत्त्वविद्यापि, ज्ञानिनां बाह्यहेतुभि: ॥ १ ॥

अज्ञानहेतव: सर्वे-प्यधर्मा विषया यथा।
तथा धर्मो ज्ञानबीजं, दयादानादिका: क्रिया: ॥ २ ॥

आयुर्घृतं यशस्त्याग:, कार्यकारणयोगत:।
पूजाध्ययनदीक्षादि-धर्मसाध्याय साध्यते ॥ ३ ॥

स्वाध्याय: स्याद् गुरूपास्ते, शास्त्राध्ययनं वाचनै:।
हेयोपादेयबोधोऽस्मा-त्तत: कैवल्यसम्पद: ॥ ४ ॥

सुदृष्टपरमार्थानां, जङ्गमस्थावरात्मनाम्।
सेवायात्रादिभि: कार्ये, निर्मले ज्ञानदर्शने ॥ ५ ॥

युक्ताहारविहाराद्यै: समितीनां प्रवर्तनै:।
निवर्त्तनै: कषायादे-र्ज्ञानाच्चरणमद्भुतम् ॥ ६ ॥

ज्ञानदर्शनचारित्र-योगाद्धर्म: स्फुटो भवेत्।
शैव: पन्था अयं सेव्य:-सम्यक् तत्त्वविमर्शिना ॥ ७ ॥

दानान्निदानाल्लक्ष्मीणां, दानावरणसंक्षय:।
येन विश्वप्रबोधार्थं, दातात्मा जायते स्वत: ॥ ८ ॥

वैयावृत्त्येऽन्नपानाद्यै-र्गुरुचैत्यादिषु ध्रुवम्।
आत्मनो जायते सर्व-लाभभोगावृत्तिक्षय: ॥ ९ ॥

तेन सर्वार्थबोधस्य, लाभश्चानन्दभोगयुक् ।
अनन्तःस्याद्यथा बीजं, फललाभो विनिश्चयात् ॥ १० ॥

तथोपभोगवीर्यादेः, सर्वथावरणसंक्षयः ।
वीर्याचारात्तपस्यादौ, तेन स्याज्जगदर्चनम् ॥ ११ ॥

छत्रचामरपुष्पाद्यैः, पूजासननिवेशनम् ।
पादक्षेपेम्बुजन्यासा-दिकं च जिनपुजनात् ॥ १२ ॥

धर्मेऽधिकेऽधिको धर्म-स्तथाऽधर्मोप्यधर्मतः ।
कारणानुगतं कार्यं, दृष्टं तन्न्यायवेदिभिः ॥ १३ ॥

भवे स्याद्विभवो दाना-दनन्तज्ञानता शिवे ।
शीलाद्रूपं बलं पूर्वे, परे चानन्तवीर्यता ॥ १४ ॥

आरोग्यं तपसा देहे-ऽप्यदेहेऽकर्मलिप्तता ।
सुखं सांसारिकं भावा-द्भवे सिद्धे स्वभावजम् ॥ १५ ॥

जिनादेर्नमनान्नम्यः, सेव्यः सेवनया भवेत् ।
पूज्यःपूजनया ध्येयो, ध्यानादात्माऽनया दिशा ॥ १६ ॥

ज्ञानदानेऽक्षयं ज्ञानं, सुदृष्टिर्दृढदर्शनात् ।
प्राणातिपाताद्विरते-रेव सिद्धेऽक्षयस्थितिः ॥ १७ ॥

अधर्मकारणं त्याज्यं, यथा मोक्षार्थिना तथा ।
ग्राह्यो ज्ञानमयो धर्मः, शर्म स्यात् शाश्वतं यतः ॥ १८ ॥

संवरः स्यादाश्रवोपि, संवरोप्याश्रवायते ।
ज्ञानाज्ञानफलं चैत-न्मिथ्या सम्यक् श्रुतादिवत् ॥ १९ ॥

चित्रसारथिना माया, कोपो गणिविनिग्रहे ।
मानः पराऽनतेर्ज्ञस्य, मुनेः पात्रादिसंग्रहः ॥ २० ॥

विषमप्यमृतं ज्ञाना-दज्ञानादमृतं विषम् ।
इत्येवं साधनैः साध्यो-ज्ञानधर्मोऽस्ति निश्चयात् ॥ २१ ॥

## ॥ पञ्चमोऽध्यायः॥ ५ ॥

### श्री गौतम उवाच

ऐन्द्रस्वरूपं भगवन्! तवैवाध्यक्षमीक्ष्यते।
दर्शय प्रत्ययं धर्म्यं, यतस्तत्रोद्यमी नरः ॥ १ ॥

### श्री भगवानुवाच

ज्योतिःशास्त्रप्रत्ययो हि, यथैव ग्रहणादिना।
तथा धर्मस्य वह्न्यादे-र्दिव्येऽस्ति प्रत्ययः स्फुटः ॥ २ ॥

कुमारी वा कुमारः स्यात्करावतरणादिषु।
प्रयोज्यःशकुनादौ वा, स एष शीलनिश्चयः ॥ ३ ॥

देवपूजा तीर्थयात्रा, स्वप्नः शुभफलस्तथा।
साधोर्दर्शनवाक्यादिः, शुभः सद्धर्मनिश्चयः ॥ ४ ॥

जन्मपत्रग्रहैर्धर्म-प्रत्ययः क्रियतां जनैः।
दातुः पुजयितुर्यद्वा-दुष्टस्याप्यशुभैः शुभैः ॥ ५ ॥

हिंस्रो वाऽनृतवाक् चौर-स्तथैव पारदारिकः।
दुष्टोतिलोभी न क्वापि, धर्मस्य प्रत्ययस्त्वयम् ॥ ६ ॥

दातुर्दयाभृतः सत्य-वाचः स्त्रीविरतस्य वा।
भगवद्भक्तिभाजो वा, लोकैः श्लाघैव निश्चयः ॥ ७ ॥

यथैव वातपित्तादि-विक्रिया नाडिकाविधेः।
ज्ञेया मनोविधेस्तद्वत्, धर्मस्याऽन्यस्य वा स्थितिः ॥ ८ ॥

शान्तं ज्योतिस्तदैवेन्द्रं, भासते भगवत्यहो।
चराचरमये लोके, सर्वस्यापि सुखावहम् ॥ ९ ॥

निश्चितः सर्वशास्त्रेषु, दयादानदमादिकः।
धर्मविधिर्विधेयोय-मस्मात्कः प्रत्ययः परः ॥ १० ॥

तपसि स्वात्मपीडा स्यात्, परपीडार्चनादिषु ।
तथापि जगति श्लाघा, पावित्र्यं धर्मनिश्चयात् ॥ ११ ॥

शृङ्गाराद्यैः रसैः स्पष्टै-रष्टधापि प्रदीपितैः ।
शान्तनामा हि नवमो, रसः साध्यः क्रमाद् ध्रुवः ॥ १२ ॥

इत्येभिःप्रत्ययैर्यस्य, मनो न धर्मकामनम् ।
उच्छृङ्खलःशृङ्खलकं, तस्य नैवास्ति दामनम् ॥ १३ ॥

शुद्धवंशभवे धर्मे, गुणारोहोपि चार्हति ।
यदाश्रयान्मार्गणेऽस्य, प्रत्ययो लक्ष्यलाभतः ॥ १४ ॥

आशिषः स्युश्चिरं जीवे-त्याद्या दातरि सज्जने ।
शीलात्स्त्रीकष्टमोक्षादि-स्तपसाऽपात्रपात्रताम् ॥ १५ ॥

दीप्तं ज्योति र्भवेन्मोहात्, शान्तं ज्ञानमयात्मनः ।
दीप्तादुन्मार्गगमनं, शान्ताद्धर्मरुचिश्चिरम् ॥ १६ ॥

स्फुरन्तु विविधाचारा-श्चारा इव महीभुजः ।
शास्त्राभ्यासेति चतुरा, न्याय्या धर्म्यैव तत्क्रिया ॥ १७ ॥

धर्मादेव जयः पापात्, क्षयो लोकोक्तिरीदृशी ।
धर्मस्तयैव प्रत्येय-स्तत्र विप्रनिदर्शनम् ॥ १८ ॥

मायाचरित्रे चतुरो-प्युच्यते शठ एव सः ।
चौरो मलिम्लुचः स्नातो-प्ययं धर्मस्य निर्णयः ॥ १९ ॥

ख्यातमाबालगोपालं, विरोधे समुपस्थिते ।
जनैर्विवेकी प्रष्टव्यः प्राप्या येन गतिः शुभा ॥ २० ॥

विशुद्धबुद्धि र्बालोपि, वृद्धो वृद्धैः प्रपूज्यते ।
ज्ञानधर्मोदयादत्र शालिवाहनिदर्शनम् ॥ २१ ॥

## ॥ षष्ठोऽध्यायः ॥ ६ ॥

### श्री गौतम उवाच

ऐश्वर्येण धनुर्वेदे, ज्योतिःशास्त्रेपि गारूडे ।
आयुर्वेदे शाकुने वा, कथं धर्मे प्रधानता ॥ १ ॥

### श्री भगवानुवाच

सर्वशास्त्रोदिते यत्ने, फलं दैवानुसारतः ।
तदनुगुण्यं धर्मेण, तद्वैगुण्यं विपर्ययात् ॥ २ ॥

छात्रःपात्रधिया पाठ्य-मानोपि विदुषां मुखात् ।
एको नारदवत् क्षाता-ऽज्ञातापर्वतवत्परः ॥ ३ ॥

शुभाशुभफलं चैत-च्चेतसा सुविमृश्यताम् ।
तुल्येपि साधने हेतुं, विना भेदः फले कुतः ॥ ४ ॥

यथा सर्वेषु वृक्षेषु, जलमेकं पयोमुचः ।
नानारसान् जनयति, धर्मः प्राणिगणे तथा ॥ ५ ॥

धर्माधर्ममयो लोक-स्तत्रापि धर्ममुख्यता ।
जीवाजीवमये देहे, जीवस्यैवास्ति तत्त्वतः ॥ ६ ॥

काले यथैव त्रैविध्य-मुपचारेण गीयते ।
ज्ञानधर्मे तथैकस्मिन्, भेदत्रयमुदाहृतम् ॥ ७ ॥

मननाद्वस्तुनो ज्ञानं, श्रद्धानाद्दर्शनं पुनः ।
विरत्या चरणं तत्त्वा-दुपयोगैक्यमाहितम् ॥ ८ ॥

धर्मपुंसो मुखं ज्ञानं, हृदयं दर्शनं स्मृतम् ।
शेषाङ्गानि पाणिपाद-मुख्यानि चरणं परम् ॥ ९ ॥

धर्मस्याह्नो मुखं ज्ञानं, मध्याह्नस्तस्य दर्शनम् ।
व्यापारः संवृत्तेः सन्ध्या, योगश्चरणमुच्यते ॥ १० ॥

धर्माकाशेंशुमान् ज्ञानं, दर्शनं चामृतद्युतिः ।
परे ग्रहाः मङ्गलाद्याः, पञ्च चारित्रपञ्चकम् ॥ ११ ॥

बाल्यं ज्ञानं वयस्तस्मा-त्पुरो दर्शनमुद्यतम् ।
चारित्रं विज्ञता धर्मे-ऽवस्थात्रयमिदं शुभम् ॥ १२ ॥

धर्मस्यादिः स्मृतं ज्ञानं, सम्यक्त्वं मध्यमुच्यते ।
चारित्रमवसानोऽस्य, तत्रैकैकोपयुक्तता ॥ १३ ॥

बोधो बीजं तथा मूलं, सम्यक्त्वं दृढतायतः ।
चारित्रपञ्चकं शाखा, फलं धर्मतरोः शिवम् ॥ १४ ॥

वातं विजयते ज्ञानं, दर्शनं पित्तवारणम् ।
कफनाशाय चरणं, धर्मस्तेनामृतायते ॥ १५ ॥

दक्षिणाङ्गं भवेद् ज्ञानं, वामाङ्गं भक्तिभाजनम् ।
मध्यभागेस्ति चारित्रं, धर्मदेहस्य साधनम् ॥ १६ ॥

ज्ञाने पुंस्त्वं पुनः स्त्रीत्वं, भक्त्या दर्शनवृद्धये ।
तदङ्गजन्मा चारित्रा-चारः स्यादुभयोत्तमः ॥ १७ ॥

ज्ञानं स्यादेकवचने-द्वित्वेपि ज्ञानदर्शने ।
ज्ञानदर्शनचारित्रै-र्धर्मोऽस्ति वचनत्रयी ॥ १८ ॥

उर्ध्वलोके स्थितं ज्ञान-मधोलोके च दर्शनम् ।
चारित्रं मध्यलोकस्थं, धर्मस्थं भुवनत्रयम् ॥ १९ ॥

सन्ध्याभक्तिर्दिनं ज्ञानं, यामिनी चरणं स्मृतम् ।
धर्मध्यानादृते सर्व-व्यापारभरसंवरात् ॥ २० ॥

एवं त्रिधा वस्तुगते, तं भविने निदर्शितम् ।
रत्नत्रयं तत्त्वतोपि स्यादेकं तदनेकभूः ॥ २१ ॥

## ॥ सप्तमोऽध्यायः ॥ ७ ॥

### श्री गौतम उवाच

ऐहिकामुष्मिकफलं, यथाज्योतिर्विदो जनाः ।
जानन्ति तद् ज्ञानधर्म-मार्गद्विद्यं कथं प्रभो ! ॥ १ ॥

### श्री भगवानुवाच

अतिचारोऽथ वक्रत्वं, ज्योतिर्विद्भिर्निषिध्यते ।
मार्ग एवं ग्रहात्साध्य-स्तथैव धार्म्मिकैरपि ॥ २ ॥

स्पष्टीभूते यथा भानौ, ज्योतिर्मार्गप्रकाशनम् ।
तथा ज्ञानधर्मे सूर्ये, सम्यग्मार्गनिरीक्षणम् ॥ ३ ॥

ज्ञानमेव सहस्रांशु, हृदि ब्रह्मामृतं परम् ।
ज्योतिः शास्त्रेपि तेनैव, यथार्थमननं भवेत् ॥ ४ ॥

ज्ञानं दुग्धं दधि श्रद्धा, घृतं तच्चरणं स्मृतम् ।
गुरोर्गव्यमिदं धर्म्यं, धार्यं चानन्तवीर्यदम् ॥ ५ ॥

ज्ञानार्थं गुरवः सेव्या, देवा दर्शनपुष्टये ।
वस्त्रपात्रं चारित्राय, धर्मस्तत्त्वत्रयीमयः ॥ ६ ॥

संशोध्य तपनात्कृत्वा, व्रताज्यमकषायकम् ।
अजरामरता लब्ध्यै निपीतममृतोपमम् ॥ ७ ॥

ज्योतिश्चक्रं यथा व्योम्नि, ज्ञानचक्रं तथा हृदि ।
दिव्यं मनोभिधानं त-द्विश्वविश्वप्रकाशकम् ॥ ८ ॥

संसारचक्रात्संवृत्य, ब्रह्मण्याधीयते मनः ।
प्रसन्नचन्द्रवत्तर्हि, सद्यः केवलमुद्भवेत् ॥ ९ ॥

संकल्पवातैरुल्लास्य-मानं स्यान्मनसः सरः ।
कलुषं किल तन्मध्य-मग्नं किञ्चिन्न वीक्ष्यते ॥ १० ॥

मनोमलविशुद्ध्यै तत्, मुनिर्निर्दोषमाहरेत् ।
पर्वण्युपोष्य शेषेह्नि, द्विर्वैकशोऽशनं शनैः ॥ ११ ॥

रागसंवर्धनं भूरि, विकृत्यादि विषादिकम् ।
द्वेषकृन्मोहकृन्मद्यं, नाश्नीयाद् ज्ञानवान् मुनिः ॥ १२ ॥

यथान्यचेतसो वृत्ते, र्ज्ञानाय लग्नमीक्ष्यते ।
चन्द्रस्वरूपमत्रापि, तथा स्वमनसोप्यहो ॥ १३ ॥

चन्द्रराशिर्मनश्चक्रं, तिथयो वत्सरास्तथा ।
तत्त्रिंशांशाद् द्वादशांशा-न्मासा पक्षस्तु होरया ॥ १४ ॥

नवग्रहाः नवांशेभ्यो, वाराः सप्तांशलाभतः ।
भावाश्च राशिकुण्डल्यां, भाव्याः ग्रहबलोदयात् ॥ १५ ॥

चन्द्रविश्ववशाविष्टाः, षट्त्रिंशद्द्वादशाथवा ।
प्रति द्रेष्काणमिन्दो स्यात्, नक्षत्रं नवकं क्रमात् ॥ १६ ॥

आदौ मध्येऽवसाने वा, ज्ञेयं भानां त्रयं त्रयम् ।
त्रयेप्याद्यं चरेच्चन्द्रे, द्वितीयं भं स्थिरे पुनः ॥ १७ ॥

द्विस्वभावे तृतीयं भमेवं नक्षत्रनिर्णयः ।
प्रभुत्वान्मनसश्चेन्दो-रेवं गम्या मनोगतिः ॥ १८ ॥

दुष्टायां मनसो गत्यां, ज्ञातायां न शुभां क्रियाम् ।
कुर्याच्चातुर्यवान् धीरः, श्रेष्ठायां नाशुभां ततः ॥ १९ ॥

अधर्मे चेत्प्रवर्त्तेत मनः स्वीयं पुनः पुनः ।
तदा भावि महद् दुःखं, मत्वा तत् धारयेत्ततः ॥ २० ॥

धर्मे यस्य मनो वश्यं, वश्यं तस्य जगत्त्रयम् ।
सेवापरवशाः देवाः भवेयुस्तद्भवेप्यहो ॥ २१ ॥

## ॥ अष्टमोऽध्यायः ॥ ८ ॥

ऐन्द्रे प्रवहणे धर्मे, ज्ञानी मार्गप्रकाशकः ।
निर्यामकस्तु चरणी, दर्शनी पारगः स्थिरः ॥ १ ॥

रागःकज्ज्ञलिका द्वेषो-ऽवह्निस्थानं विमूर्च्छनाः ।
मोह एतत्त्रयीनाशे पारदोङ्गी सुसिद्धिभाक् ॥ २ ॥

ज्योतिर्ज्ञानं पुनः स्नेहः, श्रद्धा वृत्तं तु वर्तिका ।
जिनप्रवचने सौधे, धर्मदीपः प्रकाशताम् ॥ ३ ॥

पञ्चेन्द्रियाणि ज्ञानस्य, क्रियायाः पञ्चवस्तुतः ।
अनिन्द्रियस्य मनसः, श्रद्धाकार्याणि साधयेत् ॥ ४ ॥

लोकप्रतीता सर्वज्ञे, यथा नेत्रत्रयीश्वरे ।
स्वेष्टदानेश्वरस्यासौ, ज्ञानादिर्धर्मभूभुजः ॥ ५ ॥

विनारत्नत्रयं धर्म्यं, नैवालंकृतिता क्वचित् ।
व्यसनाद्वारिते तस्मिन्, ध्रुवं दौर्गत्यवान्नरः ॥ ६ ॥

यानपात्रं सितपटः, विना कस्तारयेज्जले ।
तस्माद्भवजलोत्तारे, न्याय्यः सितपटादरः ॥ ७ ॥

ज्ञानं सूत्रं रुचिश्चार्थो निर्युक्तिरुभयात्मकम् ।
चरणं तत्त्रये धर्म-शास्त्रं बोधाय देहिनाम् ॥ ८ ॥

धर्मो वृषभमूर्त्यैव, श्रद्धेयः श्राद्धरोचकैः ।
पदैश्चतुर्भिः पूर्णोयं, नात्र किं सुकृतोदयः ॥ ९ ॥

देवः कृष्णो वराहास्यः, कल्की यत्राभिमन्यते ।
विप्रयोगि गुरुत्वं च, धर्मः स कलितोदितः ॥ १० ॥

जातवेदः प्रतिष्ठाने, भूसुराद्रितगौरवे ।
मतिर्नावति हासादौ, रागी धर्मेण तत्र कः ॥ ११ ॥

यत्रास्ति वामनो देवो, धर्मे नाम्ना जनार्दनः ।
गुरौ च कण्ठमालास्मिन्, न्यायः पूज्यः कलिप्रियः ॥ १२ ॥

देवोऽस्थिधन्वा पुरुषा-स्थिमाला यत्र भैरवः ।
कापालिकाश्च गुरव-स्तद्धर्मे वार्तया शिवम् ॥ १३ ॥

देवो मायासुतस्तस्य, मायाराध्यैव बुध्यते ।
मायाराधनतो ब्रह्म-मयो धर्मः श्रुतौ मतः ॥ १४ ॥

देवः श्रीनाभिभूः पूर्वो, वर्धमानस्तथान्तिमः ।
अन्योप्यजितशान्त्याद्य-स्तत्र धर्मे शिवं दृढम् ॥ १५ ॥

क्षमाप्रधाना गुरवः, सर्वाङ्गज्ञानभाजनम् ।
दक्षाः षडङ्गिरक्षायां, शिक्षायां सुगुरोस्तथा ॥ १६ ॥

धर्मस्य मूलं विनयः, स्वरूपं नियमाः यमाः ।
विस्तारः पञ्चधाचारः, फलं चास्यापुनर्भवः ॥ १७ ॥

धर्मध्यानान्मनःशौचं, वाक्शौचं सत्यनिश्चयात् ।
दयाचरणतः काय-शौचमालोचयेन्मुनिः ॥ १८ ॥

शौचं च द्रव्यभावाभ्यां, यथार्हं चार्हता स्मृतम् ।
अस्वाध्यायं निगदता, दशधौदारिकोद्भवम् ॥ १९ ॥

कुदेवे कुत्सिता भक्तिः, कुज्ञानं कुगुरोर्भवेत् ।
कुलिङ्गात् धर्मकुत्सैव, ज्ञेया श्रीधनपालवत् ॥ २० ॥

उज्ज्वलात् पक्षतः कृष्णे-पक्षेऽन्ये यान्ति धार्मिकाः ।
आर्हताः कृष्णतः शुक्ले, विशन्ति सुधियः न किम् ॥ २१ ॥

## ॥ नवमोऽध्यायः ॥ ९ ॥

ऐन्द्रज्योतिः स्फुटं धर्मा-त्स्वरूपाध्यानतो भवेत् ।
नित्यक्षयात्पुद्गलानां, जातेऽन्धतमसां क्षये ॥ १ ॥

नीचैः पुद्‌गलबाहुल्यां, नरकादौ तमोघनम् ।
द्रव्यतो भावतोप्युच्चै-र्ज्योतिर्बाहुल्यतोङ्गिनाम् ॥ २ ॥

यथैवोच्चैर्गतिर्वह्नेः, प्रकाशात्मतया स्वतः ।
तथात्मनोपि तद्धर्मा-दुच्चैर्गतिरवाप्यते ॥ ३ ॥

मोहात् पुद्‌गलसंयोगे, भवेज्जाड्यमयं तमः ।
नीच्चैर्गतिस्ततोऽधर्माद् गौरवे नम्रता ध्रुवम् ॥ ४ ॥

यादृशो ध्यायते येन, फलमाप्यते तादृशम् ।
शुभयोगः शुभध्याना-दशुभध्यानतोऽशुभम् ॥ ५ ॥

वर्णादिः पुद्‌गलगुण-च्छाया मायामयी ततः ।
जनयत्यङ्गिनां मोहं, न मोहः सात्विके मनाक् ॥ ६ ॥

यथा यथा त्यजेन्माया-मियं वश्या तथा तथा ।
वणिजो दीक्षणे जाताः, सम्पदोपि पदे पदे ॥ ७ ॥

स्त्रीत्वान्मायास्ति वामाङ्गी, योऽस्यावश्यः सदाशयः ।
त्यक्त्वा तं दासवद्दूरे, भोक्तारमपरं भजेत् ॥ ८ ॥

ज्ञाने प्रधानता पुंसः, भोगे नार्यास्ततः सुते ।
पाठः प्रियः कुमार्यास्तु, भ्रमिक्रीडा मनः प्रिया ॥ ९ ॥

ज्ञानधर्मः पौरुषां कं, त्यजेद्यस्तु कदापि न ।
लक्ष्मीर्भोगप्रिया नैतं, चेतसी नाम मुञ्चति ॥ १० ॥

पौरुषं भोगलुब्धेन, त्यक्तं धर्मात्मकं धिया ।
स्त्रीमयान्मूर्खतस्तस्मा-ल्लक्ष्मीर्दूराऽभिसर्पति ॥ ११ ॥

संसारमूलं स्त्री तस्याः, प्रकृति र्भोगभावनम् ।
तन्मयो यस्तु तस्याधः-पातो न्याय्यःस्त्रिया इव ॥ १२ ॥

वैरं लक्ष्म्याः सरस्वत्या, नैतत्प्रामाणिकं वचः ।
ज्ञानधर्मभृतो वश्या, लक्ष्मीर्न जडरागिणी ॥ १३ ॥

ज्ञानी पापाद्विरतिभाग्, यः स वै पुरुषोत्तमः ।
तस्यैव वल्लभा लक्ष्मीः, सरस्वत्येव देहभाक् ॥ १४ ॥

ज्ञानी न विरमेन्मोहा-ल्लक्ष्मीस्तस्यैव वैरिणी ।
अज्ञानव्रतकष्टस्थे, सरस्वत्या हि शात्रवम् ॥ १५ ॥

भोगासक्तो न सद्ज्ञानी, ज्ञानी तत्त्वाद्विरागवान् ।
विरुद्धताऽनयोः स्थाना-त्स्याच्छायातपयोरिव ॥ १६ ॥

धर्मो यथेप्सितं दातुं, कर्तुं वा परमेश्वरः ।
*यत्रावतीर्णो निर्दम्भं, स साधुःपूज्यते सुरैः* ॥ १७ ॥

पात्रेऽवतीर्णो देवादि-स्तन्मुखेन प्रजल्पति ।
तद्भक्तिः पात्रभक्त्यैव, साधोर्धर्मस्थितिस्तथा ॥ १८ ॥

तुलान्यायेन समता, धर्मः सर्वार्थसिद्धिदः ।
रागो द्वेषोप्यधर्माङ्गं, सारमेतत्सतां गिरः ॥ १९ ॥

द्वेषादपि च दुर्जेयो, रागः संसारकारणम् ।
तज्जयाद्वीतरागोयं, देवानामधिदैवतम् ॥ २० ॥

यो वीतरागोऽसौ देव-स्तद्वाक्यानुगतो गुरुः ।
तदाज्ञाराधनं धर्म-स्सोऽयं तत्त्वसमुच्चयः ॥ २१ ॥

## ॥ दशमोऽध्यायः ॥ १० ॥

ऐन्द्रज्योतिः प्रकाशाय, रागद्वेषजिगीषया ।
एकत्वभावना विश्वे-ऽप्यादिष्टा विश्ववेदिभिः ॥ १ ॥

शुभाशुभाद्यनेकत्वं, विशेषविषयं पुनः ।
हेयोपादेयबोधेन, प्राकाशीच्छा विमुक्तये ॥ २ ॥

पूर्वे पृथक्त्वविचारं, शुक्लध्यानांह्रिमामृशेत् ।
ततोप्येकत्वविचारात्, केवलज्ञानमुल्लसेत् ॥ ३ ॥

स्यात्सामान्यविशेषात्म-भवः प्रामाण्यगोचरः ।
ज्ञेयोऽनेकान्तवादेन, नयमार्गादनेकधा ॥ ४ ॥

सामान्यं संग्रहो वक्ति, ऋजुसूत्रो विशेषवाक् ।
स्वतन्त्रौ नैगमादेतौ, लोकोक्त्या व्यवहारधीः ॥ ५ ॥

मृत्सुवर्णायसां कुम्भा, एक एवाम्बुधारणे ।
परिमाणाकृतिस्थान-मूल्यैःसर्वे पृथक् पृथक् ॥ ६ ॥

अपक्वे न जलाहारः, पक्वेऽसौ तौ ततः पृथक् ।
कुम्भत्वं काणकुम्भेपि, व्यवहारेण मन्यते ॥ ७ ॥

चत्वारोऽर्थनया एते, परं शब्दे नयत्रयम् ।
वाच्यवाचकयोर्योगाद्, शाब्दिका वार्थिकाः समे ॥ ८ ॥

आर्यदेशे धर्म इति, श्रुत्या शब्देन धर्मवान् ।
देशोऽव्रती व्रती धर्मी, श्राद्धः समभिरूढतः ॥ ९ ॥

मुनिर्मुनिक्रियाविष्ट-स्तन्मुक्तो न मुनिःपुनः ।
एवम्भूतनयादेवं, धर्मी सिद्धोस्ति केवली ॥ १० ॥

धर्मी जीवःसमग्रोपि, ज्ञानवांश्चेतनारतः ।
एकेन्द्रियाणामज्ञान-मृजुसूत्रनयार्पणात् ॥ ११ ॥

वस्तुस्मृत्या भवेद् ज्ञानी, सोऽज्ञानी विस्मृतेर्मतः ।
नैगमात् शिशुरज्ञानी, व्यवहारदृशोरसात् ॥ १२ ॥

प्रसुप्ते मूर्छिते मत्ते, न ज्ञानं शाब्दिके नये ।
तद्दर्शनोपयोगश्च, न ज्ञानीत्यागमे वचः ॥ १३ ॥

घटं ज्ञात्वा पटज्ञो न, घटज्ञोप्यभिरूढितः ।
एवम्भूतेन घटज्ञ, एवं सर्वत्र भावना ॥ १४ ॥

मिथ्यादृष्टिरतोऽज्ञानी, ज्ञानी विमलदर्शनी ।
यो यत्रानुपयुक्तोयं, द्रव्यजीवस्तदा तथा ॥ १५ ॥

अमुक्ते मुक्ततापीष्टा, जिने राजर्षिता मुनौ ।
असाधोरतिमुक्तस्य, साधुसेवागमोदिता ॥ १६ ॥

सूर्यबिम्बेपि सूर्यत्वं, जिनबिम्बे जिनागमः ।
युक्ताहारविहारादौ, साधुर्हन्ताप्यहिंसकः ॥ १७ ॥

अनाश्रवः केवलीति, सत्यप्याश्रवसप्तके ।
बद्धदेवायुषो देवो, वाच्यः सति नृजन्मनि ॥ १८ ॥

अल्पेऽभावविवक्षातः, क्वचिद् बाहुल्यचिन्तया ।
पक्षे सिताऽसितत्वादि, व्यवहारदिशा क्वचित् ॥ १९ ॥

विधेयेऽपि निषिद्धत्वं, निषिद्धेषु विधेयताम् ।
आगमेपि समादेशि, वीरेण जगदीशिना ॥ २० ॥

तस्माद् बहुश्रुतैः पूर्वै-राचीर्णश्चरणोद्यतैः ।
धर्मः शर्मकरः कार्यः, श्रद्धेयस्तत्त्वकाङ्क्षिभिः ॥ २१ ॥

## ॥ एकादशोऽध्यायः ॥ ११ ॥

### श्री गौतम उवाच

ऐन्द्रो धर्मः स्मृतं ज्ञान-मात्मधर्मस्य निश्चयात् ।
तदा नाऽधर्मवान् कोपि, चैतन्यात् सर्वजन्तुषु ॥ १ ॥

### श्री भगवानुवाच

ज्ञानं द्विधा मयाम्नातं, स्वभावात् शुद्धमात्मनः ।
अशुद्धं पुद्गलोपाधे-राद्यं धर्मोऽन्यथा परम् ॥ २ ॥

यस्माद्देहे सुखं स्वल्पं, महद्दुःखं तथात्मनः ।
तद्ज्ञानं तत्त्वतो नेष्टं, श्रेष्ठं येनात्मनः सुखम् ॥ ३ ॥

विषमिश्रपयः पान-समानं स्याद्भवे सुखम् ।
पुद्गलानामुपादानात्, प्रत्युतानर्थकारणम् ॥ ४ ॥

अर्थोप्यनर्थहेतुः किं, नाज्ञानादुद्यमस्पृशाम् ।
चतुर्णां वणिजामत्र, दृष्टान्तात् कुमतिं त्यज ॥ ५ ॥

गव्यं दुग्धमुपादेयं, हेयमर्कस्नुहीभवम् ।
तथा ज्ञानमुपादेय-मेकं हेयं विवेकिना ॥ ६ ॥

येनात्मनः स्यादानन्दः, केवलो मायया विना ।
तदवाच्यं सुखं मोक्षं, तत्र भिल्लनिदर्शनम् ॥ ७ ॥

हेयमेवमुपादेय-मादेयमपि हीयते ।
द्रव्यक्षेत्रकालभावैः, स्याद्वादस्यादरस्ततः ॥ ८ ॥

ज्ञानं विशिष्टमादेयं, हेयोपादेयगोचरम् ।
अज्ञानी तद्विना जन्तु-लालापानान्न चाम्बुपः ॥ ९ ॥

यथैवानुदरा कन्या-प्यलोमा एडका पुनः ।
लोमाहारेप्यनशनी, युक्तचेलोप्यकिञ्चनः ॥ १० ॥

कान्ताऽबलानगारोपि, शय्यादिषु वसन्नपि ।
वस्त्रपात्रादि धरणे-प्यपरिग्रहवान्मुनिः ॥ ११ ॥

माया विहीनं ब्रह्मैव, कैवल्याय विचिन्त्यते ।
साक्षरो वा सकर्णः स्या-च्छास्त्रज्ञोऽनक्षरः परः ॥ १२ ॥

आखुकुर्कुरमार्जारैः, सद्भिः कोपि न गोधनी ।
धनी वा रेणुभस्मौघै-स्तथा ज्ञानी भवोन्मुखः ॥ १३ ॥

योयं संश्रयते मार्गं, स तं शुद्धं प्रपद्यते ।
तच्छुद्धज्ञानलाभाय, परीक्षैषा विधीयताम् ॥ १४ ॥

बलिना छलिनाप्युच्चैः, कलिना मलिनात्मना ।
नाश्यं शुद्धमशुद्धं च, प्रकाश्यं तन्मयो ह्ययम् ॥ १५ ॥

संगतःसर्वशास्त्रेषु, सुधिया च परीक्षितः ।
सोयं भागवतः पन्था, विभिन्नस्तु तदन्यथा ॥ १६ ॥

सत्यं शौचं दया क्षान्ति-स्त्यागः सन्तोष आर्जवम् ।
शमो दमस्तपः साम्यं, तितिक्षोपरतिः श्रुतम् ॥ १७ ॥

ज्ञानं विरक्तिरास्तिक्यं, प्रागल्भ्यमनहंकृतिः ।
मार्दवं प्रश्रयः शीलं, स्थैर्यं च कौशलं स्मृतिः ॥ १८ ॥

इमे चान्येपि धैर्याद्याः, नित्या यस्मिन् महागुणाः ।
प्रार्थ्यो महत्त्वमिच्छद्भि, र्हीयते स न कर्हिचित् ॥ १९ ॥

प्रायशो गुणपात्रेण, श्रीनिवासेन सांप्रतम् ।
दृश्यते रहितो लोकः, पाप्मना कलिनेक्षितः ॥ २० ॥

क्षान्त्यादि दशधा धर्मे-न्तर्भवन्ति गुणाः समे ।
शुद्धैर्यत्तैर्गुणैर्योगा-त्तत् ब्रह्म समुपास्यताम् ॥ २१ ॥

## ॥ द्वादशोऽध्यायः ॥ १२ ॥

### श्री गौतम उवाच

ऐन्दवाच्चारतो ज्योतिः, शास्त्रेण भावि मन्यते ।
मनसा तत्कथं वेद्यं, तन्मार्गं कथय प्रभो ॥ १ ॥

### श्री भगवानुवाच

मानसान्येव वर्षाणि, अयनं वार्तवस्तथा ।
मासा पक्षो दिनं वेला-वारा भं तिथयः पुनः ॥ २ ॥

सूर्योदयान्मनोम्भोजे, कला बोधस्य वर्धते ।
तमारभ्यैव वर्षाणां, षष्टिः प्रतिकलं स्मृताः ॥ ३ ॥

वर्षाणां प्रभवादीनां, भावो मनसि जायते ।
सूक्ष्मत्वात्स तु दुर्ज्ञानः, संज्ञेयः सुधिया स्वयम् ॥ ४ ॥

उग्रे दीप्ते तपो रक्ते, तेजस्विन्युत्तरायणम् ।
चित्ते शान्तिः जाड्यभाजि, निद्राणे दक्षिणायनम् ॥ ५ ॥

दिनं प्रमाणं कथितं, मानसं ह्युत्तरायणम् ।
देव एव सतां चेतो, रात्रिस्तद्दक्षिणायनम् ॥ ६ ॥

साहंकारे च सोत्कर्षे, स्वस्य वृत्तौ वसन्तकः ।
क्रुद्धे सतृष्णे लोकानां, तापने ग्रीष्मवानृतुः ॥ ७ ॥

दाने रसे प्रकाशादौ, वर्षा मनसि निश्चिते ।
शौचे देशान्तरभ्रान्तौ, शरदेव धनार्जने ॥ ८ ॥

जाड्ये प्रदीपने वह्नेः, परिधाने च भोजने ।
हेमन्तः शिशिरः क्रीडा, व्रीडा पीडारतादिषु ॥ ९ ॥

सूर्योदयादहोरात्रे, मानेन दशनाडिकाः ।
वसन्ताद्या हि ऋतवः, प्रोक्ता मन्त्रागमे ततः ॥ १० ॥

वर्षासु लवणममृतं, शरदि जलं गोपयश्च हेमन्ते ।
शिशिरे चामलकरसं, घृतं वसन्ते गुडश्चान्ते ॥ ११ ॥

दृश्यते चिन्त्यते यद्वा, कथ्यते यादृशो रसः ।
तादृग् ऋतुः प्रश्नफले, मनोज्ञेन विमृश्यताम् ॥ १२ ॥

मेषो दिदृक्षया जल्पे, वृषो भोगे तु मैथुनम् ।
जले वाञ्छाबलात् कर्की, सिंहः सात्त्विकचिन्तया ॥ १३ ॥

कन्या जाड्येन चापल्ये, क्षमायां सुभगादरे ।
व्यवसाये तुला कीटः, पैशुन्यखलतेच्छया ॥ १४ ॥

रणे छायावाहनादेः, संग्रहे धन्वितान्विता ।
समुद्रवार्तया क्रौर्या-च्चापल्ये मकरो हृदि ॥ १५ ॥

स्थैर्येण कार्ये सारस्ये-ऽमलिनाचरणारूचेः ।
कुम्भोदयोथ माङ्गल्ये, मीनो धर्मे शिते शुभे ॥ १६ ॥

वस्तु यद्राशिसंबद्ध-मुपानेयमचिन्तितम् ।
भक्ष्यं वा मनसा ध्येयं, मनोराशिः मनोजवत् ॥ १७ ॥

जल्पेद् यद्राशिमान्जीवो, भवेद्यद्वा मनःप्रियम् ।
मनःशास्त्रविदा मान्य-स्तद्राशिर्मानसस्तदा ॥ १८ ॥

अधर्मभावनाद्रात्रि-र्दिवसो धर्मनिष्ठया ।
शुभभावनया शुक्ल-पक्षः कृष्णो विपर्ययात् ॥ १९ ॥

वृद्धौ नन्दा शिवे भद्रा, युद्धे राज्ये जयेच्छया ।
योगे रिक्ता मोक्षलाभे, पूर्णापूर्णेच्छयाहृदि ॥ २० ॥

एभिश्चिह्नैर्मनो मत्वा, कार्ये तात्कालिके फले ।
प्रश्ने भाविनि वा भावे, लाभयेत्सिद्धिनिश्चयम् ॥ २१ ॥

## ॥ त्रयोदशोऽध्यायः ॥ १३ ॥

### श्री गौतम उवाच

ऐन्द्रं प्रधानतो ज्योतिः, मनस्येव विजृम्भते ।
तिथिवारभमेतस्य, प्रकाशय जगत्प्रभो ! ॥ १ ॥

### श्री भगवानुवाच

ऐक्ये तिथिः स्यात् प्रथमा, द्वितीया द्वित्ववाञ्छया ।
त्रिधा प्रवृत्तौ तृतीया, चतुर्थी त्यागयोगतः ॥ २ ॥

पञ्चमी पञ्चकधिया, षष्ठी षड्वस्तुभावनात् ।
सप्तमी सप्तधाभावात्, अष्टमी अष्टधार्थतः ॥ ३ ॥

एवं यत्संख्यया भाव-श्चिन्त्यते दृश्यतेऽथवा ।
कथ्यते तिथिरावेद्यः, प्रश्ने तत्संख्यया हृदः ॥ ४ ॥

लिखित्वाङ्कान् पञ्चदश, यद्वा तन्दुलपुञ्जकान् ।
विन्यस्य नाणकं तेषु, क्रियते तिथिनिर्णयः ॥ ५ ॥

श्रावणः स्यात् श्रुतौ धर्म-शास्त्रे भाद्रपदः पुनः ।
धर्मकर्मच्छिवप्राप्ते-रिच्छया तपसोऽश्विनः ॥ ६ ॥

स्नानभूषणसाम्राज्य-वाञ्छया कार्तिकः स्मृतः ।
जगच्छीर्षे शिवपदं, तन्मार्गेच्छापरः परः ॥ ७ ॥

पोषोऽतिपोषात् पुत्रादे-र्माघो वैरिविनाशने ।
फाल्गुनो मैथुने पात्र-त्यागे विवसनाशया ॥ ८ ॥

चैत्रो विचित्रव्यापारे, परः शाखासु वर्धनः ।
ज्येष्ठानुसाराज्ज्येष्ठोपि, शुचौ शौचं शिवस्पृहा ॥ ९ ॥

मनस्यर्कोदयो द्रष्टुं, भोक्तुं पातुं तथेच्छया ।
जाड्येन शान्त्या वाक्येन, मृष्टेन च विधूदयः ॥ १० ॥

कषाये नोकषाये वा, वाञ्छा मङ्गलवारतः ।
ज्ञाने ध्याने शास्त्रवार्त्ता, बिधौ वारस्तु बोधनः ॥ ११ ॥

देवार्चने गुरोः सम्यक्, सेवने पान्थकादिवत् ।
परोपकारे विद्यादौ, हृदि वाञ्छा गुरूदयः ॥ १२ ॥

राजन्यायेथ यवना-चाराध्ययनचिन्तने ।
स्थापनोत्थापने तीर्थ-यात्रायां भार्गवो हृदि ॥ १३ ॥

हिंसायामनृते क्रूर-कार्ये चौर्यादिकर्मणि ।
द्युतादेरिच्छया मान्द्ये, ज्ञेयं मन्दमयं मनः ॥ १४ ॥

अश्विनीच्छावशाद् गत्यां, याम्यं रोगेऽर्थ संग्रहे ।
व्रते तपसि वाग्नेयं, ब्राह्म्य स्यात् पाठशौचयोः ॥ १५ ॥

मृगाच्चापल्यमार्द्रायां, स्नाने पानेम्बुवर्षणे ।
पुनर्वसू धनोत्पादे, पुष्यः पोषणकर्मणि ॥ १६ ॥

सार्प्यं विषेऽन्यदोषोक्तौ, मघा स्वपितृतर्पणे ।
भोगादौ पूर्वफाल्गुन्या-मुत्तरात्वग्निदीपने ॥ १७ ॥

कलाभ्यासबलं हस्ते, विचित्रेच्छा तु चित्रया ।
स्वातौ वातप्रयत्नाद्यै-श्वर्य काम्यं विशाखया ॥ १८ ॥

राजदेव कलामैत्रे, ज्येष्ठायां ज्येष्ठसंगतिः ।
धनं वा भोजनं मूले, महान् लोभः परद्वये ॥ १९ ॥

श्रुतौ धर्म्या श्रुतिसेवा, धनिष्ठायां महद्धनम् ।
जलक्रीडादि वारूण्यां, शिवमिच्छेत् परद्वये ॥ २० ॥

अन्यायवारणे भूयः प्रतापोदयः कारणे ।
राजधर्मात् प्रजापोषे, रेवत्यां मानसी रूचिः ॥ २१ ॥

## ॥ चतुर्दशोऽध्यायः ॥ १४ ॥

### श्री गौतम उवाच

ऐन्द्रं स्वरूपं नाडीभि-र्ज्योतिर्ज्ञो वा भिषग्वरः ।
भूतं भावि भवद्वेत्ति, ज्ञेयं तन्मनसा कथम् ॥ १ ॥

### श्री भगवानुवाच

नाभिस्थं नाडिकोरः श्वं, मनश्चक्रं प्रचालयेत् ।
वायुना तेन संकल्पा, जायन्ते बाह्यहेतुभिः ॥ २ ॥

प्राणायामबलान्मन्त्र-ध्यानाज्जीवस्य भावनात् ।
ब्रह्मद्वारे मनो लीनं, भवेद्विश्वप्रकाशकम् ॥ ३ ॥

वातोदयाद्भवेच्चित्ते, जडताऽस्थिरता भयम् ।
शून्यत्वं विस्मृतिः भ्रान्ति-ररतिश्चित्तविभ्रमः ॥ ४ ॥

पित्तोदयाच्चचञ्चलत्वं, साहसं क्रुद्धता स्मरः ।
कफोदयात् स्नेहहास्य-शोका मौढ्यं रतिः परा ॥ ५ ॥

ज्ञानावरणसंज्ञेयो, वातः सिद्धान्तवादिनाम् ।
पित्तुमायुः स्थितेर्वाच्यं, नामकर्म कफात्मकम् ॥ ६ ॥

रक्ताधिक्येन पित्तेन, मोहप्रकृतयोऽखिलाः ।
दर्शनावरणं रक्त-कफसांकर्यसंभवम् ॥ ७ ॥

तत्तद्विकारजं वेद्यं, गोत्रं पित्तकफात्मकम् ।
अन्तराय: सन्निपाता-देषां विकृतिकारणम् ॥ ८ ॥

ज्ञात्वाभ्यासान्मनोभावान्, बाह्यैराध्यात्मिकैस्तथा ।
अमीभिर्हेतुभिर्वश्यं, मनोऽवश्यमनिच्छया ॥ ९ ॥

परमात्मा तत: साक्षात्, प्राणरूढमन:स्थिति: ।
मन:साध्यो मनोध्येयो, मनोदृप्तस्समीक्ष्यते ॥ १० ॥

मनोवश्याय जायन्ते, ह्युपाया बहुधा जने ।
ज्ञाने क्रियान्विते सर्वे-न्तर्भवन्ति भवद्रूह: ॥ ११ ॥

अज्ञानवादिनस्त्याज्या, अक्रियावादिनोऽपि च ।
यतो ज्ञानक्रियायुक्त:, पिण्डोयं दृश्यते न किम् ॥ १२ ॥

संसरेत् सक्रियो जीवो, निष्क्रियोऽकर्मवान् शिव: ।
क्रियेन्द्रियाण्यध: पिण्डे, ज्ञानेन्द्रियाणि चोपरि ॥ १३ ॥

ज्ञानस्य पुंस: स्थैर्याय, क्रिया प्रियास्ति सात्विकी ।
शान्तो रसस्तया साध्य:, प्रीणनीयोऽमुना मुनि: ॥ १४ ॥

काये हि लक्षणं भावि, वस्तुन: स्फुरणादिना ।
वाच्योपश्रुतिसूक्ताद्यै-स्तथा चित्तेऽर्थभावनै: ॥ १५ ॥

लोकानुभावेन जलं, यथा शरदि निर्मलम् ।
मन: सद्ज्ञानसंबद्धं, लोकालोकप्रकाशकम् ॥ १६ ॥

प्रधानं कारणं ज्ञानं, मोक्षस्य न तथा क्रिया ।
अन्यलिङ्गेन किं सिद्धि-र्ज्ञानात्साम्ये समीयुषि ॥ १७ ॥

ऋते ज्ञानान्न मुक्ति:स्यात्, क्रियाक्लेशे महत्यपि ।
तद्ज्ञानं मनस:शुद्ध्या, बुद्ध्या वृद्ध्याभिजायते ॥ १८ ॥

अनित्याशरणत्वादि-लोकान्तपरिभावनै: ।
मनोति निर्मलं धारं, सत्प्रकाशाय जायते ॥ १९ ॥

तत्त्वचिन्तनया शास्त्रा-ऽनुगामिन्या मनः शिवे ।
आत्मन्येव निबध्नाति, योगी नेन्द्रियगोचरे ॥ २० ॥

मनसि श्रद्धया धर्मो, न कृतोपि फलप्रदः ।
बलभद्र इव ब्रह्म-लोकभाग् ध्यानवान्मृगः ॥ २१ ॥

## ॥ पञ्चदशोऽध्यायः ॥ १५ ॥

### श्री गौतम उवाच

ऐन्द्रपूज्य ! जगन्नाथ ! प्रसादेन निवेदय ।
किं तत्त्वं विदुषां ज्ञेयं, साधनं शिवसम्पदः ॥ १ ॥

### श्री भगवानुवाच

सत्त्वरूपं महातत्त्वं, यद् ब्रह्मेत्यभिधीयते ।
तदेकं परमं वस्तु, द्वैतं तत्र न भासते ॥ २ ॥

भावः पदार्थः सद्रूपो-ऽस्तिक्रियार्थः परो गुणी ।
शुद्धद्रव्यं तथा धारः, प्रमेयश्चाऽभिधान्वयी ॥ ३ ॥

अनन्तः परिणामी चा-नन्तशक्तिधरः स्वभूः ।
लोकालोकतया ख्यातः, सिद्धो बुद्धः शिवोऽव्ययः ॥ ४ ॥

स्यादेकं केवलं ज्ञानं, ज्ञेयं तस्यैकमिष्यते ।
ज्ञानाद् ज्ञेयं न भिन्नं स्यात्सर्वथा स्वप्रकाशवत् ॥ ५ ॥

ज्ञेयग्रहपरिणामाद्, ज्ञानी ज्ञेयाकृतिः स्मृतः ।
तेनात्मा भगवान् विष्णु-रर्हन् ब्रह्ममयः स्वयम् ॥ ६ ॥

लोकालोकस्वरूपज्ञः, स लोकालोक उच्यते ।
अग्निज्ञानादिव ज्ञाता, ऽऽगमेप्यग्निरूदीरितः ॥ ७ ॥

यदैकत्वविमर्शः स्या-त्तदैव केवलोदयः ।
ध्रौव्यभावनया द्रव्यं, विकृतं न कृतं क्वचित् ॥ ८ ॥

उत्पादो वा विपत्तिश्च, द्रव्येऽवस्थान्तरोदयात् ।
नावस्था तद्वतो भिन्ना, सर्वथाश्रयवर्जिता ॥ ९ ॥

न संबन्धं विना किञ्चित्, प्रकाश्यं स्यात्प्रकाशकैः ।
न सर्वथा स संबन्धि-भेदे वाचकवाच्यवत् ॥ १० ॥

सूर्यः प्रातर्यथा रत्न-जलादर्शादि वस्तुषु ।
संक्रामंस्तापवत्सर्वं, कुरुते गुरुतेजसा ॥ ११ ॥

एकस्तथैव सद्भावः, स्वैर्विवर्तैः प्रवर्त्तते ।
हेयोपादेयता बुद्धि-स्त्याज्या सांसारिकी ततः ॥ १२ ॥

स्वं परं लघु वा स्थूलं, न शुभं नाशुभं हृदि ।
त्याज्यं ग्राह्यं न किञ्चित्स्या-द्विधैरैक्ये सुबुद्धिवत् ॥ १३ ॥

मान्यं यथान्ये सामान्यं, स्यादेकं व्यक्तिषु स्फुटम् ।
एको वा समवायोप्य-वयव्यवयवादिषु ॥ १४ ॥

जैना अपि द्रव्यमेकं, प्रपन्ना जगतीतले ।
धर्मोऽधर्मोऽस्तिकायो वा, तथैक्यं ब्रह्मणे मतम् ॥ १५ ॥

लोकालोकासमाकाशं, परिणाम्येकमात्मना ।
तथा कथा न वितथा, स्यादेकब्रह्मणः सतः ॥ १६ ॥

स्याद्भाव एक एवाय-मस्ति प्रत्ययगोचरः ।
तल्लक्षणो निषेधोपि, सविधेः सविधे खलु ॥ १७ ॥

सत्तां विना नासत्ता स्या-न्नाजीवो जीववर्जने ।
ज्ञेयत्वादिगुणैरेवं, नभावो भावतोऽपरः ॥ १८ ॥

विधिर्विधत्ते स्वं रूपं, स्वेन विश्वेन संगतम् ।
विधिर्वेद्यो जगत्कर्ता, भर्ता हर्ता स्वशक्तितः ॥ १९ ॥

एकस्य ब्रह्मणःसर्वे, विवर्त्ताः प्रतिभान्त्यमी ।
अनन्तशक्तेर्नानाऽर्थाः, क्रियाभावेन वास्तवाः ॥ २० ॥

परसंग्रहवागेषा, विषयोऽस्या हि तात्त्विकः ।
स तात्त्विकस्तं यो वेत्ति, ज्ञानवैराग्यसात्त्विकः ॥ २१ ॥

## ॥ षोडशोऽध्यायः ॥ १६ ॥

### श्री गौतम उवाच

ऐक्यं सर्वत्र सर्वज्ञः, कथं मनसि भाव्यते ।
प्रपञ्चोऽर्थक्रियाकारी, वस्तुतः वस्तुनः क्षितौ ॥ १ ॥

लोकालोकस्तथाजीवो, ऽजीवःस्याच्चेतनोऽन्यथा ।
रूप्यरूपी तथा सिद्धः, साधकः सेव्यसेवकौ ॥ २ ॥

पुण्यपापे बन्धमोक्षौ, वेदनानिर्जरे त्वपि ।
आश्रवःसंवरश्चेति, साक्षाद्द्वैविध्यमार्थिकम् ॥ ३ ॥

### श्री भगवानुवाच

वैकल्पिकमिदं सर्वं, व्यवहारनयाश्रयात् ।
गौणमुख्यविवक्षातः, ख्यातः सर्वोऽर्थसञ्चयः ॥ ४ ॥

भाव एकस्तस्य शक्तिः, द्वैविध्यं मूलतो मतम् ।
समयस्य ह्युरात्रं वा-ध्यक्षं तत्तदुपाधितः ॥ ५ ॥

लोक्यते केवलज्ञात्रा, लोकोऽपि द्रव्यपर्ययैः ।
लोकवत् सिद्ध एवायं, तन्नैकान्तेन तद्विदा ॥ ६ ॥

चैतन्ये गुणभावेना-ऽनन्त्यात् पुद्‌गलवस्तुनः ।
धर्माधर्मादियुक्तोपि, व्योम्ना लोको ह्यलोकवत् ॥ ७ ॥

भावनासु यथा भाव्यः, संसारस्योपलक्षणात् ।
सिद्धः स्वभावलोकस्य, तथा लोकोपि शाश्वतः ॥ ८ ॥

उर्ध्वलोकादधोलोको-ऽप्यलोकोऽस्मात्तथैव सः ।
भव्यलोकादभव्योपि, सिद्धः संसारिलोकतः ॥ ९ ॥

चैतन्यशक्त्याविष्टः स-द्भावो जीव इति स्मृतः ।
तदभावादजीवोऽन्यः, ख्यातेयं कल्पना भुवि ॥ १० ॥

जीवोप्यजीवोऽजीवज्ञः, इति प्रवचने वचः ।
अजीवो जीवसंज्ञेय-स्तात्स्थ्यात्तद्व्यपदेशतः ॥ ११ ॥

सूरबिम्बेपि सूरत्वं, लोके लोकोत्तरे स्फुटम् ।
अजीवे स्थापनाजीवः, निक्षेपस्तेन संगतः ॥ १२ ॥

शिवो जीवोऽभवत्प्राणै-र्जीवोजीवोपि पुद्गलः ।
दशप्राणैरभावेन, स्थावरे जीवता क्वचित् ॥ १३ ॥

जीवो ज्ञानसदंशस्य, प्राधान्यात्सत्त्वनामभृत् ।
अजीवः सत्त्वयोगेपि, तन्निषेधादचेतनः ॥ १४ ॥

उपादानं चेतनायाः, जीवोऽजीवो निमित्तकम् ।
तेनाऽशुद्धाशनात्साधु-श्चौर्यचर्यापरोऽभवत् ॥ १५ ॥

रूपं स्यान्नीलपीतादि, तद्योगे रूपवानणुः ।
अणुसंबन्धतो जीवो-प्ययं रूपि कथञ्चन ॥ १६ ॥

रूपी सिद्धोपि तद्ज्ञानात्, खं रूपि स्यात्तदाश्रयात् ।
अलोकेपि वियद्रूपि, लोकखात् सर्वथाऽभिदः ॥ १७ ॥

यथाक्षिदेशे भावेक्षी, चक्षुष्मान् जीव उच्यते ।
लोकाकाशे जीवसत्त्वात्, तथाऽलोकः सचेतनः ॥ १८ ॥

यथाक्रमेण सिद्धं स्या-द्वान्यं वा साधकं जने ।
तथात्मनः सिद्धतापि, क्रमात् साधकताभृतः ॥ १९ ॥

शिवेऽपरपरिणामा-पेक्षया सिद्धताऽक्षया ।
स्वपर्यायाऽगुरूलघु-वृत्त्या साधकता पुनः ॥ २० ॥

एवं भावाभावरूपं, द्वैविध्यं तद्विकल्पजम् ।
मुक्ताभावैक्यमालोक्यं, पारमैश्वर्यसिद्धये ॥ २१ ॥

## ॥ सप्तदशोऽध्यायः ॥ १७ ॥

### श्री गौतम उवाच

ऐक्यं प्रपश्यतस्तत्त्वात्, स्वामिस्तनुभृतो न तु ।
विधेयमविधेयं वा किञ्चिन्नैव प्रभासते ॥ १ ॥
एवं सति न देवः स्यात्, सेव्यःकश्चिन्न वा गुरुः ।
न धर्मः शर्मणे कार्य-स्त्याज्योऽधर्मश्च कश्चन ॥ २ ॥

### श्री भगवानुवाच

साध्यार्थी यतते सर्वः, साधने निर्विबाधने ।
साध्ये ब्रह्मणि तत्कार्यः कामनाशोऽस्य बाधनः ॥ ३ ॥

मायापि ब्रह्मरूपैव, तद्विवर्त्तमयी स्वयम् ।
सत्त्वात्तथार्थकारित्वात् प्रपञ्चोऽस्याः विजृम्भते ॥ ४ ॥

भास्वन्मणिप्रदीपादेः, प्रभानैकान्ततोऽपरा ।
न धर्मिणः परा सत्ता, धर्माणां सर्वथा क्वचित् ॥ ५ ॥

प्रपञ्चजननान्माया-पीच्छामात्मनि वर्द्धयेत् ।
तस्या निवृत्तये भाव्या, व्युत्पादविगमावपि ॥ ६ ॥

एकं मौलनयात्तत्त्वं, स्यात्सत् गौणनया द्विधा ।
एकस्मिन् भूरुहे नाना, मूलं पुष्पं फलं दलं ॥ ७ ॥

एकं यत्तदनेकं स्या-त्सदसत्भिन्नमन्यथा ।
अनित्यं नित्यमाख्येय-मनाख्येयं जगद् द्विधा ॥ ८ ॥

लोकोलोकस्तथा जीवो, ऽजीवःपरोऽपरःपुनः ।
रूप्यरूपी जडो दक्षः, प्रत्यक्षो वा परोक्षकः ॥ ९ ॥

स्त्रीपुंसौ द्रव्यपर्यायौ, शब्दोऽर्थोप्यशुभं शुभम् ।
रात्रिर्दिनं क्रियाज्ञान-मेवंभावोभयी गतिः ॥ १० ॥

सक्रियश्चाऽक्रियो भावः, सक्रियोपि च पुद्गलः ।
अक्रियोऽनन्तनिस्संख्य-प्रदेशात्मा द्विधा मतः ॥ ११ ॥

अनन्तोपि वियत्काल-भेदात्संख्यातिगस्तथा ।
धर्माधर्मभिदा द्वेधा, वियल्लोकादलोकता ॥ १२ ॥

निश्चयव्यवहाराभ्यां, द्वेधाऽनेहा अपि स्मृतः ।
लोको जीवादजीवाच्चा ऽलोको-ऽसंख्योपनन्तकः ॥ १३ ॥

षोढा हानिविवृद्धिभ्यामलोकस्थं वियद् द्विधा ।
धर्मोधर्मश्च पूर्णोऽन्यः, सूक्ष्मोऽनणुश्च पुद्गलः ॥ १४ ॥

जीवोऽपि सिद्धः संसारी, सिद्धो ज्ञानी च दर्शनी ।
षोढा हीनोऽथवा वृद्धः, सान्तरो वाप्यनन्तरः ॥ १५ ॥

त्रसःस्थिरो वा संसारी-त्यादिर्वस्तु द्विरूपताम् ।
भाव्या पृथक्त्ववीचारा-दिच्छानाशाय सात्त्विकैः ॥ १६ ॥

कषायकलुषश्चात्मा, यावन्न विषयांस्त्यजेत् ।
तावन्नेच्छाविनाशः स्यात्, प्रकाशोपि च वास्तवः ॥ १७ ॥

भावनैस्तदनित्याद्यै-र्भावस्यापचयं चयम् ।
पश्यतः करकण्डुव-न्नश्येदिच्छा विरागिणः ॥ १८ ॥

कामस्थानानि कामिन्य-स्तास्त्याज्यास्तज्जिगीषया ।
सर्वास्त्यक्तुमशक्तो यः, स स्वीयामेव कामयेत् ॥ १९ ॥

मद्यं मांसं नवनीतं, मधु नानारसात्मकम् ।
अभक्ष्यं वर्जयेत्सर्वं, कामं संतर्जयेत् सुधीः ॥ २० ॥

बाह्यानाध्यात्मिकान् हेतूं-स्त्यजन्नेवमधार्मिकान् ।
केवलब्रह्मणः स्वादं, लभते सुकृती कृती ॥ २१ ॥

## ॥ अष्टादशोऽध्यायः ॥ १८ ॥

ऐक्येऽपि तात्त्विकेनैक्यं, भाव्यते ब्रह्मशुद्धये ।
अभ्यस्यते क्रिया किं न, लोकैस्तस्याः फलैषिभिः ॥ १ ॥

यथा षण्यमणेःशाणो-ल्लेखघर्षादिसंस्कृतिः ।
स्वरूपलब्ध्यै तस्यैव, ब्रह्मशुद्धौ तथा क्रिया ॥ २ ॥

न केवला क्रिया मुक्त्यै, न पुनर्ब्रह्म केवलम् ।
जीवन्मुक्तोपि शैलेश्या, केवली स्याच्छिवङ्गमी ॥ ३ ॥

जगुर्ज्ञानक्रियायोगे, क्षणान्मोक्षं विचक्षणाः ।
योगाज्ज्योतिर्विदो वैद्या, ऋषयः सिद्धिमूचिरे ॥ ४ ॥

असत्या क्रिययाप्यङ्गी, नेयो दर्शनभूमिकाम् ।
सद्दर्शनात् क्रिया शुद्धा, ध्यानादिः केवलाप्तये ॥ ५ ॥

वार्ये ध्याने आर्तरौद्रे, धार्ये धर्मोज्वले खलु ।
एतदर्थं जिनैः प्रोक्ताः, पञ्चधा नियमा यमाः ॥ ६ ॥

द्रव्यक्षेत्रकालभावा-ऽपेक्षया बहुधा स्थितिः ।
आचाराणां दृश्यतेऽसौ, न वादस्तत्र सादरः ॥ ७ ॥

रागद्वेषक्षये यस्मा-द्भवेत्कैवल्यमुज्ज्वलम् ।
सैष प्रमाणमाचार-स्तारकत्वाद्भवाम्बुधौ ॥ ८ ॥

ज्ञानदर्शनचारित्र-साधनाय विधीयते ।
आरम्भः स ह्यनारम्भ, आश्रवेऽपि परिश्रवात् ॥ ९ ॥

यः पुनर्दम्भसंरम्भ-संभवः संवरोप्ययम् ।
तपः स्तेनव्रतः स्तेना-दीनामिव महाश्रवः ॥ १० ॥

यस्य संस्कारसंस्कारः, कलङ्कविकलं बलम् ।
च्छलाच्चलचलं नान्तः-करणं स शिवःस्वयम् ॥ ११ ॥
शिवे स्थिरश्रियः सोम-प्रकृतेर्जगतीश्वरे ।

महाव्रतानि सार्वज्ञं, तस्मिन्न श्रद्दधीत कः ॥ १२ ॥

सद्भावेष्वपि चैतन्ये, प्राधान्यं वस्तुभासनात् ।
सत्त्वं जीवस्ततोऽजीव-स्तदभावःप्रतीतिभाक् ॥ १३ ॥

सत्त्वं गोधूमराज्ञादौ, यथावश्यं प्रशस्यते ।
सत्त्वं गुणेष्वपि तथा, प्रशस्तं विक्रमार्कवत् ॥ १४ ॥

पाषाणघोलनन्याया-द्भवभ्रममुखाःक्रियाः ।
कुर्वन्लाघवमेत्यङ्गी, सम्यक्त्वधनमश्नुते ॥ १५ ॥

मिथ्यात्वाविरतित्यागात्, कषायविजयात् क्रमात् ।
सयोगी योगरोधेन, जीवः शिवपदोचितः ॥ १६ ॥

भोगासक्ते ह्यधःपातो, ऽभ्युदयस्तूर्ध्वरेतसः ।
पुद्गलानामधोगत्या, जीवस्योच्चैरयं तथा ॥ १७ ॥

भरताद्या महारम्भाआपुः केवलमुज्ज्वलम् ।
माहात्म्यं तदपि स्पष्टं, वैराग्यस्य विमृश्यताम् ॥ १८ ॥

भावशून्यापि जीवानां, सुखाय धार्मिकी क्रियाः ।
तद् ग्रैवेयकसम्भूति-रभव्येप्यर्हतां मता ॥ १९ ॥

मनोवाक्कायसंयोगा-च्चरणाचरणे ततः ।
साक्षान्मोक्षमुपैत्यङ्गी, किं चित्रं तत्र मन्यते ॥ २० ॥

फलं विरतिरेवासौ, ज्ञानस्य मुनिनोदिता ।
अवकेशि विना तां तत्, मत्वा तत्त्वादृतो भवेत् ॥ २१ ॥

## ॥ एकोनविंशोऽध्यायः ॥ १९ ॥

श्री गौतम उवाच

ऐश्वर्यशाली परम-स्त्वं तुभ्यं सततं नमः ।
भगवन् वद मे येन, भवेत्तत्त्वप्रकाशनम् ॥ १ ॥

श्री भगवानुवाच

चिदानन्दमयं ज्योति-स्तत्त्वं स्पष्टं तपोबलात् ।
जगत्प्रकाशकं मिथ्या, मोहध्वान्तविनाशकम् ॥ २ ॥

यथाग्नितापात् पूपादौ, सिद्धिः कर्णेऽर्कतो यतः ।
तथाङ्गिनस्तपोयोगात् सिद्धिः शुद्धिः स्वरूपभाक् ॥ ३ ॥

कायशुद्धिर्बाह्यतपो-योगाद्विनयसाधनात् ।
वाक्शुद्धिर्मनसः शुद्धिः, स्वाध्यायादेव केवलात् ॥ ४ ॥

त्रेधा शुद्ध्यात्मनःशुद्धि-रात्मतत्त्वं तदुत्तमम् ।
आत्मतत्त्वावबोधाय, शेषतत्त्वप्ररूपणा ॥ ५ ॥

प्रसिद्धिर्नवतत्त्वानां, बहुधा जैनशासने ।
अन्यथा तत्त्वदशकं, प्रतिपक्षपरीक्षया ॥ ६ ॥

तेन तृतीयतुर्याङ्गे, वेदनायाः पृथक् ग्रहः ।
बन्धे मोक्षः प्रतिपक्षो, वेदनायां हि निर्जराः ॥ ७ ॥

प्रदेशैर्वेदनावश्यं, विभाषात्वनुभागतः ।
तत्त्वानि नव वा सप्त, तेन ख्यातानि लाघवात् ॥ ८ ॥

एकमेवात्मनस्तत्त्वं, ज्ञेयं सिद्धान्तचिन्तनैः ।
निवार्य भवकार्याणि, मदनोन्मादनिग्रहात् ॥ ९ ॥

शास्त्राद्विदिततत्त्वस्य, विरक्तस्यापि कामिनः ।
ध्यानेनात्मा भवेत्साक्षा-दित्याहुर्योगपाक्षिकाः ॥ १० ॥

श्रोतव्यश्चापि मन्तव्यः, साक्षात्कार्यश्च भावनैः ।
जीवो मायाविनिर्मुक्तः, स एष परमेश्वरः ॥ ११ ॥

श्रोतव्योऽध्ययनैरेष, मन्तव्यो भावनादिना ।
निदिध्यासनमस्यैव, साक्षात्काराय जायते ॥ १२ ॥

साक्षाच्चक्रुः पूर्वमतं, ये ध्यानात् परमर्षयः ।
तेऽपि ध्येयाः सदामीषां, शुद्धाचरणचिन्तया ॥ १३ ॥

यो ध्यायति यथाभावं, तादात्म्यं लभते हि सः ।
संसर्गयोगाद् ध्यानेन, भ्रमरी स्यादिहेलिका ॥ १४ ॥

पिण्डस्थं च पदस्थं च, रूपस्थं रूपवर्जितम् ।
चतुर्धा ध्यानमाम्नातं, तादात्म्यप्रतिपत्तये ॥ १५ ॥

ये दिव्यरूपा मुनयः, सिद्धास्तन्नामजापतः ।
पदस्थं खलु रूपस्थं, स्यात्तेषां स्थापनादिषु ॥ १६ ॥

स्वस्मिन्नेव च ताद्रूप्ये, पिण्डस्थं भाविते सति ।
आत्मन्येव यदात्माथाः, स्थितिस्तद्रूपवर्जितम् ॥ १७ ॥

सिद्धा नैकेन तन्मूर्ति-र्नीतेषु ध्यानगोचराः ।
ज्ञानदानात्पूर्वदशा-ध्येयैषां गौरवे ततः ॥ १८ ॥

ज्ञानेप्याद्योऽर्हदादिर्य-स्तद् ध्यानार्चा नमस्क्रियाः ।
तादात्म्या प्राप्तये ध्यातः, पूजकादेरपि क्रमात् ॥ १९ ॥

अर्हद्गुर्वोः स्मृतिःसेवा, तत्त्वश्रद्धा च पूजना ।
तदैकाग्र्ये तदीयाज्ञा, विप्रस्येव महाश्रियै ॥ २० ॥

व्यक्तशक्तिर्भक्तिरूपा-चारः संसारपारदः ।
धर्मस्य विनयो मूलं, प्रथमं सिद्धिसाधनम् ॥ २१ ॥

## ॥ विंशत्यऽध्यायः ॥ २० ॥

### श्री गौतम उवाच

ऐन्द्रैश्चान्द्रैः प्रपूज्यो यः, स कीदृक् परमेश्वरः ।
यद्भक्तिः क्रियमाणासौ, सत्त्वानां शिवसम्पदे ॥ १ ॥

### श्री भगवानुवाच

भवेस्ति मुख्यं मानुष्य-मृषभाद्या यदात्मकाः ।
देवाधिदेवा देवानां, सेव्या लब्धमहोदयाः ॥ २ ॥

श्रीनारायणरामाद्याः, संजाताः पुरूषोतमाः ।
धर्मार्थकाममोक्षाख्यं, पुरूषार्थचतुष्टयम् ॥ ३ ॥

नरान्नारायणोत्पत्तिः, शाब्दिकैरपि गीयते ।
पौरुषं फलमित्येवं, नृजन्मोत्तममीरितम् ॥ ४ ॥

तत्रापि पुरूषो ज्येष्ठः, श्रेष्ठःसर्वगुणाश्रयः ।
यज्जन्मनि भवेद्धर्षो, भिक्षूणां भूभूजां समः ॥ ५ ॥

*पुरूषेष्वपि यो धर्म-रसिकः स्यात्कषायजित् ।*
स एव देवदेवोऽर्च्यः, स्तोतव्यः काव्यकोटिभिः ॥ ६ ॥

जीवाजीवमयो लोकः, कर्तायं परमेश्वरः ।
स्वरूपस्य स्वयं धर्ता, सिद्धः शुद्धः सनातनः ॥ ७ ॥

दुग्धे सारं यथा सर्पिः, पुष्पे परिमलस्तथा ।
तथा लोकेऽपि चैतन्यं तस्मिन् कैवल्यमुत्तमम् ॥ ८ ॥

सर्वसङ्गविनिर्मुक्तः, सिद्धः केवलबोधनात् ।
स एव परमेष्ठीति, गेयोर्हंस्तात्त्विकैर्जनैः ॥ ९ ॥

तेनैव मातृकापाठे-ऽप्यों नमः सिद्धमुच्यते ।
मायाङ्गजो न वा कृष्णो, न रुद्रो वा नमस्कृतः ॥ १० ॥

सिद्धे नानाभिधानानि, यथा गुरूपदेशनम् ।
ओमित्याख्या तत्र मुख्याः, सर्वशास्त्रप्रतिष्ठिताः ॥ ११ ॥

रक्षत्यवति सर्वान् यः, स ओमिति च शाब्दिकाः ।
अखण्डमव्ययं चैतत्, सिद्धस्यैवाभिधायकम् ॥ १२ ॥

अर्हत्यर्चामिन्द्रकृता-मर्हन् वाच्योऽस्त्यकारतः ।
डप्रत्ययान्नामसिद्धेः, शुद्धः केवलरूपभाक् ॥ १३ ॥

उ इत्युच्चैर्गतौ मोक्षे, दीर्घोकारस्तु रक्षणे ।
अस्य योगादुना सिद्धे-सन्ध्यक्षरे तृतीयके ॥ १४ ॥

अर्धचन्द्राकृतिः सिद्ध-शिलाबिन्दुस्तदुर्ध्वगः ।
सिद्धेऽनाकारतो ख्यायी, जगन्मूर्द्धनि संस्थिते ॥ १५ ॥

ॐकाररूपात्साकारो, नाकारो बिन्दुरूपतः ।
सिद्धोऽनाकार साकारो-पयोगादुभयात्मकः ॥ १६ ॥

अतत्यात्माप्यकारेण, वाच्यः केवलशालिनाम् ।
उः पञ्चमीगतिर्मोक्षः, पञ्चमस्वरसंज्ञया ॥ १७ ॥

तयोर्योगे मितिमहा-नन्दः स पुरुषोद्भवः ।
परमेश्वरसंज्ञासौ, ताद्रूप्यं तत्स्मृतेर्भवत् ॥ १८ ॥

अइत्यर्हन् ऋकारःश्री, ऋषभो रेफवेदतः ।
अमित्यर्हन् महावीर-स्तत्सन्धावों प्रतीयते ॥ १९ ॥

नमस्त्रिधोर्चिते सोऽर्हन्, विधिर्वा विष्णुरीश्वरः ।
स क इत्यादि शङ्कायां, सिद्धमित्याह निर्णयात् ॥ २० ॥

ज्योतिःशास्त्रे सिद्धशब्दा-च्चतुर्विंशतिसंख्यया ।
तावन्ती नतिराख्यायि, स्वयं मातृकयाऽन्वयात् ॥ २१ ॥

## ॥ एकविंशत्यऽध्यायः ॥ २१ ॥

### श्री गौतम उवाच

ऐश्वर्यं परमं यस्य, शिवः सिद्धिप्रसाधनम्।
सोऽर्हन् ब्रह्मार्यमा विष्णुः, शम्भुर्बुद्धोऽथवापरः ॥ १ ॥

### श्री भगवानुवाच

लोकालोकमयो ब्रह्म-रूपसत्त्वनिधिर्विधिः।
सर्वभूतमयीभूत-स्तद् ज्ञाता परमेश्वरः ॥ २ ॥

स्वरूपस्य स्वयं कर्त्ता, जगद्भाव्यस्य शाश्वतः।
एकोऽनेकविवर्तात्मा, सर्वगः स्ववशः परम् ॥ ३ ॥

लोकालोकमये ज्ञेये, ज्ञातुः प्राधान्यमिष्यते।
प्रत्यक्षस्तनुवाक्चित्तः, कर्तायं नापरो यतः ॥ ४ ॥

तन्वाद्यैरिह कर्मात्तै-र्भावैर्यः सर्वपुद्गलान्।
स्वीकृत्यानन्तशः सर्वां, चकार जगतः स्थितिम् ॥ ५ ॥

क्रियां विना न कर्म स्या-न्न कर्तारं विना क्रिया।
भोक्ता क्रियाफलस्यैष, चेतनोऽस्ति सनातनः ॥ ६ ॥

अनन्तशक्तिरार्हन्त्य-भाजनं जनपूजितः।
विष्णुरात्मा जगत्कर्ता, स्थूलः सूक्ष्मः परोऽपरः ॥ ७ ॥

यो यद्विषयकं ज्ञानं, बिभर्ति परमार्थतः।
ज्ञानाद् ज्ञेयाऽविभेदेन, कर्तात्मा वस्तुनः सतः ॥ ८ ॥

यथा घटस्य दीपःस्या-त्प्रकाशेनांशुजन्मना।
स्पष्टपर्यायकर्ताऽयं, तदात्मा ज्ञेयकारकः ॥ ९ ॥

चिदानन्दमयं ज्योति-र्यदास्य प्रकटीभवेत्।
तदात्मा परमात्मायं, शिवः सिद्धोऽभिधीयते ॥ १० ॥

यथा यथाऽस्य मोहान्ध्यं, व्यपैति स्वगुणोदयात्।
उदेति पारमैश्वर्यं, तथैन्द्रज्योतिरद्भुतम् ॥ ११ ॥

संपूर्णं पारमैश्वर्यं, सिद्धेस्ति परमेष्ठिनि।
यद् ज्ञान-ध्यान जापाद्यैः, सिद्धयोऽष्टौ महर्द्धयः ॥ १२ ॥

प्रकटे केवले ज्ञाने, योगातिशयशालिनि।
प्रसिद्धं पारमैश्वर्यं, स्पष्टमर्हति चार्हति ॥ १३ ॥

यदुक्तयोगमार्गेण, यद्ध्यानादपि यद्भवेत्।
तत्तत्कर्तृकमेवेष्टं, वैद्यैर्मान्त्रैः यथा सुखम् ॥ १४ ॥

जिनोक्तयोगेनानेक-लब्धिर्विष्णुमुनेरिव।
ऐन्द्रर्द्धि भुक्तिमुक्तिश्चाऽ-वश्यं वश्यं जगत्त्रयम् ॥ १५ ॥

रागो द्वेषश्च संसार-कारणं सद्भिरिष्यते।
तयोर्विवर्जितो ज्ञाता, मुक्तः स परमेश्वरः ॥ १६ ॥

न जन्तुपीडा न व्रीडा, न क्रीडा मैथुनादिकाः।
हास्यं न लास्यं नालास्यं, स एव परमेश्वरः ॥ १७ ॥

शक्रचक्रयर्द्धश्चक्र्यादि-र्यश्चान्यः पुरुषोत्तमः।
सोऽपि भाविनयापेक्षं, प्रत्यक्षः परमेश्वरः ॥ १८ ॥

यावद्भ्रमति संसारे, रागद्वेषवशंवदः।
आत्मा न पारमैश्वर्यं, तावत्प्राप्नोति निश्चयात् ॥ १९ ॥

यस्यातिशयसाम्राज्यं, जगदाश्चर्यकारणम्।
शुद्धयोगेन योगी यः, स देवः परमेश्वरः ॥ २० ॥

नानाजनानामित्युक्त्या, निर्णीय परमेश्वरम्।
तस्यैव भक्तिराधेया, प्रेयान् यदि महोदयः ॥ २१ ॥

## ॥ द्वाविंशत्यऽध्यायः ॥ २२ ॥

### श्री गौतम उवाच

ऐन्दवी निर्मला कान्तिः, शान्तिभृत् परमेश्वरे ।
सिद्धे पूर्णतया भाति, चिदानन्दाभिनन्दिनी ॥ १ ॥

ऐक्ये प्रतिष्ठिते तस्मिन्, एको हि परमेश्वरः ।
आत्मनः परमैश्वर्ये-ऽनैक्यं तद् घटते कथम् ॥ २ ॥

### श्री भगवानुवाच

लोकालोकात्मकं वस्तु, सद्रूपमेकमेव तत् ।
तच्छक्तिश्चेतना मुख्या, ताद्रूप्यात्तदनेकता ॥ ३ ॥

भावैक्यं द्रव्यदृष्ट्यैव, पर्यायात्तदनेकता ।
द्रव्यक्षेत्रकालभावै- र्बहुधा पर्ययोदयः ॥ ४ ॥

अर्हत्सु च यदार्हन्त्यं, या च सिद्धेऽस्ति सिद्धता ।
तथा स्वाभावादानैक्यं, तदैक्यं शाश्वतं स्वतः ॥ ५ ॥

यथा सिद्धे जिने नैक्यं, शक्यं श्रीपरमेश्वरे ।
यदेकं तदनेकं स्या-दिति व्याप्तिविनिश्चयात् ॥ ६ ॥

आत्मत्वजातिमानात्मा, सोऽवस्थाभेदतो द्विधा ।
क्षेत्रज्ञाः परमात्मा च, न भिन्नं द्रव्यमीश्वरः ॥ ७ ॥

न्यायशास्त्रमिति प्राह, लोके प्रामाणिकं हि तत् ।
जीवः शिवः शिवो जीव-इति स्मार्तानुशासनात् ॥ ८ ॥

चतुर्विंशतिसंख्यादि-जिने सिद्धे प्रतीयते ।
सा विवक्षितकालेन, वस्तुतस्तदनन्तता ॥ ९ ॥

एकोप्यकारस्तत्त्वेन, चतुर्विंशतिभेदभाक् ।
तथा स्वरूपादेकस्मिन्, जिने सिद्धेप्यनेकता ॥ १० ॥

अवतारा: ह्यसंख्येया, एकस्यापि हरेर्यथा।
ब्रह्मविष्णुमहेशाद्या, एवमर्हन्ननेकधा ॥ ११ ॥

एकवर्षे यथा पक्षा-श्चतुर्विंशतिसंख्यया।
राशिचक्रेऽथवा होरा, तत्त्वानि मन्त्रशासने ॥ १२ ॥

एकस्मिन्नपि षट्पर्वी, न्यासे मुक्तावशेषिता।
यावन्ति च प्रयोगानि, तथा तावन्ति रक्षणे ॥ १३ ॥

प्रकृत्यवस्थानामाद्यै-श्चतुर्विंशतिधा जिनः।
एकोऽपि श्रूयते ताव-द्दण्डको भ्रमणच्छिदे ॥ १४ ॥

चतुर्विंशतिनाडीभ्यो, न स्यादूनं दिनं निशा।
चतुर्विंशत्यक्षरात्मा, गायन्त्री सूत्रिता परे ॥ १५ ॥

मातृका सौभाग्यवती, खटिकालेखनात्सिता।
चतुर्विंशतिमेवाख्य-ज्जिनानां स्वररूपतः ॥ १६ ॥

स्वयं राजन्त इत्युक्ता, स्वराः स्वयम्भुवो जिनाः।
स्वयं सम्बुद्धभावेन, वर्णाम्नायेपि सूत्रिताः ॥ १७ ॥

स्वर्णवर्णात् षोडशानां, षोडशादौ स्वरा जिनाः।
वर्गीयपञ्चमाः शेषं, यवलाश्च जिनाष्टकम् ॥ १८ ॥

आनुनासिक्यधर्मेण, स्वररूपममीष्वपि।
वर्णभेदेऽर्हतामेषां, तथोक्तिव्यञ्जनाश्रयाः ॥ १९ ॥

प्रायोभिप्रायतस्त्वेव-मेकस्याप्यर्हतः स्मृतम्।
चतुर्विंशतिसंख्यानं, यथा द्वादशता रवेः ॥ २० ॥

स्वस्वशासनपद्धत्या, वर्ण्यतां नैकधा प्रभुः।
तादात्म्यानन्यरूपत्वा-देकः श्रीपरमेश्वरः ॥ २१ ॥

## ॥ त्रयोविंशत्यऽध्यायः ॥ २३ ॥

### श्री गौतम उवाच

ऐक्यं यदात्मने स्वामि-न्नथैवं परमेशितुः ।
ध्यानं दानं तपः स्थानं, किमर्थं क्रियते तदा ॥ १ ॥

आत्मायं मुक्त एवास्ति, निश्चयात्केवलात्मकः ।
स्वरूपावस्थितः शुद्धः, सिद्धः शिवे भवेप्यहो ॥ २ ॥

### श्री भगवानुवाच

व्यक्ताऽव्यक्ततया द्वेधा, परापरतयाऽथवा ।
व्रीहितन्दुलगत्यैको-प्याम्नातः परमः प्रभुः ॥ ३ ॥

भवेत्पुनर्भवायैव, मनुष्यस्तन्दुलो यथा ।
उत्पत्यै फलपत्रादे-र्निस्तुषस्त्वपुनर्भवः ॥ ४ ॥

एवं यावदयं कर्म, विदधत्कर्मरेणुना ।
लिप्यते क्षिप्यते ताव-द्भवजालेऽङ्गभृद्धशम् ॥ ५ ॥

निश्चयात्केवलोप्यात्मा, मलवान् व्यवहारतः ।
समलं निर्मलं वाम्भ-शातकुम्भमिव द्विधा ॥ ६ ॥

कर्मबद्धो भवेज्जीवः, कर्ममुक्तो भवेच्छिवः ।
इति स्मार्तगिरा बोध्यं, द्वैविध्यं परमात्मनि ॥ ७ ॥

ध्येयः पूज्योऽथवा सेव्यः, सोऽप्यात्मा परमेश्वरः ।
धाताप्यैवं तथाप्युच्चैः, काचमण्योरिवान्तरम् ॥ ८ ॥

मायान्वितः परब्रह्म, केवलब्रह्म सेवया ।
नैर्मल्यमश्नुते योग-स्तेन सर्वत्र सम्मतः ॥ ९ ॥

धातुना धातुशुद्धिः स्या-ज्जलशुद्धिर्जलोत्तमात् ।
वायुना वायुशुद्धत्व-मात्मशुद्धिस्तथात्मना ॥ १० ॥

पूर्वयोगीश्वरध्याना-न्नैर्मल्यं परयोगिनि ।
योऽयं ध्यायति यद्रूपं, तद्रूपं लभते स वै ॥ ११ ॥

संसर्गयोगात्तादूप्ये, शुकद्वयनिदर्शनम् ।
हस्ती सेचनको यद्वा, युक्तिर्निम्बाम्रयोरपि ॥ १२ ॥

एवं श्रीभगवानर्हन्, सिद्धः सर्वगतः शिवः ।
तेनोक्तः समयो वेदः, पौरुषेयः प्रगीयते ॥ १३ ॥

तस्यैव भजनाल्लोकः, स्वयं तद्गुणभाजनम् ।
पुष्पवासनया तैलं, नैव किं तन्मयीभवेत् ॥ १४ ॥

जपनामापि तस्येह, तन्मुक्तौ स्थापयन् मनः ।
तन्मयी स्याद् ध्यानबलात्, पानीयममृतं न किं ॥ १५ ॥

यदाकारं हृदि ध्याये-न्नरस्तद्रूपमाप्नुयात् ।
सविषो निर्विषः किं नो, धवलध्यानधारया ॥ १६ ॥

देवस्य स्मरणान्मन्त्रा- धिष्ठाताऽङ्गेस्य तन्मये ।
दृश्योऽवतरणात् साक्षा-द्वाक् प्रतीतिः किमन्यथा ॥ १७ ॥

पिण्डस्थाच्च पदस्थं तद् ध्यानं श्रेष्ठमतः पुनः ।
रूपस्थं पुरुषाकारं, रूपातीतं ततोऽपि च ॥ १८ ॥

लोकाकृतेर्भावनया, संवरे लोकबन्धनम् ।
संस्थानविचयं धर्म-ध्यानमस्मादिहागमे ॥ १९ ॥

नामाकृतिद्रव्यभावै-रेवं श्रीपरमेश्वरम् ।
रागद्वेषपरित्यक्तं, शिवं शान्त्यात्मकं भजेत् ॥ २० ॥

सोऽपि क्रमेण तादात्म्यं, माहात्म्यादस्य संस्पृशेत् ।
भक्तिरेव महाभक्तिः, व्यक्ता भगवती विभो ॥ २१ ॥

## ॥ चतुर्विंशत्यऽध्यायः ॥ २४ ॥

### श्री गौतम उवाच

ऐश्वर्यवान् शिवः सिद्धो-ऽर्हन्नथ परमेश्वरः ।
तदा किं पारमैश्वर्यं, लोकालोकव्यवस्थितम् ॥ १ ॥

### श्री भगवानुवाच

आधेयनामधारेऽपि, सूरबिम्बेऽपि सूरवत् ।
धनवन्नगरं नाम, सबलस्तन्निवासतः ॥ २ ॥

उज्वलःकम्बलस्तिक्ता, शुण्ठी सुरभि चन्दनम् ।
गृहीतेऽग्निमयेङ्गारे, वाच्यःकिं नाग्निसंग्रहः ॥ ३ ॥

*चित्रिते गृहदेशेपि, गृहं चित्रितमुच्यते ।*
चन्द्रैकदेशे दृष्टेपि, दृष्टश्चन्द्रो नवोदितः ॥ ४ ॥

समुद्रो भूः समुद्रस्य, ग्रामभूः ग्राम इत्यपि ।
यद्वा कणोऽपि लवणं, राशिर्लवणमेव हि ॥ ५ ॥

इत्यसौ केवलब्रह्मा-धारात् सद्भिः प्रगीयते ।
लोकालोकोऽपि तद्रूप-स्तद्योगे तत्त्वनिश्चयात् ॥ ६ ॥

अस्मादेव नयादर्हत्, कथितः ज्ञानवान् गुरुः ।
अर्हन् वा भगवान् भट्टा-रकश्च व्यपदिश्यते ॥ ७ ॥

परम्परागमस्तेन, प्रमाणं साम्प्रतं मतः ।
संयतर्षेर्गुरुर्गोत्र-पृच्छा स्पष्टास्तदागमे ॥ ८ ॥

स्वयं गृहीतलिङ्गत्वं, निन्द्यतेऽङ्गेपि पञ्चमे ।
धर्मस्य विनयो मूलं, तन्मूलं गुरुरेव सः ॥ ९ ॥

अभ्यस्तोऽपि महामन्त्रः, स्फूरेन्नैव गुरुं विना ।
विनये श्रेणिको भिल्ल-स्तापसो वा निदर्शनम् ॥ १० ॥

कलाः प्रकाशयन् पूर्वं, नमेत् किं न कलागुरुम् ।
शास्त्रैः प्रदेशीत्यादेशि, केशिनानवकेशिना ॥ ११ ॥

त्रिः प्रदक्षिणयन्त्येव,-किं न केवलिनो जिनम् ।
तीर्थं नमति देवोऽपि, देशनासमये स्वयम् ॥ १२ ॥

यश्चाचार्यमुपाध्यायं, श्रुताचारविनायकम् ।
निन्देत् स पापश्रमणो, जमालिकूलवालवत् ॥ १३ ॥

गुरोर्दृष्टिः शुभं भावं, समुन्नयति निश्चयात् ।
तेनैव गणधर्मोऽयं, भवेदापञ्चमारकम् ॥ १४ ॥

गुरुर्नेत्रं गुरुर्दीपः, सूर्याचन्द्रमसौ गुरुः ।
गुरुर्देवो गुरुः पन्था, दिग्गुरुः सद्गतिर्गुरुः ॥ १५ ॥

नैकाशनस्य भङ्गः स्या-दुत्थानं कुर्वता नराः ।
गुरोर्विनयसिद्ध्यर्थं, सिद्ध्यर्थी तद् गुरुं भजेत् ॥ १६ ॥

सूर्याचन्द्रमसोरूच्चं, पदं शास्त्रे गुरोः स्मृतम् ।
गुरोः पूर्णानुभावेन, सिद्धियोगो हि निश्चितः ॥ १७ ॥

ऊनं कुर्याद्गुरुः पुर्णं, गुरोर्गौरवमश्नुते ।
गुरोः स्थानेपि माङ्गल्ये, मङ्गलस्य सुहृद्गुरुः ॥ १८ ॥

गुरोरेकाग्र्यमातन्वन्, गणेषु प्रथमः श्रिये ।
गुरोरतिक्रमे दुःखं, वक्रतायां च जन्मिनाम् ॥ १९ ॥

गुरुः पोतो दुस्तरेऽब्धौ, तारकः स्याद् गुणान्वितः ।
साक्षात् पारगतः श्वेत-पटरीर्ति समुन्नयन् ॥ २० ॥

स्यादक्षरपदप्राप्ति-र्द्वैधापि गुरुयोगतः ।
गुरुरूपेण भूभागे, प्रत्यक्षःपरमेश्वरः ॥ २१ ॥

## ॥ पञ्चविंशत्यऽध्यायः ॥ २५ ॥

### श्री गौतम उवाच

ऐन्द्रस्वरूपं कैवल्ये, संस्कारात्कर्मण्यात्मताम् ।
कैवल्यसिद्धये तस्मात्, किं कर्म प्रथमं मतम् ॥ १ ॥

### श्री भगवानुवाच

रुचिं नवनवैर्वाक्यैः, शास्त्रैर्वा जनयेद् गुरुः ।
ततो भव्यस्य शुश्रूषा, श्रवणाद्या धियो गुणाः ॥ २ ॥

शास्त्रादिव्यवहाराय, संज्ञापूर्वं यथोच्यते ।
तथा नाम पुरः श्राव्यं, देवस्य गुरुधर्मयोः ॥ ३ ॥

ज्ञानिभिः पूर्वजैर्नाम्नो, निक्षेपः प्रथमः कृतः ।
नाम्ना नैर्मल्यमापन्नः, स्थापनाद्यपि मन्यते ॥ ४ ॥

नाम्नि वा स्थापनायां य-स्तादात्म्यं हृदि चिन्तयेत् ।
दृष्टे बिम्बे श्रुते नाम्नि, तुष्टः श्रद्धालुरुत्तमः ॥ ५ ॥

तन्नाम चरितश्रुत्या, तदेकाग्रेण तन्मनाः ।
तद् ध्यानभावनाज्जन्तु - र्नूनं तद्रूप्यमश्नुते ॥ ६ ॥

नामजापोऽपि संक्षेपा-द्विस्तराद्वाऽस्त्यनेकधा ।
तस्मात्समासतो ध्येयः, ॐकारः सिद्धवाचकः ॥ ७ ॥

अ इत्यर्हन् अशरीरः, पुनः सिद्धोप्यतिस्थितः ।
आ आचार्य उपाध्यायः, उः मकारो मुनिः स्मृतः ॥ ८ ॥

स्मार्या इत्येवमोङ्कारे, पञ्चापि परमेष्ठिनः ।
नमनाज्जापतोऽप्येषां, शिवादीनामिव श्रियः ॥ ९ ॥

अ इत्यर्हन् उ गुरुः स्या-न्मुनेर्द्धर्मो मकारगः ।
तस्य संवररूपेण, सुवृत्तात्मा हि बिन्दुता ॥ १० ॥

अर्हन्नपरिहन्तासा-ऽवऽरूहश्चेति नामसु ।
क्रमात् अ इ उ इत्येते, प्राकृते भेदकाः स्वराः ॥ ११ ॥

अइउणिति तत्सूत्रं; कृतं पाणिनिनादिमम् ।
एतद्योगेन सिद्धत्व-मोङ्कारेण निरुप्यते ॥ १२ ॥

अ इत्यस्मादधोलोकः, ऊ इत्युद्धर्वस्थसूचकः ।
मे मर्त्यलोकस्तिर्यग्भूः, सुवृत्तस्तत ओमिति ॥ १३ ॥

आकारात् उपवर्गस्य, स्थानीयो ज्याससंगृही ।
अपवर्गस्तदोङ्कारे, बिन्दुः सिद्धोऽपि तत् स्थितः ॥ १४ ॥

अ इत्यात्मा तद्वितर्के, उर्मे मोक्षः शिवस्ततः ।
अनाकारबिन्दुरूपः, ॐकारस्तन्मयो मतः ॥ १५ ॥

अतिभक्ति विष्णुरूपात्, उपलब्धिरुकारगा ।
मे महाव्रतमोङ्कार-स्त्रियोगे ब्रह्मकेवलम् ॥ १६ ॥

अतिविष्णुरुतिब्रह्मा, मे शिवस्तत्त्रयीमयः ।
ॐकारः परमं ब्रह्म, ध्येयो गेयस्तदर्थिभिः ॥ १७ ॥

अकार अततीत्यात्मा, सपञ्चमोपयोगतः ।
उतोमिति महानन्दे, शिवो बिन्द्वाकृतिर्भवेत् ॥ १८ ॥

अर्हपदे व्यञ्जनेन, वर्जितेप्यों तदव्ययम् ।
सिद्धाभिधायकं ध्यायन्, शिव एव निरञ्जनः ॥ १९ ॥

अः सूर्यःस उना युक्तः, प्रकाशेन मकारके ।
महावीरे शिवावस्था-मोङ्कारे बिन्दुना नमेत् ॥ २० ॥

अत्युकारे मकारे च, त्रिपदी या व्यवस्थिता ।
तन्मयस्त्रिजगद्व्यापी, ॐकारः परमेश्वरः ॥ २१ ॥

# ॥ षड्विंशत्यऽध्यायः ॥ २६ ॥

### श्री गौतम उवाच

ॐकारस्त्रिजगद्व्यापी, नाथ ! निश्चीयते कथम्
जगद्व्याप्तिं विना ब्रह्माभिधत्ते परमं कुतः ॥ १ ॥

### श्री भगवानुवाच

ज्ञेयं यदभिधेयं तत्, न ज्ञानमभिधां विना ।
विनाक्षरं नाभिधापि, नोंकारेण विनाक्षरम् ॥ २ ॥

प्रत्ययार्थाभिधानेन, तत्तुल्यं नामधेयता ।
वाच्यवाचकयोरैक्यं, स्यात्तद्बोधसमुद्भवात् ॥ ३ ॥

अकारादेव सर्वेषा-मक्षराणां समुद्भवः ।
स्थानयत्नादिभेदेन, स्याद्विशेषः प्रकाशते ॥ ४ ॥

वृद्धौ अकारे ह्याकारः, स्पष्टे मात्रापरिग्रहात् ।
पृष्ठे इकार स्तद्दैर्घ्ये-पीकारोऽधोप्युकारकः ॥ ५ ॥

तद्दैर्घ्ये वृद्ध ऊकारो-ऽधःपरान्मुखमात्रया ।
ऋवर्णस्तद्विशेषेण, ॠवर्णः सन्धिजा परे ॥ ६ ॥

न क्षरत्यक्षरं राति, स्वमर्थं वा ततःस्वरः ।
केवलोऽकारमेवाय-माकाराद्यास्तु तद्भिदः ॥ ७ ॥

स्वारं स्वरसमुहस्तत्, पश्चाल्लग्नो मकारजः ।
नकारजो वाऽनुस्वारो, बिन्दुर्नादविशेषवान् ॥ ८ ॥

बिन्दुद्वये विसर्गःस्या-न्नैतौ पश्चात्स्वरं विना ।
स्वरानुरणनरूपौ तौ, घण्टादीर्घनिनादवत् ॥ ९ ॥

ह्रस्वादीर्घे श्वासवृद्ध्या, मात्राधिक्यं ततःप्लुते ।
गीतादावेव तत्कार्यं, वर्णाम्नाये न तद्ग्रहः ॥ १० ॥

वायोर्यथा स्थानघातं, वर्णोत्पादे प्रयत्नतः ।
श्वासात् प्रकृतिसंयोगे, व्यक्तं व्यञ्जनमुच्यते ॥ ११ ॥

तत्राप्याद्यद्वितीयानां, वर्ग्याणां शषसेऽपि च ।
अघोषत्वंच घोषत्वं, वर्णे तेभ्यः परे स्फुटम् ॥ १२ ॥

सदीर्घैर्व्यञ्जनैः षष्ठ्या, घटी तत्कालवृद्धितः ।
श्वासातियोगात्कण्ठ्योपि, हः स्यादौरस्य एव सः ॥ १३ ॥

समानपञ्चके स्थानः, प्रसङ्गात् पञ्चवर्ग्यपि ।
अन्तस्थाश्च तथोष्माणः, स्वरवर्गानुगामिनः ॥ १४ ॥

अकारो वर्णमुख्योयं, केवलात्मा स तीर्थकृत् ।
नाभिभूर्मरूदेवास्य, योनिलोके प्रसिद्धिभाक् ॥ १५ ॥

अकारप्रभवाः सर्वे-प्येवं वर्णाः प्रकीर्तिताः ।
मातृकायां तदुच्चारे, तेनाकारपरिग्रहः ॥ १६ ॥

केऽपि सार्वमुखस्थान-मवर्णमूचिरे ततः ।
मात्रायोगेप्युवर्णान्त-स्तस्य शेषस्तु सन्धिजः ॥ १७ ॥

ऋवर्णस्तु ॠवर्णान्तः, स च वृद्धो गुणेऽग्रिमे ।
प्रायोऽप्रयोगाद्दीर्घं च, नापठीत् द्वादशाक्षरी ॥ १८ ॥

अकारे सर्ववर्णौघं, मत्वा मात्रानुवर्णिकम् ।
अनुस्वारे विसर्गं च, ॐकारं सर्वगं जपेत् ॥ १९ ॥

अकारः परमात्मासौ, विश्वंभरोऽप्यधः क्षिमेत् ।
उ वर्णवत्सर्वमात्रां, तदा बिन्दुरिवोद्धर्वगः ॥ २० ॥

न्यासतोप्यव्ययं वक्ति, ॐकारः शक्तिमान् स्वयम् ।
शब्दादपि क्षणाल्लोकं, व्याप्नोति ब्रह्मतेजसा ॥ २१ ॥

## ॥ सप्तविंशतितमोऽध्यायः ॥ २७ ॥

### श्री गौतम उवाच

ऐश्वरं नामजपनं, निश्चित्यैकाग्रमानसः ।
शिवस्वरूपमादित्सुः, किं कुर्यात्कर्म धार्मिकम् ॥ १ ॥

### श्री भगवानुवाच

तस्यैव दर्शनं कुर्या-द्दर्शनावरणच्छिदे ।
गुरोर्देवस्य चावश्यं, यस्य श्रद्धां धरेन्नरः ॥ २ ॥

यः स्वयं शिवमापन्नः, प्रेक्षणेऽपि शिवङ्करः ।
यः पूज्यते सदा तेजो, भासुरैःश्रीसुरासुरैः ॥ ३ ॥

जिनः सनातनो जिष्णु-रच्युतः पुरुषोत्तमः ।
स्वभूर्विश्वम्भर इति-नाम्ना यो न जनार्दनः ॥ ४ ॥

स्वयम्भू परमेष्ठी च, नाभेयः सात्त्विकोत्तमः ।
वृषाङ्कः शङ्करः शम्भु-र्यः सर्वज्ञो महाव्रती ॥ ५ ॥

इत्याद्यन्वर्थनामार्ह-नुपदेष्टा शिवस्य यः ।
तस्मान्नान्यः शिवः कश्चित्, मूर्तो तेनाऽस्य सान्तता ॥ ६ ॥

न गौरीशो न कालीशः, खण्डपर्शुधरो न वा ।
न रुद्रो भैरवो नोग्रो, न भीमो वा नटेश्वरः ॥ ७ ॥

गौरी सती गले यस्य, लग्ना काली ततोऽभवत् ।
आर्यापि चण्डी तद्भक्ते, युक्तं स्याद्भवसेवकः ॥ ८ ॥

स्पष्टा न भोगैर्या गङ्गा, ब्रह्मचारी यदङ्गजः ।
शिवेन शिरसोदूढा-प्यपतल्लवणाम्बुधौ ॥ ९ ॥

ध्यायन् श्मशानवेश्मानं, तं भक्तेः शिवमीक्षते ।
वह्निर्जलायते तस्य, विषमप्यमृतायते ॥ १० ॥

स रामः शस्त्रभृद्वान्यो, हयग्रीवो नृकेसरी ।
शिवाय न विदा सेव्या, ज्ञेयास्ते पुरुषोत्तमाः ॥ ११ ॥

यः कैवल्यात्र मायास्पृक्, समदृक्योगनिश्चितः ।
शुद्धः सिद्धः प्रबुद्धश्च, शान्तःश्रीभगवानयम् ॥ १२ ॥

मत्स्यः कूर्मो वराहश्च-हयग्रीवो नृकेसरी ।
चन्द्रादयो ग्रहाः पूज्याः, पादपद्मेऽस्य लक्षणैः ॥ १३ ॥

भगवद्भक्तिभाजोऽमी, स्थाप्या भागवतासने ।
प्रभोः पूजनया पूजा-मीषामेष्या मनीषीभिः ॥ १४ ॥

एवं जिनः शिवो नान्यो, नाम्नि तुल्येऽत्र मात्रया ।
स्थानादि योगाज्जशयो, र्न वयोश्चैक्यभावनात् ॥ १५ ॥

गुरावपि शिवध्यान-मर्हन्मार्गप्रतिष्ठिते ।
मुखवस्त्रिकया मौन-मुद्रा स्पष्टयति प्रभोः ॥ १६ ॥

न शिरोवेष्टनं तेषां, द्विजानामिवासद्विधौ ।
मातृकायां धकारेपि, शिरोबन्धः किमिष्यते ॥ १७ ॥

श्वेताम्बरधरः सौम्यः, शुद्धः कश्चिन्निरम्बरः ।
कारुण्यपुण्यः सम्बुद्धः, शान्तः क्षान्तः शिवो मुनिः ॥ १८ ॥

श्वेताम्बरधरा गौराः, पुरतः पुस्तकान्विताः ।
व्याख्यानमुद्रया युक्ताः, ध्यायन्तो वा हरिं जिनम् ॥ १९ ॥

सेवते दैवतामिव, गुरुं परम्परागतम् ।
तत्पार्श्वे नियमात् शास्त्रं, शृणुते वृणुते धृतिम् ॥ २० ॥

गुरूपदेशसंज्ञायै, कर्णवेधो विधीयते ।
उपदेशात्मकर्णत्वं, नरे नाकृतिमात्रतः ॥ २१ ॥

## ॥ अष्टविंशतितमोऽध्यायः ॥ २८ ॥

### श्री गौतम उवाच

ऐश्वराङ्गे गुरौ देवे, धर्मशास्त्रे क्रियासु च ।
वैषेऽनुयोगे वाचारे, भेदः सर्वत्र वीक्ष्यते ॥ १ ॥

पृच्छ्यते यस्य मध्यस्थैः, धर्मं स स्वं वदेत् शुभम् ।
तदन्यं मन्यते दुष्टं, संशयालुर्जनस्ततः ॥ २ ॥

### श्री भगवानुवाच

या गतिः सा मतिरिति-न्यायात्तत्त्वेप्यतत्त्वधीः ।
द्रव्यक्षेत्रकालभावा-न्नान्वेति प्रायशो मतिः ॥ ३ ॥

तस्या नैर्मल्यसम्पत्यै, दयाशीलतपःश्रुतैः ।
परीक्षणीयो धर्मोऽपि, कषैः स्वर्णमिवोत्तमैः ॥ ४ ॥

रागद्वेषमोहदोषाः, साम्यभावनया हृदि ।
क्षिप्ता देवाः प्रतीतास्ते, व्यतीता भवविभ्रमात् ॥ ५ ॥

तदुक्तमार्गे ये लीना, मीना इव महोदधौ ।
गुरवो गुरवो ज्ञान-श्रद्धाचारतपोगुणैः ॥ ६ ॥

वेषः सधर्माचारेऽपि, क्रिया शास्त्रार्थपद्धतिः ।
सैव प्रमाणं वैराग्यं, ज्ञानं श्रद्धा यतोऽधिका ॥ ७ ॥

वल्गयाश्वोऽङ्कुशेनेभो, नस्त्यानड्वान् वशीभवेत् ।
वधूर्नाथिकया शास्त्रो-पदेशेन तथा पुमान् ॥ ८ ॥

शास्त्रं शास्त्रान्तरदृढं, गुरुपरम्परागमः ।
पारम्पर्यं विना नेष्टं-तत्र भिल्ल्या निदर्शनम् ॥ ९ ॥

व्याख्यापि वृत्तिभाष्यादि-सूक्त्या युक्त्या समर्थया ।
शुद्धागमाविरोधेन, भुक्तिमुक्तिप्रदा नृणाम् ॥ १० ॥

रुचिं विनापि सद्वाक्यं, हिताय रौहिणेयवत् ।
धर्मोपदेशे शुद्धत्वं, केवलज्ञानशालिनाम् ॥ ११ ॥

तदभावेऽवधिमन-पर्ययश्रुतधीभृताम् ।
केवलात् श्रुतधीः श्रेष्ठा, यतः प्रकृतिकारणात् ॥ १२ ॥

श्रुतज्ञानेऽक्षरं मुख्यं, संज्ञाव्यञ्जनलब्धिभिः ।
तत्त्रिधा तत्र संज्ञासौ, भगवत्यां नमस्कृता ॥ १३ ॥

तत्त्वज्ञानं देवतत्त्वाद् गुरुतत्त्वादशङ्कितात् ।
सूत्रार्थालोकनाद्धर्मोऽ-क्षरभावादिचिन्तनात् ॥ १४ ॥

तदक्षरं पदं ब्राह्मी, पूर्वमभ्यस्यते लिपिः ।
मूलं कलानां सर्वासां, नेत्रं क्षेत्रं गुणश्रिया ॥ १५ ॥

कुलदेवीव जीवानां, जीवनं विश्वपावनम् ।
ज्ञानोपकारान्मोक्षस्य, साधनं धनवर्धनम् ॥ १६ ॥

देवी सरस्वती नाम्ना-धिष्ठात्री श्रुतदेवता ।
तस्या ब्रह्मेन्द्र एवान्य-मते गणपतिःसुरः ॥ १७ ॥

देवा लोकान्तिकास्तस्या, वश्याः सारस्वतादयः ।
स्वरव्यञ्जनरक्षायै, यक्षास्तच्छक्तयः परा ॥ १८ ॥

जगतः पालनाद्विश्व-व्यासासौ शक्तिरूपिणी ।
मातृका गीयते श्वेता-म्बरनिष्ठाऽर्थसाधनी ॥ १९ ॥

भगवद्वदनाम्भोजे, राजहंसीव दीव्यति ।
शुद्धवर्णा पदे रक्ता-ऽध्यक्षा मौक्तिकदर्शनी ॥ २० ॥

भारती भरतक्षेत्रो-त्पत्तेर्गोरसवर्द्धनात् ।
सरस्वती महर्षीणां, राजते राजतेजसा ॥ २१ ॥

## ॥ एकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥

### श्री गौतम उवाच

ऐन्द्री शक्तिरिवाचिन्त्य-प्रभावा मातृका ह्यसौ ।
यस्यां विश्वप्रकाशात्मा, परमेष्ठी प्रतिष्ठितः ॥ १ ॥

पूर्वलेखाद्वयं किञ्चि-दव्यक्तमक्षरं ततः ।
बिन्दुलेखे मातृकायां, कथं कथय नाथ ! मे ॥ २ ॥

### श्री भगवानुवाच

अव्यक्तपुर्वं व्यक्तं स्याद् ग्रन्थसन्दर्भवत् खलु ।
व्याप्तेरितीदं तत्सूक्ष्मं, सात्मकं भूतपञ्चकम् ॥ ३ ॥

आदौ वायुरधोलोके, जगतः स्थितिकारणम् ।
तस्योद्‌र्ध्वं प्रायशो वृत्तिः, श्वासस्येवात्र नाभितः ॥ ४ ॥

एका रेखा ततो वायो-र्द्वितीया पयसः परा ।
वायुनोन्नीयमानत्वाद्, घनस्याब्धेरिवोद्‌गतिः ॥ ५ ॥

तेनैव धारा लोकेऽपि, दृश्या मेघस्य तादृशी ।
जलोपरिष्टात् पृथिवी, चतुरस्रा तदाकृतिः ॥ ६ ॥

तस्यामधोग्रन्थिरूपा-न्नागलोकः स्फुटः स्मृतः ।
उच्चैरेफाकृतिः स्वर्ग-व्यापिकाग्निमुखाश्रयात् ॥ ७ ॥

शून्याकारं नभस्तस्मात्स्वर्गाकाशप्रतिष्ठया ।
ततोग्निभूतरेखैका, साक्षात्तस्योद्‌र्ध्ववृत्तितः ॥ ८ ॥

द्वितीयाकारवाच्यं स्या-त्मनोरेखोद्‌र्ध्वगामिनः ।
मातृकायां ततो भूत-पञ्चकं सात्मकं स्मृतम् ॥ ९ ॥

प्रोक्तो विवाहप्रज्ञप्ता-वेवं लोकस्थितस्ततः ।
तदुद्‌र्ध्वं सिद्धसंस्थाना-दों नमः समुदीर्यते ॥ १० ॥

अकारस्यात्मनो लेखै-का परा परमार्हतः ।
ततः सरेफे हे हंसे, सिद्धेऽसौ पुरुषाकृतिः ॥ ११ ॥

बिन्दुशुषिरतद्गोला-कारस्थानमकारजः ।
अलोकस्यानन्तभावं, वक्त्यकारयुगं परम् ॥ १२ ॥

एवमर्हं पदध्यानं, व्यक्ताव्यक्ततयोदितम् ।
तद्ध्यानादव्ययः सिद्धः, स्यादोंकारस्वरूपभाक् ॥ १३ ॥

अस्त्यन्यतीर्थिकश्रद्धा, गणेशस्याकृतिर्ह्यसौ ।
तेनाप्रोच्चैः करोल्लासः, पुरो बिन्दुश्च मोदकः ॥ १४ ॥

परेप्याख्यान्ति शेषोऽयं, नागराजः कृतोत्फणः ।
नीचैः कुण्डलितः शब्दा-नुशासनादिकारकः ॥ १५ ॥

बिन्दुरूपो मणिस्तस्य, पुरतः सद्भिरिष्यते ।
लेखाश्चतस्रस्तादेव्या, वाचोऽवस्थानिरूपिकाः ॥ १६ ॥

आहुरन्येक्षराणां स्यात्, षष्टेरङ्कोयमीदृशः ।
मातृकायां नियमिताः, षष्टिर्वर्णा न तत्परे ॥ १७ ॥

व्यञ्जनानि त्रयस्त्रिंशत्, स्वराश्चैव चतुर्दश ।
अनुस्वारविसर्गौ च, जिह्वामूलीय एव च ॥ १८ ॥

गजकुम्भाकृतिर्वर्णः, प्लुताश्च परिकीर्तिताः ।
एवं वर्णा द्विपञ्चाशत्, षष्टिर्वा मातृकाक्रमे ॥ १९ ॥

षष्ट्यक्षराणां च पलं, तैर्दण्डो द्युनिशं च तैः ।
तत्षष्ट्या च ऋतुस्तेषां, द्विषष्ट्या वर्षविंशिका ॥ २० ॥

तासां त्रये वत्सराणा-मेकषष्टिः प्रकीर्तिताः ।
मासषष्ट्या युगं यद्वा, तैर्द्वादशभिरप्यसौ ॥ २१ ॥

## ॥ त्रिंशत्तमोऽध्यायः ॥ ३० ॥

### श्री गौतम उवाच

ऐन्द्रं रूपं यथा मुख्यं, सर्वदेवेषु गीयते ।
ॐकारस्तद्वद्वर्णेषु, तत्राकारः पुरस्सरः ॥ १ ॥

अव्ययत्वादकारस्या-ऽनेकेऽर्थाः सद्भिराहिताः ।
तेनाकारेण किं ध्येयो-र्हन् वा कृष्णो विधिर्भवः ॥ २ ॥

### श्री भगवानुवाच

कारागृहं च संसारो, जीवयोनिः भवभ्रमः ।
तदभावादकारोऽर्हन्, कैवल्यादक्षरादिमः ॥ ३ ॥

नराः प्राणभृतां मुख्याः, प्रागुक्तास्तेषु शुद्धवाक् ।
वाक्शुद्धिर्मातृकाभ्यासा-दकारस्तन्मुखे ततः ॥ ४ ॥

भवेत् सिद्धिः नृलोकस्य, लोकविष्णोःसनाभिगः ।
नाभिजत्वादकारोऽर्हन्, ततः संवृतयत्नवान् ॥ ५ ॥

तथाऽष्टादशधाकारो-विवाराच्छाब्दिके नये ।
षोढा संवृत्तयत्नेन, चतुर्विंशतिधा ततः ॥ ६ ॥

उच्चारणेऽपि शब्देन, यदाकारो निराकृतिः ।
लेखने साकृतिः द्वेधा, मुक्तो वा मोचकोप्ययम् ॥ ७ ॥

आकारस्तत एवास्य, स्वरूपाद्दीर्घतां दधौ ।
अर्हत्पार्श्वस्थितेर्वेत्ता, तेनाकारं निषेवते ॥ ८ ॥

ऐकोप्यकारस्तादात्म्या, च्चतुर्विंशतिधा भवेत् ।
आकारादिभिदा तद्व-दर्हन्नेकोऽपि वस्तुतः ॥ ९ ॥

वर्णव्यवस्था सफला-प्याद्यात्राभिभुवोऽर्हतः ।
तथाकारादसौ स्पष्टा, साक्षाद्विश्वम्भरोप्ययम् ॥ १० ॥

तेनाकारस्य मुख्यत्वं, यवनाध्ययनेप्यहो ।
ऋजुः प्रकृतिर्धवलः, स कृष्णो नैव युज्यते ॥ ११ ॥

आकारकेवलात्मास्य, रूपं स्त्रीलिङ्गसङ्गजम् ।
शाब्दिका अपि न प्राहुः, कृष्णमायाऽस्य तत्कुतः ॥ १२ ॥

ज्ञानात्मना जगद्व्याप्ति-र्विष्णौ वार्हति चार्हति ।
न सा मायामयेह्यन्य-माने देवेस्ति तत्त्वतः ॥ १३ ॥

अ इत्यर्हन् आदिदेवो-महावीरो मतिस्मृतः ।
अं नमः कथनादर्हच्चतुर्विंशतिमानमेत् ॥ १४ ॥

मश्च शम्भुरनेकार्थे-ऽपवर्गान्तप्रतिष्ठितः ।
महाब्रह्मपदे मूर्ध-न्यारोहे स्वरसंगतः ॥ १५ ॥

सिद्धस्यार्थो बिन्दुरूप-मनाकारात्तदीयभूः ।
स्थानं सिद्धार्थभूस्तेन, महावीरो जिनः स्मृतः ॥ १६ ॥

सिद्धार्थाद्वा भवत्येष, भासमाने स्वरात्मनि ।
मकारेण महावीरो, वाच्यः सिद्धार्थभूरिति ॥ १७ ॥

शिवरूपमनुस्वारे-ऽनाकाराद्यस्तदात्मनः ।
भूः स्थानं नेमिनाथोऽर्हन्, ख्यातस्तेन शिवात्मभूः ॥ १८ ॥

नमः प्रसिद्धं यद्बिन्दु-रूपं तथा विसर्जनम् ।
द्वेधा प्रकृत्यास्तदपि, अकारादि स्वराश्रितम् ॥ १९ ॥

सोऽहं हंस सदा जापो-ऽनाहतो योगिनां मतः ।
तत्राप्यकारवाच्योऽर्हन्, नियमाद् योगसाधने ॥ २० ॥

अकार पृथिवीतत्त्व-मीषत् प्राग्भारिका स्थितः ।
स्वरशास्त्रे स्वेष्टः सिद्ध्यै-तद्वाच्योऽर्हन् न तत्परः ॥ २१ ॥

## ॥ एकत्रिशंत्तमोऽध्याय: ॥ ३१ ॥

### श्री गौतम उवाच

ऐन्द्राद्या शक्तयोऽनन्ता, यथार्हन्नाम्न्यकारके ।
देवेप्यनन्तवीर्यं स्या-दैक्याद्वाचकवाच्ययो: ॥ १ ॥

तत्केषाञ्चन भावानां, स्वभावं मेऽर्हति स्थितम् ।
विभावय स्यां येनाहं, भावभात् पावनाशय: ॥ २ ॥

### श्री भगवानुवाच

अर्हन् अर्कसिद्धरुपोऽर्थ एष, सोऽर्च्यस्त्वब्जैरर्घ्यमूर्तिर्मुखेह्न: ।
तत्संज्ञायामष्टवर्गा ह्यकारे, तेनैवार्हन्नीश्वरोप्यष्टमूर्ति: ॥ ३ ॥

श्री आदिदेवो ह्यरुणोऽर्यमा वा, ह्यहर्पतिर्निर्मलवृत्तकान्त्या ।
अर्हन् सदार्कस्तदकारनाम्ना, प्रकाशक: शाश्वत एष विश्वे ॥ ४ ॥

अर्का भुवि द्वादश लोकसिद्धा-होराश्रयात्ते द्विगुणा भवन्ति ।
अर्हं चतुर्विंशतिधा तथैवा-ऽकारेपि तद्वाचक एष बोध्य: ॥ ५ ॥

स्युर्द्वादशाकारभिदोऽत्र दीर्घ-ह्रस्वप्रपाठात् किल मातृकायाम् ।
प्लुतस्य शास्त्रे बहूशोऽप्रयोगा-त्सव्यञ्जनोन्यश्च तथास्त्यकार: ॥ ६ ॥

अजाऽच्युताद्या अपि ये पदार्था:, स्युस्तेप्यकारेऽर्हति चाक्षरत्वात् ।
अनुत्तरत्वादपि बोधदृग्भि-रर्हन् अकारे ह्यजरामरत्वात् ॥ ७ ॥

अर्हन् अकारो भगवन्भवान्या, स्वमौलिमालाललितैरपूजि ।
तेनाङ्घ्रिपीठेऽर्हत एव बिम्ब-देवी विधेया बुधसूत्रधारै: ॥ ८ ॥

अकारवाच्यस्तत एव न स्यात्, कृष्णो हरो वाप्यपरोऽत्र देव: ।
कृष्णस्य लक्ष्म्या: किल सव्यभागे-र्धाङ्गे निवेशेन भवस्य गौर्या: ९ ॥

तितिक्षयाऽर्हन्नवनी च साक्षात्, शुद्धोऽम्बुराशेर्जलवंत् स्वचित्ते ।
तथाऽनिलोप्यऽप्रतिबद्धचारे-ऽनलप्रभावस्तपसोग्रधाम्ना ॥ १० ॥

गत्यांऽशुमानप्रतिहन्यमान-स्तीक्ष्णांशुमालीव सुदीप्रतेजाः ।
सौम्यः प्रकृत्या अमृतांशुरूपः, सदा निरालम्बतयाम्बराभः ॥ ११ ॥

अस्यार्हतः श्रीऋषभात् ऋकारे, योगाद्भवेद नंनु हस्तहर्षी ।
श्रीमान्महावीरविभुर्वहंस्तं, शीर्षेशिवोर्हं पदवाच्य एषः ॥ १२ ॥

ऋकारतः श्रीऋषभाख्ययार्हन्, आकारतस्त्वाद्य इतो मकारः ।
श्रीमान् महावीर इति प्रसिद्धा-रामे चतुर्विंशतिरार्हतीयम् ॥ १३ ॥

भूमिर्यदीषत् प्राग्भारा, नाम्ना सीतार्ज्जुनद्युतिः ।
तस्याः श्रीमान् पतिश्चार्हन्, सीता पतिरुदीर्यते ॥ १४ ॥

रकारे चरणे लीने, कण्ठजत्वादकारवत् ।
हकारात् हर्षवान् अङ्गी, ई ईषद्भुवमाश्रितः ॥ १५ ॥

तत्र प्रणवमध्यस्था-कारस्यैवोपयोगतः ।
हकार सिद्धये योग्यः, सर्वमन्त्रप्रतिष्ठितः ॥ १६ ॥

रहौ निवार्य ध्येयं तत्, अ ईत्यर्थोऽथवा पदे ।
रहोरुभयतः स्थित्या-र्हन् वा सिद्धमकारतः ॥ १७ ॥

रहाभ्यां यत्परे द्वित्वं, तदपि स्वरयोगजम् ।
व्योमाग्नितत्त्वयोः सिद्धि-रित्याहुः स्वरवेदिनः ॥ १८ ॥

के केवलं दधति ये स्युरकारभाजो ऽर्हद्ध्यानतः सकलखेचरवन्दनीयाः ।
खे भुञ्जते खविजयादुदिते स्वरखाद्यम्, प्राप्तुं विवेकसुदृशः खऽमखाद्यमोक्षात्

वर्णेषु सर्वेषु यदस्त्यकारः, श्रीमातृकायां सकलार्थयोगात् ।
तद्ज्ञानतोऽर्हन्नपि तद्वदेव, देवप्रभावात् परिभावनीयः ॥ २० ॥

ज्ञेयादनन्ताद्भगवाननन्तो, ऽर्हंस्तद्विबोधी स च वीतरागः ।
समयक्खेत्तपरिरओ दो चेव सया अउणपन्ना ॥ १० ॥

सोलस कोडीलक्खा नवकोडिसया तिकोडि लक्खेगं ।
पणवीससहस्साइं गणियपयं समयखेत्तस्स ॥ ११ ॥

पणयालीसं लक्खा सीमंतय माणुसं उडु सिवं च ।
अपइट्ठाणो सव्वट्ठ सिद्धि जंबूदीवो लक्खं ॥ १२ ॥

रयणमओ मेरुगिरी जोयणसहसं च भूमिगो होइ ।
नवनउईउव्विद्धो नाभिसमो सव्वलोयस्स ॥ १३ ॥

मेरु मूले दसिगार सभागा नउया य जोयणसहस्सा ।
दस एसो विक्खंभो परिहो पुण जोयणसहस्सा ॥ १४ ॥

इगतीसं नव सय दसहिया य तिन्नि य इगारसी भागा ।
भूविक्खंभो दससहस्स परिही इगतीस सहसाओ ॥ १५ ॥

छस्सयतेवीसहिया सहसं पुण होइ उवरि विक्खंभो ।
परिही बावट्ठसयं तिन्नेव य जोयणसहस्सा ॥ १६ ॥

तेवट्ठं कोडिसयं चउरासीयं च सयसहस्साइं ।
नंदीसरस्स एसो विक्खंभो चक्कवालेण ॥ १७ ॥

एत्थ य जंबूदीवो लक्खं दो लक्ख लावणसमुद्दो ।
एवं दुगुणा दुगुणी कायव्वा जाव पन्नरसो ॥ १८ ॥

नंदीसरवरदीवो एव पमाणाण दीवउदहीणं ।
पच्छिमपुरिमंताणं विच्चाले एस विक्खंभो ॥ १९ ॥

छक्कोडिसया पणवन्नकोडि तेत्तीसलक्खपरिमाणं ।
इय विक्खंभा परिही गणियपयं चिय गणेयव्वं ॥ २० ॥

जो दोन्नि उ कोडिसहस्सा बावत्तरि कोडिलक्ख तेत्तीसं ।
चउप्पन्न सहस्साइं नउयसयं गाउयं एगं ॥ २१ ॥

धणुहसहस्सं इगवन्नसमहियं अंगुलाइं पन्नासं ।
एगो य जवो परिही नंदीसर अंतिमा एसा ॥ २२ ॥

कोडाकोडी लक्खा तिन्नि उ तह कोडीकोडी सहसाओ ।
एगुणचत्ता पंच उ कोडाकोडी सया हुंति ॥ २३ ॥

कोडाकोडी पन्नरस एगुणनवईउ कोडि लक्खाओ ।
कोडिसहस्सा पणवीसं हुंति कोडी सया तिन्नि ॥ २४ ॥

पंचाणवई कोडी छक्कट्ठी लक्ख सहस तिगसयरी ।
पणवीससयं गाउयमेगं धणुहाण पंच सया ॥ २५ ॥

छस्समहियाइ तहेवंगुलाइं एगूणवन्न गणियपयं ।
जंबूमुहदीवाणं नंदीसरअंतिमाणेवं ॥ २६ ॥

जोयणसयदीहाइं पन्नासं वित्थडाइं रम्माइं ।
बावत्तरूसियाइं तहिं चेइहराइं बावन्नं ॥ २७ ॥

मणुआण जहन्नपए एगुणतीसं हवंति ठाणाइं ।
तहियं पंचमवग्गो गुणिज्जए छट्ठवग्गेणं ॥ २८ ॥

छन्नवई वाराओ अहव गुणिज्जइ दुगो उ तो तत्थ ।
गुणतीसठाणसंखा हवंति मणुया जहन्नेणं ॥ २९ ॥

दुग अंको दुगुणिज्जइ वारा छन्नवइ तत्थ दुइयम्मि ।
रासिम्मि पढमवग्गो चउरूवो होइ नायव्वो ॥ ३० ॥

रासिम्मि चउत्थम्मि वग्गो सोलस य बीयओ होइ ।
अह रासीए तइओ वग्गो छप्पन्न तह दुसया ॥ ३१ ॥

पणसट्ठि सहस पणसय छत्तीसा सोलसम्मि रासिम्मि ।
तुरिओ वग्गो बत्तीसमम्मि रासिम्मि पणवग्गो ॥ ३२ ॥

तत्थ य अंका दाहिणहुंता चउ दु नव चउ नव छ सत्त ।
दुग नव छग इय रूवा इय अंको पंचमे वग्गे ॥ ३३ ॥

तह चउसट्ठिमरासीएँ छट्ठवग्गो उ होइ नायव्वो ।
तत्थ य अंका दाहिणहुंताओ कमेणिमे हुंति ॥ ३४ ॥

इग अट्ठ चउ चउ छग सत्त य चउ चउर सुन्न सत्तेव ।
तिग सत्त सुन्न नव पंच पंच इग छच्च इग छच्च ॥ ३५ ॥

एसो छट्ठो वग्गो गुणियइ एएणं पंचमो वग्गो ।
तत्थुप्पन्ना अंका गुणतीसं ते य रासिम्मि ॥ ३६ ॥

छन्नवइयम्मि नेया दाहिणहुत्ता कमेणिमे सुणह ।
सत्त नव दुन्नि दुन्नि य अड इग छग दुन्नि पंचेव ॥ ३७ ॥

इग चउर दुन्नि छच्च य चउ तिय सत्त पंच नव तिन्नि ।
पंच चउ तिन्नि नव पंच सुन्न तिय तिन्नि छच्चेव ॥ ३८ ॥

एयाइ जहन्नपए समयक्खेत्तम्मि माणुसाइ धुवं ।
सव्वजियाणं मज्झे जिणेहिं थोवाइं भणियाइं ॥ ३९ ॥

समयक्खेत्ता बाहिं मणुयाणं नत्थि मरणउप्पत्ती ।
नेवऽत्थि बायरग्गी नेव य समयाइकालो वि ॥ ४० ॥

नीरोगिजोव्वणत्थस्स, पसंतस्स सरीरिणो ।
नीसासुस्सासए एगे, पाणुओ एस भन्नए ॥ ४१ ॥

थोवे य सत्त पाणूहिं, लवेण सत्त थोवए ।
मुहुत्ते सत्तहत्तरीए, लवाणं जिणदेसिए ॥ ४२ ॥

मुहुत्तेऽणंतनाणीहिं, ऊसासाणं वियाहिया ।
तिसत्तरी सया सत्त, तहा य सहसत्तियं ॥ ४३ ॥

अहरत्ते ऊसासा लक्खो तेरस सहस्स नउय सयं ।
मासे लक्खा तेत्तीस सहस पणनवइ सया सत्त ॥ ४४ ॥

चत्तारि सया अडयाल सहस सत्तेव तहय लक्खा य ।
चतारि य किल कोडी ऊसासा हुंति वरिसम्मि ॥ ४५ ॥

कोडिसयाइं चउरो सत्त उ कोडीउ लक्ख अडयाला ।
सहसावि य चालीसं वाससए हुंति ऊसासा ॥ ४६ ॥

घडियाणं इगवीसं लक्खा सहसा य सट्ठि बोद्धव्वा ।
दो लक्खा पहराणं सहसट्ठासीइ वाससए ॥ ४७ ॥

वाससयआउयाणं छत्तीससहस्स होइ परिमाणं ।
अह समयावलियाई विसेसओ भन्नए कालो ॥ ४८ ॥

समयावलियमुहुत्ता दिवस अहोरत्त पक्ख मासा य ।
संवच्छरजुगपलिया सागर ओसप्पिपरियट्टा ॥ ४९ ॥

तह वाससयसहस्सं चुलसीइगुणं हवेज्ज पुव्वंगं ।
पुव्वंगं पुव्वंगेण ताडियं होइ किर पुव्वं ॥ ५० ॥

पुव्वस्स उ परिमाणं सयरिं खलु हुंति कोडिलक्खाओ ।
छप्पन्नं च सहस्सा बोद्धव्वा वासकोडीणं ॥ ५१ ॥

पुव्वं पि य चउरासीलक्खेहि गुणं हविज्ज नउयंगं ।
एवं नउयप्पभिइसु अट्ठावीससुवि ठाणेसु ॥ ५२ ॥

चउरासीलक्खेहिं गुणकारो तोंऽतिमे हवइ ठाणे ।
चालसयं सुन्नाणं अंका य हवंति छप्पन्ना ॥ ५३ ॥

पुव्वनउयप्पभिई य चउदस नामा उ अंगसंजुत्ता ।
अट्ठावीसं ठाणा चउनउयं होइ ठाणसयं ॥ ५४ ॥

पुव्वंगं पुव्वं पि य नउयंगं चेव होइ नउयं च ।
नलिणंगं पिय नलिणं महानलिणंगं महानलिणं ॥ ५५ ॥

पउमं कमलं कुमुयं तुडियं अडडं च अवव हुहुयं च ।
अन्नं च अउय पउयं तह सीसपहेलिया चेव ॥ ५६ ॥

खुड्डभवा साहिया सत्तरस हवंति एगपाणुम्मि ।
पाणू एगमुहुत्ते तिसत्तरी सत्ततीस सया ॥ ५७ ॥

पणसट्ठिसहसपणसय छत्तीसा इगमुहुत्ति खुड्डभवा ।
दो य सया छप्पन्ना आवलिया एगखुड्डभवे ॥ ५८ ॥

एगमुहुत्तजखुड्डभवरासीए इगमुहुत्तपाणूणं ।
संतेण रासिणा अवहियम्मि भागम्मि सत्तरस ॥ ५९ ॥

हुंति भवग्गहणाइं उवरिं तेरससया उ पणनउया ।
अंसाण तेवि तणया तिसयर सगतीस सयगाण ॥ ६० ॥

एगमुहुत्तगखुल्लगभवंकरासिम्मि ताडणम्मि कए ।
इगखुल्लगभवसंतियआवलियारासिणो हुंति ॥ ६१ ॥

सोलुत्तर दुन्नि सया सत्तत्तरि सहस लक्ख सगसट्ठी ।
एगा कोडी भणिया आवलियाणं मुहुत्तम्मि ॥ ६२ ॥

संखेज्जमसंखेज्जं अणंतयं तिविहमित्थ संखाणं ।
संखेज्जं पुण तिविहं जहन्नयं मज्झिमुक्कोसं ॥ ६३ ॥

तिविहमसंखेज्जं पुण परित्तजुत्ता असंखयासंखं ।
एक्केक्कं पुण तिविहं जहन्नयं मज्झिमुक्कोसं ॥ ६४ ॥

तिविहमणंतं पि तहा परित्तजुत्तंअणंतयाणंतं ।
एक्केक्कं पुण तिविहं जहन्नयं मज्झिमुक्कोसं ॥ ६५ ॥

एवं तिभेयभिन्नं संखेज्जं एत्थ होइ नायव्वं ।
अस्संखेज्जं नवहा नवभेयमणंतयं पि तहा ॥ ६६ ॥

एगत्थ मीलियम्मी इगवीसं एत्थ हुंति ठाणाइं ।
एएसिं वक्खाणं जीवसमासस्स वित्तीओ ॥ ६७ ॥

अहवा दिवढसयाउ अहवा सिरिचक्कसूरिरइयाओ ।
सिद्धंतुद्धारभिहाणपगरणाओ मुणेयव्वं ॥ ६८ ॥

दव्वे खेत्ते काले भावे चउह दुह बायरो सुहुमो ।
होइ अणंतुस्सप्पिणिपरिमाणो पोग्गलपरट्टो ॥ ६९ ॥

चउतणुमणवइपाणत्तणेण परिणमिय मुयइ सव्वअणू ।
एगजिओ भवभमिरो जत्तियकालेण सो थूलो ॥ ७० ॥

सत्तण्हऽन्नयरेण उ इयफुसणे सुहुमदव्वपरियट्टो ।
अन्ने चउतणुकमउक्कमेण तं बिंति दुविहं पि ॥ ७१ ॥

लोगपएसोसप्पिणिसमया अणुभागबंधठाणा य ।
पुट्ठा मरणेण ज्रया कमुक्कमो बायरो त्ति तया ॥ ७२ ॥

पुट्ठाणंतरमरणेण पुणो जया ते तया हवइ सुहुमो ।
पोग्गलपरियट्टो खेत्तकालभावेहिं इय नेओ ॥ ७३ ॥

पोग्गलंपरियट्टो इह अट्ठविहो जइ वि वन्निओ तह वि ।
अविसेसियस्सरूवो उ दव्वओ बायरो गेज्झो ॥ ७४ ॥

विक्कमओ पणपन्नरुद्दसंखवरिसंमि चक्कसूरीहिं ।
सावयराहडवयणा लिहिया सुहुमत्थसत्तरिया ॥ ७५ ॥

श्री वर्द्धमानक्रमकमलोपजीविश्रीचक्रेश्वरसूरिविरचितम्

# ॥ चरणकरणमूलोत्तरगुणप्रकरणम् ॥

वंदिय तिजयसरन्ने गुरुणो वरचरणकरणसंपत्ते ।
चरणकरणाइविसए किंचि वियारं पवक्खामि ॥ १ ॥

वय ५ समणधम्म१० संजम १७ वेयावच्चं च १० बंभगुत्तीओ ९ ।
नाणाइतियं ३ तव१२ कोहनिग्गहाई ४ चरणमेयं ॥ २ ॥

वयमाईणऽट्ठण्हं ठणाण जहक्कमेणिमे अंका ।
पण दस सतरस दसनव तिग बारस चँउर संखाओ ॥ ३ ॥

पाणाइवाय तह मुसावाया य अदिन्न मेहुणे चेव ।
सव्वं परिग्गहं चिय इय पंच वयाइं नेयाइं ॥ ४ ॥

खंती य मद्दवऽज्जव मुत्ती तव संजमे य बोद्धव्वो ।
सच्चं सोयं आकिंचणं च बंभं च जइधम्मो ॥ ५ ॥

पुढवि दग अगणि मारुय वणप्फइ बितिचउ पणिंदि अज्जीवे ।
पेहोप्पेह पमज्जण परिठवण मणोवईकाए ॥ ६ ॥

संजमठाणा सत्तरस पायं सुगमा तहा वि किर पेहा ।
एसा वुच्चइ सीसं जं चोयइ संजमाईसुं ॥ ७ ॥

उप्पेहा अस्संजमवावारेसुं निवारई ज़ं तु ।
सेसा संजमठाणा सुयाउ विउसेहि नायव्वा ॥ ८ ॥

दसविहवेयावच्चं सूरिउवज्झायथेरसाहूसु ।
बालगिलाणसधम्मियकुलगणसंघाण विसयंम्मि ॥ ९ ॥

वसहिकहनिसेज्जिंदियकुड्डुंतरपुव्वकीलियपणीए ।
अइमायाहार विभूसणा य नव बंभगुत्तीओ ॥ १० ॥

नाणाइतियं भणियं नाणं तह दंसणं चरित्तं च ।
रयणत्तयमेयं वन्नियं तु मोक्खस्स मग्गो 'उ ॥ ११ ॥

अणसणमूणोरिया वित्तीसंखेवणं रसच्चाओ ।
कायकिलेसो संलीणया य बज्झो तवो होइ ॥ १२ ॥

पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ ।
झाणं उस्सग्गो वि य अब्भिंतरओ तवो होइ ॥ १३ ॥

कोहोवलक्खणाओ कसायचउगस्स दुक्खमूलस्स ।
सोलसभेयविभिन्नस्स निग्गहो चरणमूलं तु ॥ १४ ॥

एवं वयमाईणं अट्ठट्ठाणाण विवरणंकेसु ।
एगत्थ मीलिएसु चरणं सत्तरिविहं होइ ॥ १५ ॥

पिंडविसोही समिई ५ भावण १२ पडिमा १२ य इंदिय निरोहो ।
पडिलेहण २५ गुत्तीओ ३ अभिग्गहा ४ चेव करणं तु ॥ १६ ॥

पिडविसोहिप्पभिईण अट्ठट्ठाणाण जहक्कमेणं तु ।
चउ पंच बार बारस पण पणवीसा तिय चउक्कं ॥ १७ ॥

उग्गमदोसुप्पायणदोसा तह एसणाएँ दोसा उ ।
मंडलिदोसा एवं पिंडविसोही भवे चउहा ॥ १८ ॥

सोलस उग्गमदोसा सोलस उप्पायणाएँ दोसा उ ।
दस एसणाएँ दोसा मंडलिदोसा उ पंचेव ॥ १९ ॥

इरिसमिइ भाससमिई एसणसमिई तहोवगरणम्मि ।
गहणट्ठावणसमिई परिट्ठावणसमिइ पंचमिया ॥ २० ॥

पढममणिच्चमसरणय संसारो एगया य अन्नत्तं ।
असुइत्तं आसव संवरो य तह निज्जरा नवमी ॥ २१ ॥

लोगसहावो बोहीएँ दुल्लहो धम्मसाहओ अरहा ।
एयाओ सइ बारस जहक्कमं भावणीयाओ ॥ २२ ॥

मासाई सत्तंता पढमा बियतइय सत्तराइदिणा ।
अहराइ एगराई भिक्खूपडिमाण बारसगं ॥ २३ ॥

फरिसण रसणं घाणं चक्खू सोत्ता य इंदिया पंच ।
तन्निग्गहो जिणेहिं भणिओ करणस्स मज्झम्मि ॥ २४ ॥

देहपडिग्गहकंबलवत्थाईयं जया उ पडिलेहे ।
तइया ठाणा पडिलेहणाएँ पणवीसई हुंति ॥ २५ ॥

जइ वि हु तणुपत्ताइसु वत्थाइसु अन्नहेव पणवीसा ।
समयपसिद्धा तह बि हु गेज्झा एक्केव पणवीसा ॥ २६ ॥

सुविसुद्धमणो व इतणुजोगा गुत्तीतिगं इमं होइ ।
दव्वे खेत्ते काले भावे य अभिग्गहा चउरो ॥ २७ ॥

पिंडस्स जा विसोही ४२ समिइओ ५ भावणा १२ तवो १२ दुविहो ।
पडिमा १२ अभिग्गहा वि ४ य उत्तरगुणमो वियाणाहि ॥ २८ ॥

पिंडविसोहिप्पभिई अट्ठट्ठाणाण अंकसंखाए ।
एगत्थ मीलियाए करणं सत्तरिविहं होइ ॥ २९ ॥

चरणं करणं दुविहं पि होइ सत्तरसभेयसंभिन्नं ।
अहवा चरणं करणं पत्तेयं सत्तरिविहं तु ॥ ३० ॥

वयसमणाई अट्ठ उ पिंडविसोहियमाइ अट्ठेव ।
नवरमिह संपयाया वयसमणाईयगाहाए ॥ ३१ ॥

वेयावच्चं च इहप्पयम्मि चसद्दयाउ सज्झाओ ।
नवमो इय संजोगो सतरसहा चरणकरणाइं ॥ ३२ ॥

चरणं करणं सत्तरसविहं तु इय वक्कसच्चकरणत्थं ।
वयगाहाएँ चसद्दा सज्झाओ आसि जो गणिओ ॥ ३३ ॥

सो इह नो गणियव्वो तत्तो वयमाइअट्ठठाणाणं ।
विवरम्मि सत्तरिविहं चरणं किर बेंति समयन्नू ॥ ३४ ॥

सव्वं पाणाइवायं सव्वं मोसं अदिन्नदाणं च ।
सव्वं पि मेहुणं परिग्गहं पि निसिभोयणं सव्वं ॥ ३५ ॥

जावज्जीवाएँ तिविहं तिविहेण तिकालियं पि जं वज्जे ।
ते हुंतिह मूलगुणा समणाण महव्वया पंच ॥ ३६ ॥

पिंडस्स जा विसोही इच्चाइ छठाणगे इमे अंका ।
बायाल पंच पणवीस बार तह बार चउरो य ॥ ३७ ॥

पिंडस्स जा विसोही सा बायाला इहुत्तरगुणेसुं ।
विन्नेया समिईओ पंच य समए पसिद्धाओ ॥ ३८ ॥

पाणाइवाइयाणं पंचण्ह महव्वयाण उवरिम्मि ।
हुंतीह भावणाओ पत्तेयं पंच ता य इमा ॥ ३९ ॥

वत्थाइठवणगहणे समिई इरिएसणाए समिई य ।
मणवयणे गुत्तिदुगं पढमवए भावणा पंच ॥ ४० ॥

कोहा वा लोहा वा भया व हासा व नो वए मोसं ।
अणुचिंतिय भासेज्जा दुइयवए भावणा पंच ॥ ४१ ॥

उग्गहजायण उग्गहनिसामणं उग्गहस्स सीमा य ।
साहम्मिउग्गहो गुरुअणुन्नाए भोयणं पंच ॥ ४२ ॥

इत्थिकह-इत्थिइंदिय-निरिक्खणाऽऽहार-गिद्धिपरिहारो ।
संथवभूसअकरणं चउत्थवए भावणा पंच ॥ ४३ ॥

इंदियविसए सद्दे रूवे गंधे रसे य फासे य ।
गेहिपओसं न करे पंचमवय भावणा पंच ॥ ४४ ॥

अणसणमाई य तवो बारसहा होइ समयसंसिद्धो ।
मासाई सत्तंता एमाई पडिमबारसगं ॥ ४५ ॥

दव्वे खेत्ते काले भावे य अभिग्गहा चउविगप्पा ।
नाणापयारभेया निद्दिट्ठा समयकेऊहिं । ॥ ४६ ॥

पिंडस्स जा विसोही इमाइ गाहाए पंजलगईए ।
विवरे कयम्मि होई सयमेगं उत्तरगुणाणं ॥ ४७ ॥

अन्नेसुं किर गंथंतरेसु छन्नवइ उत्तरगुणा उ ।
जं निसुणिज्जएँ वक्कं तहिं दव्वाईचउक्कम्मि ॥ ४८ ॥

यमसज्झाओ उस्सारियम्मि सेसाउ होइ छन्नवई ।
दव्वाइचउगमुत्तरगुणेसु भिन्नं पि गणियव्वं ॥ ४९ ॥

तह अन्नेसुं गंथंतरेसु नवनउइ उत्तरगुणाओ ।
इय वक्कं दीसइ तत्थ सुणह एयस्स भावत्थं ॥ ५० ॥

छन्नवइए मज्झे गुत्तित्तिगे पाडियम्मि नव्वनउई ।
होई इत्थ विभिन्नं दव्वाइचउक्कयं गेज्झं ॥ ५१ ॥

तो मूलिगगाहाए बीयपए वायणाविसेसोऽयं ।
भणियव्वो समिइगुत्तितिभावणाईणि तह चेव ॥ ५२ ॥

अन्ने वि य उत्तरगुणा अणागयप्पच्चखाणमाईया ।
भेयपडिभेयभिन्ना सुत्ताउ बुहेहिं नायव्वा ॥ ५३ ॥

इय उत्तरगुणविसयं विवरणमेयं समासओ लिहियं ।
किंची सुत्ताओ सुयहराण उवएसओ किंची ॥ ५४ ॥

इय चरणकरणउत्तरगुणविसयाओ इमाओ गाहाओ ।
लिहियाओ चक्केसरसूरीहिं सुहवबोहत्थं ॥ ५५ ॥

अज्ञातकृतम्

# ॥ श्रावकव्रतभङ्गप्रकरणम् ॥

पणमिअ समत्थपरमत्थवत्थुवित्थारदेसगं वीरं ।
वुच्छामि सावयाणं, वयभंगयभेअपरिसंखं ॥ १ ॥

दुविहा अट्ठविहा वा, बत्तीसविहा व सत्तपणतीसा ।
सोलसय सहस्स भवे, अट्ठसयट्ठुत्तरा वइणो ॥ २ ॥

दुविहा विरयाविरया, दुविहं तिविहाइणट्ठहा हुंति ।
वयमेगेगं छव्विह गुणिअं दुगमिलिअं बत्तीसं ॥ ३ ॥

तिन्नि तिआ तिन्नि दुया, तिन्निक्किक्का य हुंति जोगेसु ।
तिदुइक्कं तिदुइक्कं, तिदुइक्कं चेव करणाइं ॥ ४ ॥

मणवयकाइयजोगे, करणे कारावणे अणुमईए ।
इक्कगदुगतिगजोगे, सत्ता सत्तेव इगुवन्ना ॥ ५ ॥

पढमिक्को तिन्नि तिआ, दुन्नि नवा तिन्नि दो नवा चेव ।
कालतिगेण य सहिया, सीआलं होइ भंगसयं ॥ ६ ॥

पंचाणुव्वयगुणिअं, सीआलसयं तु नवरि जाणाहि ।
सत्तसया पणतीसा, सावयवयगहणकालम्मि ॥ ७ ॥

सीआलं भंगसयं, जस्स विसुद्धीइ होइ उवलद्धं ।
सो खलु पच्चक्खाणे, कुसलो सेसा अकुसला य ॥ ८ ॥

दुविहतिविहाइ छ च्चिय, तेसिं भेया कमेणिमे हुंति ।
पढमिक्को दुन्नि तिआ, दुगेगदोछक्क इगवीसं ॥ ९ ॥

एगवए छ ब्भंगा, निद्दिट्ठा सावयाण जे सुत्ते ।
ति च्चिअ पयवुड्ढीए, सत्तगुणा छज्जुआ कमसो ॥ १० ॥

इगवीसं खलु भंगा, निद्दिट्ठा सावयाण जे सुत्ते ।
ति च्चिअ बावीसगुणा, इगवीसं पक्खिवेयव्वा ॥ ११ ॥

एगवए नव भंगा, निद्दिट्ठा सावयाण जे सुत्ते ।
ति च्चिअ दसगुण काउं, नव पक्खेवम्मि कायव्वा ॥ १२ ॥

इगुवन्नं खलु भंगा, निद्दिट्ठा सावयाण जे सुत्ते ।
ति च्चिअ पंचासगुणा, इगुवन्नं पक्खिवेयव्वा ॥ १३ ॥

एगाई एगुत्तर, पत्तेअ वयम्मि उवरि पक्खेवो ।
इक्किक्कहाणि अवसाणसंखया हुंति संजोगा ॥ १४ ॥

उभयमुहं रासिदुगं, हिट्ठिल्लाणंतरेण भय पढमं ।
लद्धहरासिविभत्ते, तस्सुवरि गुणिंतु संजोगा ॥ १५ ॥

अहवा पयाणि ठविउं, अक्खे घित्तूण चारणं कुज्जा ।
इक्कगदुगाइजोगा, भंगाणं संख कायव्वा ॥ १६ ॥

बारस छावट्ठी विअ, वीसहिया दो य पंच नव चउरो ।
दो नव सत्तय चउ दुन्नि नवय दो नवय सत्तेव ॥ १७ ॥

पण नव चउरो वीसा, य दुन्नि छावट्ठि बारसिक्को य ।
सावयभंगाणमिमे, सव्वाण वि हुंति गुणकारा ॥ १८ ॥

छ च्चेव य छत्तीसा, सोलदुगं चेव छनवदुगइक्कं ।
छस्सत्तसत्तसत्तय, छप्पन्न छसट्ठि चउछट्ठे ॥ १९ ॥

छत्तीसा नवनउई, सत्तावीसा य सोल छन्नउई ।
सत्त य सोलस भंगा, अट्ठमठाणे विआणाहि ॥ २० ॥

छणउई बावत्तरि, सत्तदुसुन्निक्क हुंति नवमम्मि ।
छावत्तरि इगसट्ठी, छायाला सुन्न छ च्चेव ॥ २१ ॥

छप्पन्नसुन्नसत्तय, नवसत्तावीस तह य छत्तीसा ।
छत्तीसा तेवीसा, अडहत्तरि छहत्तरिगवीसा ॥ २२ ॥

दुविहतिविहेण पढमो, दुविहं दुविहेण बीअओ होइ ।
दुविहं एगविहेणं, एगविहं चेव तिविहेणं ॥ २३ ॥

एगविहं दुविहेणं, इक्किक्कविहेण छट्ठओ होइ ।
उत्तरगुणसत्तमओ, अट्ठमओ अविरओ होइ ॥ २४ ॥

पंचण्हमणुवयाणं,- इक्कगदुगतिगचउक्कपणगेहिं ।
पंचगदसदसपणइक्कगो अ संजोगनायव्वा ॥ २५ ॥

छ च्चेव य छत्तीसा, सोलदुगं चेव छनवदुगइक्कं ।
छगसत्तसत्तसत्तय, पंचण्हवयाण गुणनपयं ॥ २६ ॥

वयइक्कगसंजोगाण हुंति पंचण्ह तीसई भंगा ।
दुगसंजोगाण दसण्हं तिन्नि सट्ठी सया हुंति ॥ २७ ॥

तिगसंजोगदसण्हं, भंगसया इक्कवीसई सट्ठा ।
चउसंजोगप्पणगे, चउसट्ठिसयाणि असियाणि ॥ २८ ॥

सत्तत्तरीसयाइं, छसत्तराइं तु पंचगे हुंति ।
उत्तरगुणअविरयमेलिआण जाणाहि सव्वग्गं ॥ २९ ॥

सोलस चेव सहस्सा, अट्ठसया चेव हुंति अट्ठहिआ ।
एसो वयपिंडत्थो, दंसणमाई उ पडिमाओ ॥ ३० ॥

पाणिवहमुसावाए, अदत्तमेहुणपरिग्गहे चेव ।
दिसिभोगदंडसमिई, देसे तह पोसहविभागे ॥ ३१ ॥

पढमवए छ ब्भंगा, अडयालीसा य बीअवयभंगे ।
बायाला तिन्नि सया, तिमवयजोगम्मि नायव्वा ॥ ३२ ॥

चउत्थे चउवीससया, भंगाणं धीरपुरिसपन्नत्ता ।
अट्ठसया य छडुत्तरसहसा सोलसय पंचमए ॥ ३३ ॥

छट्ठे वयम्मि सावय, अडयाला छस्सया उ नायव्वा ।
तह सत्तरं सहस्सा, भंगाणं लक्खमेगं तु ॥ ३४ ॥

सत्तमए बायाला, पंचसया हुंति सहसतेवीसं ।
तह अट्ठेवय लक्खा, भंगाणं हुंति नायव्वा ॥ ३५ ॥

अट्ठमवयम्मि सावय, अट्ठसयाइं तु सहसचउसट्ठी ।
सत्तावन्नं लक्खा, भंगाणं हुंति नायव्वा ॥ ३६ ॥

नवमे छसय छउत्तर, सहस्सतेवन्न तिन्नि लक्खाओ ।
चत्तारि अ कोडीओ, भंगाणं हुंति नायव्वा ॥ ३७ ॥

दसमे दो अडयाला, सहस्सपणहत्तरीइ बोधव्वा ।
चउवीसं पुण लक्खा, अट्ठावीसं तु कोडीओ ॥ ३८ ॥

सत्तसया बायाला, सहस्सछव्वीस तिहत्तरी लक्खा ।
सत्तनवय कोडीओ, कोडिसयं दसम अंहिअम्मि ॥ ३९ ॥

तेरसकोडिसयाइं, चुलसी य जुयाइँ बारसय लक्खा ।
सत्तासीय सहस्सा, दो अ सया तह दुरग्गा य ॥ ४० ॥

इअ सावयाण छन्नवइगवीसेगूणवन्नगुणिएण ।
बारसवयाण संजोगवित्थरं नाउमुज्जमह ॥ ४१ ॥

श्री वर्द्धमानक्रमकमलोपजीविश्रीचक्रेश्वरसूरिविरचितम्

# ॥ सभापञ्चकप्रकरणम् ॥

पंच सभा पन्नत्ता उववायसभा तहाभिसेयसभा ।
तइयाऽलंकारसभा ववसायसभा चउत्थी ओ ॥ १ ॥

पंचमीया सोहम्मा देवो पढमाएँ तत्थ उववज्जे ।
आउस्संतो ! देवा बीयाएँऽभिसिच्चई ते उ ॥ २ ॥

तइयाएऽलंकरिज्जइ ववसायसभाएँ धम्मियं सत्थं ।
वायइ तत्तो उत्तरपुरच्छिमम्मी दिसाभागे ॥ ३ ॥

सोहम्माए संठिय सिद्धाययणस्स वंदणनिमित्तं ।
चल्लइ तत्तो ण्हायइ चेइयतणयाए वावीए ॥ ४ ॥

नंदापुक्खरणीए पुव्वद्दारेण पविसइ तत्तो ।
सिद्धाययणं तत्थ वि वच्चेइ जिणाण आलोए ॥ ५ ॥

आलोयम्मि पणामं करेइ पडिलेह लोमहत्थेणं ।
ताओ पमज्ज गंधोदएण न्हावेइ सुरहेणं ॥ ६ ॥

कासाईए गायाइं लूहई चंदणेण लिंपइ य ।
अहयाइं जुयलयाइं नियंसई देवदूसाणं ॥ ७ ॥

पकरइ पुप्फारुहणं मल्लारुहणं च गंधआरुहणं ।
पुन्नाणं कलसाणं वत्थाभरणाण आरुहणं ॥ ८ ॥

पकरेइ सुविउलघणपमाणमालाउलं च फुल्लहरं ।
करयलपब्भट्ठदसअद्धवन्नकुसुमुक्करं किरइ ॥ ९ ॥

जिणपडिमाणं पुरओ रययामयएहिं सण्हअच्छेहिं ।
अच्छरसतंदुलेहिं तुसारगोखीरसेएहिं ॥ १० ॥

दप्पण १ भद्दासण २ वद्धमाण ३ वरकलस ४ मच्छ ५ सिरिवच्छा ६ ।
सोत्थिय ७ नंदावत्ते ८ लिहेइ अट्ठट्ठमगंलए ॥ ११ ॥

धूवकडुच्छुयएणं धूवं दाऊण जिणवरिंदाणं ।
अट्ठसएणं सुविसुद्धगंथवित्तेहि संथुणइ ॥ १२ ॥

देवाहिदेव परमेसर ! वीयराय, सव्वण्णु तित्थयर सिद्ध महाणुभाव ।
तेलोक्कनाह मुणिपुंगव वद्धमाण, गंभीरधीर सुचिरं जय देवदेव ॥ १३

सत्तट्ठपयाइं ओसरित्तु अंचेइ वामजाणुं तु ।
दाहिणजाणुं धरणीयलंसि किच्चा सुभत्तीए ॥ १४ ॥

तिक्खुत्तो मुद्धाणं भूमिएँ निहित्तु ईसि नमइत्ता ।
अंजलिमउलियहत्थो सक्कथयं भणिय वंदेइ ॥ १५ ॥

वंदित्ता नीहरई दाहिणदारेण गब्भगेहाओ ।
दाहिणमुहमंडवमज्झभाययं तत्थ पूएइ ॥ १६ ॥

पच्छिमदारं तत्तो दाहिणमुहमंडवस्स पूएइ ।
तो उत्तरिल्लखंभे पूयइ तम्मंडवट्ठियओ ॥ १७ ॥

पुव्वं दारं पूयइ दाहिणमुहमंडवस्स तणयं तु ।
मुहमंडवस्स तणियं दाहिणवारं पि पूएइ ॥ १८ ॥

तेणं चिय नीहरई तो दाहिणपेच्छमंडवयमज्झं ।
पच्छिमदारं तत्तो उतरिलखंभे उ पुव्विल्लं ॥ १९ ॥

तत्तो दाहिणदारं पूएइत्तुं च नीहरइ तेणं ।
तत्तो दाहिणचेइयथंभं पूएइ संतप्पा ॥ २० ॥

थुभाभिमुहीओ चउदिसिं पि (तत्थ) चत्तारि संति जिणपडिमा ।
तासिं पढमं पच्चित्थिमिल्लपडिमं नमंसेइ ॥ २१ ॥

तो उत्तरिल्लपडिमं वंदइ तत्तो उ पुव्वतणयं तु ।
तत्तो दाहिणपडिमं थूयइ अंचेइ वंदेइ ॥ २२ ॥

दाहिणचेइयरुक्खे दाहिणचेइयधयं च दाहिणया ।
नंदा पुक्खरणी वि य पूयइ अंचेइ संतप्पा ॥ २३ ॥

तत्तो सिद्धाय्यणं पयाहिणीकरिय जाइ उत्तरियं ।
नंदा पुक्खरणी चेइयरुक्ख चेइयधयं रम्मं ॥ २४ ॥

चेइयथूभं तस्संमुहाउ पडिमाउ पुव्वनीईए ।
वंदित्ता पविसेई उत्तरपेच्छणयमंडवए ॥ २५ ॥

तत्थ वि पुव्वकमेणं पूयइ दाराइं पविसइ तत्तो ।
उत्तरमुहमंडवए तत्थ वि पुव्वं व दाराइं ॥ २६ ॥

पूइत्ता नीहरई सिद्धाययणस्स पुव्वदारेणं ।
पविसेइ पुव्वमुहमंडवम्मि पूएइ तम्मज्झं ॥ २७ ॥

दाहिणदारं थंभाण पंतिया पच्छिमाइ उत्तरियं ।
दारं पूयइ पुव्वं दुवारयं तं पि पूएइ ॥ २८ ॥

तेणं चिय नीहरई पुव्वपेच्छणयमंडवे सव्वे ।
पुव्वमुहमंडवे इव करेइ तो एइ पुव्विल्ले ॥ २९ ॥

चेइयथूभे तत्थ वि पुव्वकमेणं जिणाण पडिमाउ ।
पूइत्ता चिइरुक्खं चेइध्वयं नंदीवावी य ॥ ३० ॥

सोहम्माएँ सभाए पुव्वद्दारेण पविसई तत्तो ।
मज्झे धयचेइखंभे वइरामयगोलवट्टेसु ॥ ३१ ॥

जिणसकहाओ पूयइ थंभं पूइत्तु देवसयणीयं ।
खुड्डागमहिंदज्झय पहरणकोसं च सुंवालं ॥ ३२ ॥

सोहम्मसभागब्भं पूइत्ता जाइ तत्थ पडिमाए ।
उववायसभाएँ तओ हरगं अंचित्तु बीयाए ॥ ३३ ॥

अभिसेयाए वच्चइ तत्तोऽलंकारियाए तइयाए ।
तत्तो ववसायाए सभाएँ पूएइ वरपोत्थं ॥ ३४ ॥

तत्तो सोहम्मसभापुरच्छिमिल्लाए नंदनामाए ।
पुक्खरिणीए मज्जिय सज्जो बलिसज्जणं करइ ॥ ३५ ॥

देवा देवीओ वि य सिंघाडगमाइ तत्थ पूयंति ।
तम्मि कए सम्माणे पविसइ पुव्विल्लदारेणं ॥ ३६ ॥

सोहम्माएँ सभाए निसीय सिंहासणम्मि रम्मम्मि ।
पुव्वाभिमुहो तत्तो सामाणियपभिइ परिवारो ॥ ३७ ॥

पुरओ निसीयइ पहरणवावडहत्थो पसंतमुहसोहो ।
जय जय नंदा जय जय भद्दा इइ जंपिरो रम्मो ॥ ३८ ॥

इय पुव्वसुकयकम्माणुभावजणियं विसिट्ठविसयसुहं ।
भुंजंतो वरसरसच्छराहिं सद्धिं गमइ कालं ॥ ३९ ॥

सिद्धायणगमेणं मुहमंडवपभिइ वित्थरो सव्वो ।
पायं पंचसभासु वि उववायाईसु विन्नेओ ॥ ४० ॥

सव्वेसिं दुवाराणं तह चिइरुक्खाइयाण उवरिम्मि ।
छत्ताइछत्तधयमंगलाइं सव्वत्थ नेयाइं ॥ ४१ ॥

एसो सुरकिच्चविही उवंगरायप्पसेणईयाओ ।
भणिओ अहिणवजायाण सव्व इंदाण देवाणं ॥ ४२ ॥

सिरिवद्धमाणसूरीण पायकमलेसु भमरसरिसेहिं ।
सिरिचक्केसरसूरीहिं भासियमिणं पगरणममेयं ॥ ४३ ॥

श्रीहर्षकुलगणिविरचितः

# ॥ कविकल्पद्रुमः ॥

## ॥ १ ॥ अनुबन्धफलप्रकाशः प्रथमः पल्लवः ॥

अर्हं प्रणम्य श्रीसिद्धहेमलक्षणसङ्गताः ।
साभिधेयाः प्रकाश्यन्ते पद्यबन्धेन धातवः ॥ १ ॥

आदौ वक्ष्येऽनुबन्धानां सर्वधातुनिवासिनाम् ।
फलानि, तेष्वकारःस्यात् सुखोच्चाराय जीववत् ॥ २ ॥

आकार आदित ४-४-७१ इतीट्निषेधाय क्तयोर्भवेत् ।
मिन्नवद्वेट्निषेधादिहेतुश्चारम्भभावयोः ॥ ३ ॥

प्रमेदितः प्रमिन्नश्च यथा मिन्नं च मेदितम् ।
अनेनेति नवा ४-४-७२ भावारम्भ इत्यत्र कीर्त्तितः ॥ ४ ॥

इकार इङितः ३-३-२२ कर्त्तर्यात्मनेपदसूचकः ।
एधतेवदीकारस्तु व्यक्तोभयपदात्मकः ॥ ५ ॥

ईगितस्सूत्रनिर्दिष्टो ३-३-९५ यजते यजतीतिवत् ।
उति स्वरान्नन्दतिवन्नोऽन्तं इत्युदितः ४-४-९८ स्वरात् ॥ ६ ॥

अङ्क्त्वाऽञ्चित्वावदूः क्त्वायामूदितो ४-४-४२ वेति वेट्फलः ।
अचखाददुपान्त्यस्येत्युपान्त्यह्रस्वनाश ४-२-३५ ऋत् ॥ ७ ॥

ऋकारोऽदर्शदद्राक्षीद् ऋदिच्छ्वीत्यङ् विकल्पकृत् ३-४-६५ ।
लृदिद्द्युतादीत्यङ्सूची ३-४-६४ लृत्परस्मैपदेऽगमत् ॥ ८ ॥

न श्व्यादि ४-३-४९ सिच्येदिद् वृद्धेरभावायाहसीदिव ।
इडभावः क्तयोरैदित् डीयश्व्यैदीति ४-४-६१ चित्तवत् ॥ ९ ॥

सूयत्येति ४-२-७० क्तयोस्तो न ओदिति स्यात्प्रवाणवत् ।
धूगौदीत्यशिति ४-४-३८ स्तादौ वेट् क्षान्ता क्षमितावदौत् ॥ १० ॥

एकस्वरादिति ४-४-५६ स्ताद्यशिति स्यादिडभावकृत् ।
अनुस्वारः प्रवातावत्स्वरेत इति संस्थिताः ॥ ११ ॥

अदादिज्ञापकः कः शित्यत्र न प्रत्ययोऽत्तिवत् ।
कर्तर्यनद्भ्य ३-४-७१ इत्युक्तेर्यङ्लुबन्ता अदादिवत् ॥ १२ ॥

स्याद्गित्युभयतोभाषा करोति कुरुते यथा ।
ईगीति, ३-३-९५ ङिति गातेवदिङितेत्यात्मनेपदम् ३-३-२२ १३

दिवाद्यावेदकश्चोऽत्र दिवादेः ३-४-७२ श्यः स्यतीतिवत् ।
ज्ञानेच्छार्च्चेति ५-२-९२ ञीति क्तः सत्यर्थे मिन्नरूपवत् ॥ १४ ॥

स्वादिसूची टकारोऽत्र स्वादेः ३-४-७५ श्नुः स्याद्धिनोतिवत् ।
ङ्यर्थः स्तनन्धयीत्यादौ ट्धेमत्राणञेति २-४-२० टित् ॥ १५ ॥

ट्वितोऽथुरित्यनेन ५-३-८३ स्यादथुर्नदथुवत् ट्विति ।
ड्विति कृत्रिमवद् ज्ञेयो ड्वितस्त्रिमगिति त्रिमक् ५-३-८४ ॥ १६ ॥

णः स्याच्चुरादये तत्र णिच् चुरादिभ्य ३-४-१७ ईरयन् ।
स एव इण २-१-५१ इत्यादाविण्क्धातौ विशेषकृत् ॥ १७ ॥

तानुबन्धस्तुदाद्यर्थस्तुदादेः ३-४-८१ शस्तुदामिवत् ।
रुधाद्यर्थं पिदत्र श्नो रुधां ३-४-८२ स्वराद् रुणद्धिवत् ॥ १८ ॥

बवयोरेकता कान्ता दाम् दान इति मिद् भवेत् ।
श्रौत्यादिष्वऽन्यदासंज्ञानिषेधायेव ४-२-१०८ यच्छति ॥ १९ ॥

तनादये य उस्तत्र ३-४-८३ कृग्तनादेस्तनोतिवत् ।
दासंज्ञाभावकृद्वः स्यादवौदेत्यवदातवत् ३-३-५ ॥ २० ॥

शित् क्र्यादिज्ञापकोऽत्र श्ना ३-४-७९ क्र्यादेः क्रीणातिवद् भवेत् ।
षानुबन्धोऽङ् प्रत्ययाय क्षमावत् स्यात्षितोऽङिति ५-३-१०७ २१

व्यञ्जनेत इति प्रोक्ताः कण्ड्वादेर्यगसूयते ३-४-८ ।
भ्वादयः शब्विकरणा उत्सर्गेणार्च्छतीतिवत् ॥ २२ ॥

इति सद्गुरुवाग्देवीप्रसादमासाद्य हर्षकुलविहिते ।
कविकल्पद्रुमनाम्नि ग्रन्थेऽयमपूरि पल्लवः प्रथमः ॥ २३ ॥

## ॥ २ ॥ भ्वादिगणप्रकाशो: द्वितीय: पल्लव: ॥

क्वचिदादौ धातु: स्यात् क्वचिदर्थो बन्धसङ्गतेरुक्तिः ।
चः पूर्वसमुच्चयनेऽथादित्वन्तौ न पूर्वगतौ ॥ २४ ॥

अनिट्-परस्मैप्रभृति: सर्वेषु स्वानुबन्धत: ।
ज्ञेयो विभागो धात्वन्तवर्णोक्तिः पूर्वमेव हि: ॥ २५ ॥

भू धातुः सत्तायामादन्ताः ष्ठां गतौ निवृत्तायाम् ।
घ्रां गन्धोपादाने म्नां अभ्यासेऽथ दाम् दाने ॥ २६ ॥

शब्दाग्नियोगयोर्ध्मां पां पाने गाङ्ताविदन्ताः षट् ।
ष्मिंङ् ईषद्धसने स्यादिं गमने श्रिग् तु सेवायाम् ॥ २७ ॥

जिं ज्रिं परिभूतौ क्षिं क्षय ईदन्तौ वयोगतौ डीङ् ।
णींग् प्रापणे ह्युदन्ता दुं द्रुं शुं स्तुं प्रुंङ् च्युंङ् ॥ २८ ॥

ज्युंङ् प्लुंङ् जुंङ् गमने रुंङ् रोषे च ध्रुं स्थिरत्वगत्योः कुंङ् ।
उंङ गुंङ् घुंङ् ङुंङ् शब्दे सं प्रसवैश्वर्य्ययोर्हि ऊदन्तौ ॥ २९ ॥

पूङ् पवने मूङ् बन्धेऽथ ऋदन्ताः धृंग् धारणे भृंग् ।
भरणे डुकृंग् करणे हृंग् हृतौ स्मृं तु चिन्तायाम् ॥ ३० ॥

गृं घृं तु सेचने सृं गमने ऋं प्रापणे च द्वृं वरणे ।
ध्वृं ह्वृं कौटिल्यार्थावौस्वृं तु शब्दोपतापयुगे ॥ ३१ ॥

धृंङ् तु अवध्वंसेऽथो ऋदन्तः प्लवनतरणयोस्तृः स्यात् ।
एदन्ता मेङ् प्रत्यर्पणेऽथ देंङ् पालने ट्धें पाने ॥ ३२ ॥

ऐदन्ता द्रैं स्वप्ने ध्रैं तृप्तौ निस्वने तु कैं गैं रैं ।
श्रैं स्त्रैं पाके ओवैं पैं शोषे ख्यैं तु स्वदने स्यात् ॥ ३३ ॥

गात्रविनामे म्लैं द्यैं न्यङ्ककृतौ संक्षये तु जैं सैं क्षैं ।
ग्लैं हर्षक्षयणे ध्यैं चिन्तायां शोधने दैंव् ॥ ३४ ॥

श्यैङ् गमने प्यैङ् वृद्धौ ष्ट्यैं स्त्यैं सङ्घातशब्दयोः ष्णैं तु ।
वेष्टनके त्रैङ् पालन इह कान्ताः फक्क नीचगतौ ॥ ३५ ॥

तक हसने शुक गमने ककि लौल्ये बुक्क भाषणे हिक्की ।
अव्यक्तवाचि तकु कृच्छ्रजीवने सेचने शीकृङ् ॥ ३६ ॥

द्रेकृङ् ध्रेकृङ् शब्दोत्साहेऽकुङ् लक्षणे शकुङ् रेकृङ् ।
शङ्कार्थे कुकि वृकि तु ग्रहणार्थे दर्शने लोकृङ् ॥ ३७ ॥

ककुङ् श्वकुङ् त्रकुङ् श्रकुङ् श्लकुङ् ष्वष्कि वस्कि मस्कि तिकि ।
ढौकृङ् त्रौकृङ् टीकृङ् स्रेकृङ् सेकृङ् टिकि गतौ स्युः॥ ३८ ॥

श्लोकृङ् सङ्घातार्थे कौटिल्ये वकुङ् मकुङ् भूषायाम् ।
चकि तृप्तिप्रतिघातार्थयोर्द्वियुग्विंशतिः खान्ताः ॥ ३९ ॥

शाखृ श्लाखृ व्याप्तौ कक्ख हसे राखृ लाखृ ओखृयुतः।
द्राखृ ध्राखृ विशोषालमर्थयोरुख णख नखश्रित् ॥ ४० ॥

वख मख रख लख मखु रखु लखु रिखु इख ईखु इखु गतौ गान्ताः ।
वल्ग रगु लगु तगु श्रगु अगु श्लगु स्वगु वगु मगुश्रित् ॥ ४१ ॥

उगु इगु रिगु लिगु गमने त्वगु कम्पे चाथ युगु जुगु वुगुः स्युः ।
वर्जन इहाथ घान्ता गग्घ हासे पालने तु दघु ॥ ४२ ॥

अघुङ् वघुङ वेगार्थौ कैतवे च मघुङ् मतः ।
राघुङ् लाघृङ् तु सामर्थ्ये द्राघृङ् कदर्थने च वै ॥ ४३ ॥

रघुङ् लघुङ् गतौ श्लाघृङ् कत्थने लघु शोषणे ।
आघ्राणे शिघु चान्तास्तु डुयाचृग्याचनार्थकः ॥ ४४ ॥

कुच शब्दे तारे स्यादपनयने लुञ्च अर्च पूजायाम् ।
अञ्चू गतौ च वञ्चू चञ्चू तञ्चू म्रुचू त्वञ्चू ॥ ४५ ॥

मञ्चू मुञ्चू म्रुञ्चू म्लुचू ग्लुचू गतौ हि षश्चाम्रि ।
शुच शोके क्रुञ्च गतौ कुञ्च च कौटिल्यतानवयोः ॥ ४६ ॥

अञ्चूग् गमननिनादाव्यक्त्योः षचि सेचने कचि तु बन्धे ।
दीप्तौ च कचुङ् वर्चि तु दीप्तौ श्वचुङ् श्वचि गमार्थौ ॥ ४७ ॥

पचुङ् व्यक्तीकरणे ष्टुचि प्रसादेऽथ दर्शने लोचृङ् ।
मचि मुचुङ् कल्कने मचुङ् धारणोच्छ्रयपूजनेषु च वै ॥ ४८ ॥

स्तेये ग्लुचू ग्रुचू डुपचींष् पाके व्यक्तवाचि तु शचि स्यात् ।
छान्ता ह्रीछ व्रीडे हुर्च्छा कौटिल्य आछु आयामे ॥ ४९ ॥

स्फुर्च्छा स्मुर्च्छा विस्मृत्येऽर्थौ लछ लाछु लक्षणे म्लेछ ।
अव्यक्तवाचि मुर्छा मोहसमुच्छ्राययोः प्रमादे तु ॥ ५० ॥

युछ वाछु त्विच्छायां जान्तास्तिजि तु क्षमानिशानयुगे ।
एजृङ् भ्राजि भ्रेजृङ् राजृग् टुभ्राजी दीप्तौ स्युः ॥ ५१ ॥

रञ्जीं रागेऽथ भर्जी सेवायां स्यादिजुङ् धृजु ध्वजुयुग् ।
ध्वज धृज वज ध्रज ध्रजु षस्ज व्रज युग्गतावज तु ॥ ५२ ॥

क्षेपे च ट्वोस्फूर्जा वज्रनिनादे कुजू खुजू स्तेये ।
खजु गतिवैकल्यार्थे खर्ज स्याद्व्यथनमार्जनयोः ॥ ५३ ॥

जज जजु युद्धे लज लजु तर्ज स्याद्भर्त्सनेऽथ लाजयुतः ।
लाजुरपि भर्जने चैजृ कम्पने तुज तु हिंसायाम् ॥ ५४ ॥

तुजु बलने चाव्यक्ते शब्दे गुज कूज गुजुयुतः क्षीज ।
गर्ज गृजु गजु गृजश्रित् मुज मुजु मृज मज निनादार्थाः ॥ ५५ ॥

गज मदने च व्यथने तु कर्ज मन्थे खज त्यजं हानौ ।
ईजि तु गतिकुत्सनयोरृजुङ् भृजैङ् भर्जने ऋजि तु ॥ ५६ ॥

अर्जनगमनस्थानार्जनेषु सर्जार्ज अर्जने स्याताम् ।
षञ्जं सङ्गे टान्ताः स्फुट्ट स्फुट विशरणे स्याताम् ॥ ५७ ॥

स्फुटि विकसनेऽट्टि हिंसातिक्रमयोर्गोष्टि लोष्टि सङ्घाते ।
घट्टि तु चलने चेष्टि तु चेष्टायां रुटु लुटु स्तेये ॥ ५८ ॥

जट झट सङ्घाते पिट शब्दे चावरणवर्षयोस्तु कटे ।
शट विशरणगमनरुजावसादनेषु ध्वनौ तु विट ॥ ५९ ॥

वट वेष्टि वेष्टने किट खिट उत्त्रासे प्रमर्द्दने तु मुट ।
तट उच्छ्राये हेट तु बाधायां भट भृतौ चिट प्रैष्ये ॥ ६० ॥

अट पट इट किट कट कटु कटे गतौ णट नृत्तौ खट तु काङ्क्षे ।
षट अवयवे लुट स्याद्विलोटने कुटु तु वैकल्ये ॥ ६१ ॥

चुट चुटु अल्पीभावे हट दीप्तौ वटु विभाजने लट तु ।
परिभाषणशैशवयोरथ रट परिभाषणे रेटृग् ॥ ६२ ॥

प्रणये च शिट षिट द्वावनादृतौ ठान्तका अठुङ्गमने ।
कठुङ मठुङ् शोकार्थौ बाधायां हेठि एठि द्वौ ॥ ६३ ॥

परिभाषणे रठ स्याद् व्यक्तायां वाचि पठ वठ स्थौल्ये ।
मठ मदनिवासयोश्च प्रोक्तः कठ कृच्छ्रजीवनके ॥ ६४ ॥

उठ रुठ लुठ उपघाते अठ रुठु गमनेऽथ हठ बलात्कारे ।
पिठ हिंसासंक्लेशार्थयोः शंठ व्याजकरणे च ॥ ६५ ॥

शुठ गमनप्रतिघाते कुठु लुठु आलस्यके च शुठु शोषे ।
मुठुङ् तु पलायने स्याद् वठुङ् भवेदेकचर्यायाम् ॥ ६६ ॥

डान्तास्तुडुङ् प्रमये चडुङ् तु कोपेऽथ शौडृ गर्वार्थः ।
खुडुङ् गतेर्वैकल्ये कडुङ् मदे खडुङ् मन्थार्थः ॥ ६७ ॥

तुडृ तूडृ तोडनार्थे क्रीडृ विहारेऽथ मडु विभूषायाम् ।
अड उद्यमे पुडु स्यात्प्रमर्द्दने खण्डने च मुडु ॥ ६८ ॥

गडु तु वदनैकदेशे मेडृयुतम्रेडृ लोडृ तथा ।
म्लेडृ भवेन्दुमादे हुडृ हूडृ हूडृ हौडृ गतौ ॥ ६९ ॥

रोडृयुतरौडृ तौडृ त्वानादरे कडु मदे लड विलासे ।
यौडृ तु सम्बन्धे विड आक्रोशे कडु कार्क्कश्ये ॥ ७० ॥

हुडुङ् पिडुङ् सङ्घाते शडुङ् रुजायां च पडुङ् गमनार्थः ।
शाडृङ् श्लाघायां स्यात् द्राडृङ् ध्राडृङ् विशरणार्थौ ॥ ७१ ॥

वाडृङ् आप्लाव्यार्थे तडुङ् भवेत्ताडने भुडुङ् वरणे ।
मुडुङ् इति मार्जनार्थे हेडृङ् होडृङ् अनादरणे ॥ ७२ ॥

हिडुङ् गमने च अड्ड स्यादभियोगेऽथ चुड्ड हावकृतौ ।
भडुङ् परिभाषणार्थो मडुङ् बडुङ् वेष्टने कुडुङ् दाहे ॥ ७३ ॥

खोडृ प्रतिघातेऽथो णान्ता स्याद्वर्णगमनयोः शोणृ ।
घुणि घूर्णि भ्रमणार्थौ पणि तु व्यवहारस्तुत्योः स्यात् ॥ ७४ ॥

अण रण वण बण भण मण धण व्रण भ्रण कण क्वण ध्वणयुग् ।
ध्रण चण शब्दे पैणृ श्लेषगतिप्रेरणेष्वथो ओणृ ॥ ७५ ॥

अपनयने घिणुङ् घुणुङ् घृणुङ् ग्रहणेऽथ वेणृग् ज्ञाने ।
चिन्तायां वादित्रादाने गमने निशामनेऽपि स्यात् ॥ ७६ ॥

श्रोणृ श्लोणृ स्यातां सङ्घाते तान्तकाः कित निवासे ।
जुतृङ् युतृङ् दीप्त्यर्थौ यतैङ् प्रयत्ने चतेग् तु याञ्चायाम्॥ ७७ ॥

संज्ञाने तु चितै स्यात् च्युतृ आसेचनेऽत सततगतौ ।
चुतृ श्चुतृ श्च्युतृ क्षरणे जुतृ तु भासने ख्यातः ॥ ७८ ॥

अतु बन्धने ऋत घृणागमनस्पर्द्धेषु पञ्चदश थान्ताः ।
कुथु मन्थ मान्थ पुथु लुथु मथु हिंसाबाधयोर्ज्ञेयाः ॥ ७९ ॥

नाथृङ् उपतापाशीर्याञ्चैश्वर्येषु कत्थि तु श्लाघे ।
प्रोथृग् पर्याप्तौ स्यात् वेथृङ् युतविथृङ् याञ्चायाम् ॥ ८० ॥

कौटिल्ये ग्रथुङ् स्यात् शैथिल्ये श्रथुङ मिथृग् मतिवधयोः ।
मेथृग् सङ्गे चाथो दान्ता ज्ञेयास्त्रिपञ्चाशत् ॥ ८१ ॥

णिदु कुत्सायामथ रद विलेखने नर्द णर्द गर्द रवे ।
अव्यक्तभाषणे णदसंयुक्ता त्रिक्ष्विदा धातुः ॥ ८२ ॥

कर्द तु कुत्सितशब्दे हिंसायां तर्द खर्द दशने स्यात् ।
चदु दीप्त्याह्लादनयोः क्लिदु इति परिदेवने ख्यातः ॥ ८३ ॥

क्रदुयुक्क्लदु आमन्त्रणरोदनयोर्विदुः स्मृतोऽवयवे ।
स्कन्दृं गतिशोषणयोष्टुनदु समृद्धौ बद स्थैर्ये ॥ ८४ ॥

खद हिंसायां च गद व्यक्तायां वाचि भक्षणे खादृ ।
अर्द तु गतिपाचनयोस्त्रदु चेष्टायामदु तु बन्धे ॥ ८५ ॥

इदु परमैश्वर्ये स्यादाप्रवणे स्कुदुङ् षूदि तु क्षरणे ।
प्रोक्ता वदुङ स्तुत्यभिवादनयोर्भदुङ् सुखशुभयोः ॥ ८६ ॥

स्पदुङ् तु किञ्चिच्चलने क्लिदुङ् तु परिदेवने श्विदुङ् श्वैत्ये ।
मदुङ् स्तुतौ प्रमोदे स्वप्ने गमने मदार्थेऽपि ॥ ८७ ॥

ह्रादि तु शब्दे ह्लादैङ् सुखे च गुदि गुर्दि कुर्दि केल्यर्थाः ।
पर्दि तु कुत्सितशब्दे ददि दाने मुदि तु हर्षे स्यात् ॥ ८८ ॥

स्वदि ष्वदियुग् स्वादि तु आस्वादन उर्दि खेलनार्थे स्यात् ।
मानेऽपि हर्दि तु पुरीषोत्सर्गे याचने तु चदेग् ॥ ८९ ॥

णेदृग् णिदृग् द्वितयं स्यात्कुत्सासन्निकर्षयोः प्रोक्तम् ।
ओबुन्दृग् आलोचे मेधावधयोर्मिदृग् मेदृग् ॥ ९० ॥

धान्ताः षिधू गमार्थे षिधौ तु माङ्गल्यशास्त्रयोरुक्तः ।
एधि तु वृद्धौ स्पर्द्धि तु सङ्घर्षे बन्धने तु बधि ॥ ९१ ॥

गाधृङ् भवेत्प्रतिष्ठालिप्साग्रन्थेषु धारणे तु दधि ।
मेधृग् सङ्गमहिंसामतिषून्दार्थौ शृधूग मृधूग् ॥ ९२ ॥

नाधृङ् नाथृङ् वत् स्याद् बुधृग् बोधे रोटने बाधृङ् ।
शुन्ध तु शुद्धौ नान्ताः पनि स्तुतौ मानि पूजायाम् ॥ ९३ ॥

वन षन भक्तौ स्वन वन धन ध्वन स्तन चन स्वनार्थाः स्युः ।
शानी तु तेजने स्याद्दानी अवखण्डनेऽथ खनूग् ॥ ९४ ॥

अवदारणे कनै तु प्रकाशशोभागतिष्वथो पान्ताः ।
रप लप जल्प व्यक्ते वचने जप मानसे च स्यात् ॥ ९५ ॥

धूप तपं सन्तापे त्रुप तुम्प त्रुम्प तुप तु हिंसायाम् ।
सृप्लृं गतौ चुप स्यान्मन्दायां रक्षणे तु गुपौ ॥ ९६ ॥

तिपृङ् ष्टिपृङ् ष्टेपृङ् क्षरणे तेपृङ् तु कम्पने चोक्तः ।
गुपि गोपनकुत्सनयोर्ग्लेपृङ् दैन्ये च चलने च ॥ ९७ ॥

केपृङ् कपुङ् टुवेपृङ् गेपृङ् चलने त्रपौषि लज्जायाम् ।
मेपृङ् रेपृङ् लेपृङ् गमने चप सान्त्वनेऽथ शर्पी ॥ ९८ ॥

आक्रोशेऽथ षप स्यात् समवाये फान्तकास्तुफ त्रुम्फ ।
त्रुफ तुम्फ हिंसने रफ रफु वर्फ गतावथो बान्ताः ॥ ९९ ॥

अर्ब रबु कर्ब खर्ब तु गर्बयुतश्चर्ब तर्ब नर्ब रिबु ।
पर्बयुतबर्ब शर्ब तु पर्ब तथा सर्ब गमनार्थाः ॥ १०० ॥

लुबु तुबु तु अर्दने चुब् मुखसंयोगेऽथ कुबु समाच्छादे ।
अबुङ् रबुङ् शब्दार्थौ लबुङ् अवस्रंसने च स्यात् ॥ १०१ ॥

क्लीबृङ् धार्ष्ट्याभावे क्षीबृङ् तु मदे कबृङ् तु वर्णे स्यात् ।
भान्ताः सृभू षिंभू सृभू स्त्रिभू भर्भ हिंसायाम् ॥ १०२ ॥

शीभृङ् चीभृङ् शल्भि श्लाघायां वल्भि भोजनार्थेऽथ ।
डुलभिंष् प्राप्त्यर्थे ष्टभुङ् स्कभुङ् ष्टुभूङ् स्तम्भे ॥ १०३ ॥

रेभृङ् अभुङ् रभुङ् युग् लभुङ् निनादे र्शभि तु राभस्ये ।
जभुङ् जभैङ् जृभुङ् स्युर्गात्रविनामेऽथ गल्भि धार्ष्ट्ये स्यात् ॥ १०४ ॥

सुरते यभं जभ द्वौ शुम्भ तु वधकथनयोरथो मान्ताः ।
अम हम्म द्रम गम्लृं मीमृ गतावुपरमे तु यमूं ॥ १०५ ॥

ष्टम षम वैक्लव्यार्थौ स्यमू निनादे तथाऽम भजने च ।
प्रह्वत्वे तु णमं स्यात् पादन्यासे क्रमू धातुः ॥ १०६ ॥

प्रोक्ताश्चमू छमूयुग् जमू झमूश्रिज्जिमू च निघसार्थाः ।
भामि क्रोधे कान्तौ कमूङ् सहने क्षमौष्यथो यान्ताः ॥ १०७ ॥

ओप्यायैङ् स्फायैङ् युग् वृद्धावूयैङ् तन्तुसन्ताने ।
क्नूयैङ् शब्दोन्दनयोस्तायृङ् सन्तानपालनयोः ॥ १०८ ॥

तयि णयि रक्षणगत्योर्दयि हिंसादहनयोश्च दानेऽपि ।
अयि वयि पयि मयि नयि चयि रयि गमनार्था अथो पूयैङ् ॥ १०९ ॥

दुर्गन्धकविशरणयोः सूक्ष्र्ययतावीक्ष्र्य ईर्ष्य ईर्ष्यार्थौ ।
हय हर्य गतिक्लान्त्योः शुच्यै चुच्यै अभिषवार्थौ ॥ ११० ॥

मव्य तु बन्धे क्ष्मायैङ् विधूननेऽथो निशामनार्चनयोः ।
चायृग् व्ययी तु गमने रान्ताः त्सर कैतवगतौ स्यात् ॥ १११ ॥

क्मर कौटिल्ये धोर्ऋ तु गतिचातुर्येऽभ्र मभ्र बभ्र गतौ ।
चर भक्षणे च धातुः खोर्ऋ तु गमनप्रतीघाते ॥ ११२ ॥

लान्ताः पञ्चाशत् स्युर्दल त्रिफला विशरणे गल न्यादे ।
शूल रुजायां कूल तु वरणे मूल प्रतिष्ठायाम् ॥ ११३ ॥

मील श्मील स्मील क्ष्मील निमेषेऽथ णील वर्णार्थः ।
शील समाधौ कील तु बन्धे पील प्रतिष्टम्भे ॥ ११४ ॥

फल निष्पत्तौ तूल तु निष्कर्षे फुल्ल विकसनार्थः स्यात् ।
श्वल्ल श्वल शीघ्रगतौ चुल्ल स्याद् हावकरणार्थः ॥ ११५ ॥

चिल्ल तु शैथिल्ये च स्खल खेलृ क्वेलृ केलृ वेलृ तथा ।
चेलृ चलने च खल सञ्चये च इह पूल सङ्घाते ॥ ११६ ॥

पेलृ तिल फेलृ शेलृश्रित् च सेलृ वेहृलृ सल तिल्ल स्युः ।
पल्ल वेल्ल गमनेऽली भूषणपूणतानिषेधेषु ॥ ११७ ॥

वलि वल्लि तु संवरणे शलि चलने चाथ कल्लि मौनार्थे ।
मलि मल्लि धारणार्थौ कलि सङ्ख्याशब्दयोरुक्तः ॥ ११८ ॥

भलि भल्लि तु परिभाषणहिंसादनेष्वथो वकारान्ताः ।
पर्वयुतपूर्व मर्व प्रपूरणे चर्व अदनार्थे || ११९ ||

कर्वयुतखर्व गर्व तु दर्पार्था मर्व धवु शव धविश्रित् ।
रेवृङ् गमने धावृग् शुद्धौ चाथोद्यमे गुर्वै || १२० ||

उर्वै तुर्वै थुर्वै दुर्वै धुर्वै तथाऽर्व जुर्वैयुग् ।
शर्वयुतभर्व कदने मुर्वै मव बन्धने ख्यातौ || १२१ ||

अव रक्षणे प्रवेशे तृप्तौ कान्तौ गतौ क्रियादीप्त्योः ।
अवगमने च प्रीतौ स्वाम्यर्थे याचने श्रवणे || १२२ ||

हिंसायामिच्छायां वृद्धावालिङ्गने तथाऽवाप्तौ ।
दहने भावे प्रोक्तः ष्ठिवू क्षिवू निरसने स्याताम् || १२३ ||

जीव असुधारणे स्यात् पिवु मिवु निवु सेचनेऽथ पीवश्रित् ।
मीवयुततीव णीव च नीव स्थौल्ये हिवु दिवुश्रित् || १२४ ||

जिवु संप्रीणन इवु तु व्याप्तौ चादानसंवरणयोस्तु ।
चीवृङ् तेवृङ् देवृङ् द्वौ स्यातां देवनार्थेऽत्र || १२५ ||

षेवृङ् सेवृङ् केवृङ् खेवृङ् गेवृङ् तथा च पेवृङ्युग् ।
ग्लेवृङ् प्लेवृङ् म्लेवृङ् स्युः सेवनेऽथ दश शान्ताः || १२६ ||

कश शब्देऽथो मिश मश रोषार्थे चाथ णिश समाधौ स्यात् ।
दाश्टृग दानेऽथ शश प्लुतिगमने प्रेक्षणे दृशूं || १२७ ||

दंशं दशने काश्टृङ् प्रभासने क्लेशि बाधने षान्ताः ।
भाषि च वचसि व्यक्ते कान्तीकरणे घुषुङ् प्रोक्तः || १२८ ||

गेषृङ् अन्विच्छायामीषि तु दर्शने गतौ वधार्थेऽपि ।
हेषृङ् रेषृङ् वाच्यव्यक्तायां पर्षि तु स्नेहे || १२९ ||

जेषृङ् णेषृङ् एषृङ् हेषृङ् गमने भये तु भेषृग् स्यात् ।
कष शिष जष झष वष मष मुष रुष रिष यूष जूष शष चष तु ।
हिंसार्थाः भूष अलङ्कारेऽथ ह्रषू अलीकार्थः ॥ १३० ॥

जिष् विषू मिषू निषू वृषू पृषु तु सेचने ।
मृष् तु सहने चोषू श्रिषू श्लिषू प्रुषू प्लुषू ॥ १३१ ॥

दाहे घृषू तु संघर्षे वृषू संङ्घातहिंसयोः ।
ईष उञ्छे लूष मूष स्तेये कृषं विलेखने ॥ १३२ ॥

अदने चषी पषी तु स्यात् स्पर्शनबाधयोश्छषी हनने ।
दप्तौ त्विषीं तथाऽषी स्याद् गत्यादानयोश्च हि झषी तु ॥ १३३ ॥

चीवृग्वत् पूष भवेद् वृद्धौ सान्ता असी अषी तुल्ये ।
हृस रस तुस ह्लसश्रित् रसृङ् णासृङ् निनादार्थाः ॥ १३४ ॥

भवति शसू हिंसायां शंसूस्तवने च तसु अलङ्कारे ।
घस्लृं अदनेऽथ हसे हसने स्रंसूङ् प्रमादार्थः ॥ १३५ ॥

पिसृ पेसृ वेसृ गमने णसि कौटिल्ये ग्रसूङ् ग्लसूङ् अदने ।
कासृङ् रवकुत्सायामाङ् पूर्वः शसुङ् इच्छायाम् ॥ १३६ ॥

भासि टुभ्रासि टुभ्लासृङ् दीप्तौ भ्यसि तु साध्वसे ।
स्यात् घसुङ् करणे श्लैषक्रीडयोस्तु लस स्मृतः ॥ १३७ ॥

दासृग् दानेऽथ हान्ताः स्युर्दहं भस्मीकृतौ स्मृतः ।
वर्हि वल्हि प्रधानत्वे गर्हि गल्हि तु कुत्सने ॥ १३८ ॥

ग्लाहौङ् ग्रहणे द्राहृङ् निक्षेपणार्थेऽथ वेहृङ् ।
जेहृङ् वाहृङ् प्रयत्नार्था रहु प्लिहि अहुङ् गतौ ॥ १३९ ॥

माहृग् मानेऽथ गृहौग् संवरणे सेचने मिहं धातुः ।
ऊहि वितर्के गाहौङ् विलोडने ईहि चेष्टायाम् ॥ १४० ॥

महुङ् बहुङ् दृह दृहु बृह वृद्धौ बृहृ बृहु स्वनार्थौ च ।
उहृ दुहृ तुहृ अर्दनार्था रह त्यागे ॥ १४१ ॥

अर्ह मह पूजनार्थौ चह शाठ्ये बर्हि बल्हि युग्मं तु ।
परिभाषणे हिंसाच्छादनेष्वथो क्षान्तका एते ॥ १४२ ॥

त्वक्ष त्वचने सूर्क्ष्य त्वनादरे मक्ष सङ्घाते ।
अक्षौ व्याप्तौ च भवेत्तक्षौ त्वक्षौ तनूकरणे ॥ १४३ ॥

उक्ष तु सेके वक्ष तु रोषेऽथो चुम्बने भवेद् णिक्ष ।
स्तृक्षयुततृक्ष तु गमनार्थे पालने रक्ष ॥ १४४ ॥

काक्षुयुतवाक्षु माक्षु तु काङ्क्षायां घोरवासितार्थं च ।
द्राक्षु ध्राक्षु ध्वाक्षु त्रयं भवेद् वृक्षि वरणार्थः ॥ १४५ ॥

धिक्षि धुक्षि क्लेशने संदीपने जीवनेऽपि च ।
दीक्षि मौण्ड्ये व्रतादेशेज्यासूपनयने यमे ॥ १४६ ॥

शिक्षि तु विद्याग्रहणे याञ्चायां भिक्षि दर्शने त्वीक्षि ।
म्लक्षी अदने दक्षि तु शैघ्र्यै वृद्धावितीह शतनवकम् ॥ १४७ ॥

षट्त्रिंशदधिकमुक्तं धातूनामिदमथ द्युतादिगणः ।
द्युति दीप्तौ चान्तो रुचि अभिलाषे च त्रयष्टान्ताः ॥ १४८ ॥

घुटि तु परिवर्तने रुटि लुटि च प्रतिघात इह दान्ताः ।
ञिमिदाङ् स्नेहार्थे क्ष्विदाङ् ष्विदाङ् मोचने च ञीतौ द्वौ ॥ १४९ ॥

भान्ताः क्षुभि सञ्चलने शुभि दीप्तौ णभि तुभिं द्वयं प्रमये ।
स्त्रंभूङ् विश्वसनार्थे प्रोक्तस्तान्तौ श्विताङ् वर्णे ॥ १५० ॥

वृतूङ् वर्तने दान्तः स्यन्दौङ स्रवणार्थकः ।
धान्तौ वृधूङ वृद्धौ स्यात् शृधूङ पायुजे रवे ॥ १५१ ॥

पान्तः कृपौङ सामर्थ्ये वृतादिरथ ठान्तकाः ।
लुठिवल्लुठि शान्तस्तु भ्रंशूङ् स्रंसेऽथ सान्तकौ ॥ १५२ ॥

स्रंसूङ् भ्रंसूङ्समो ध्वंसूङ् गतौ चेति त्रिंविशतिः ।
वृत् द्युतादिर्ज्वलादौ तु ज्वल दसौ हि तान्तकः ॥ १५३ ॥

पत्लृ स्याद् गमने थान्ता निष्पाकार्थे क्वथे मतः ।
मथे विलोडनार्थेऽथ पथे पत्लृसमार्थकः ॥ १५४ ॥

चान्तः कुच तु कौटिल्ये प्रतिष्टम्भे विलेखने ।
संपर्च्चनेऽपि दान्तौ द्वौ शद्लृं तु शातनार्थकः ॥ १५५ ॥

षद्लृं विशरणे गत्यवसादनार्थयोरपि ।
मान्ता भ्रमू तु चलने टुवमूद्गिरणे मतः ॥ १५६ ॥

क्रीडायां तु रमिं स्याद्धान्तो बुध अवगमेऽथ लान्ताः स्युः ।
ट्वल टल वैक्लव्यार्थौ चल कम्पे ष्ठल स्थाने ॥ १५७ ॥

बल तु प्राणनधान्यावरोधयोर्हल विलेखनार्थः स्यात् ।
पल फल शल गत्यर्था हुल हिंसासंवरणयोश्च ॥ १५८ ॥

णल गन्धे जल घात्ये कुल संस्त्यानबन्धयोः ।
पुल तु विपुलत्वे शान्तः स्यात् कुशं तु आह्वानरोदनयोः ॥ १५९ ॥

रान्तः क्षर सञ्चलने हान्तौ षहिं मर्षणे रुहं जनुषि ।
सान्तः कस गमने वृत् ज्वलादिरेकाधिकं त्रिंशत् ॥ १६० ॥

अथो यजादिर्देवार्चादानयोः सङ्गतौ यजीं ।
इदन्तः ट्वोश्वि गमने वृद्धावेदन्तकास्त्रयः ॥ १६१ ॥

ह्वेंग् स्पर्द्धारवयोः व्येंग् संवरणे वेंग् तन्तुसन्ताने ।
दान्तो वचसि व्यक्ते वद पान्तो बीजसन्ताने ॥ १६२ ॥

टुवपीं सान्तस्तु वसं निवास इह हान्तको वहीं धातुः ।
स्यात् प्रापणे नवेत्यथ घटादिरिह घटिष चेष्टायाम् ॥ १६३ ॥

आदन्तः श्रां पाके ऋदन्तकः स्मृं गतस्तथाऽऽध्याने ।
ऋदन्तौ दृ तु भये नृ तु नयेऽथो चतुष्कान्ताः ॥ १६४ ॥

अक कुटिलगतौ ष्टकयुक् स्तक प्रतीघात इह हि तृप्तौ च ।
चक खान्तस्तु कखे स्याद् हसने यन्ता णट तु नटने ॥ १६५ ॥

परिभाषणे तु वट भट युग्मं जान्तः क्षजुङ् गतौ दाने ।
डान्ता गड सेचनके लड जिह्वोन्मन्थनार्थः स्यात् ॥ १६६ ॥

हेड इति वेष्टनार्थे णान्ताः कण फणयुतौ रण गतौ स्यात् ।
चण हिंसादाने च शण श्रण दानार्थकौ गान्तः ॥ १६७ ॥

लगे सङ्गे ह्रगे ह्लगे षगे सगे ष्टगे स्थगे ।
आच्छादनेऽग अकवत् शङ्कायां तु रगे स्मृतः ॥ १६८ ॥

अथ थान्तास्तु षट् प्रोक्ताः स्नथ क्नथयुत क्लथ ।
क्रथ हिंसार्थको धातुः प्रख्याने प्रथिष स्मृतः ॥ १६९ ॥

व्यथिष भयचलनयोः स्यादथ दान्ताः ऋदुङ कदुङ युक् क्लदुङ् ।
वैक्लव्यार्थाः स्खदिष स्खदने परिमर्दने म्रदिष ॥ १७० ॥

ऊर्जने छद विख्यातो हर्षग्लपनयोर्मदै (षट्पदी) ।
नान्ताः ष्टनयुक् स्तन च ध्वन शब्दे स्वन अवतंस इह चन तु ।
हिंसायां पान्तः ऋपि करुणायां रान्तकौ ज्वर तु रोगे ॥ १७१ ॥

ञित्वरिष सम्भ्रमार्थे, लान्ताश्चल कम्पने ह्वल ह्मल तु ।
चलनार्थौज्वल दीप्तौ च, सान्तकः प्रसिष विस्तारे ॥ १७२ ॥

क्षान्तस्तु दक्षि हिंसागत्योः षष्टिर्घटादिरेकाढ्यः ।
सर्वे भ्वादिगणे स्युः सहस्रमेकं तथाऽष्टपञ्चाशत् ॥ १७३ ॥

इति सद्गुरुवाग्देवीप्रसादमासाद्य हर्षकुलविहिते ।
कविकल्पद्रुमनाम्नि ग्रन्थेऽभूत्पल्लवो द्वितीयोऽयम् ॥ १७४ ॥

## ॥ ३ ॥ अदादिगणप्रकाशः तृतीयः पल्लवः ॥

आदावदंक अदनेऽथादाताः प्सांक पूर्ववद्भांक ।
गतिगन्धयोर्दांवक लवने ख्यांक प्रकथनार्थः ॥ १७५ ॥

लांक आदाने ष्णांक तु शौचेऽथ द्रांक कुत्सितगतौ स्यात् ।
श्रांक पाके रांक दाने भांक् दीप्तौ प्रांक पूरणे मांक् तु ॥ १७६ ॥

माने पांक तु रक्षण इह यांक प्रापणे ह्यथेदन्ताः ।
इंक स्मरणे इंण्क गमने इङ्क् तु अध्ययने ॥ १७७ ॥

ईदन्तौ वींक् खादनकान्तिप्रजनासनेषु गमने च ।
शीङ्क् स्वप्न उदन्ताः षुंक् प्रसवैश्वर्ययोः स्नुक् तु ॥ १७८ ॥

प्रस्रवने णुक ष्टुंगक् स्तवने तुंक् वृत्तिपूरणवधेषु ।
टुक्षु रु कुंक निनादे क्ष्णुक तेजन एषु मिश्रणे युक् स्यात्॥ १७९ ॥

आच्छादन ऊर्णुगक द्युंक् अभिगमे ह्नुङ्क् तु अपनयने ।
ऊदन्तौ षूङौक् प्राणिगर्भमोक्षे गिरि बूंगक् ॥ १८० ॥

व्यक्तायामथ चान्तौ वचंक व्रचने पृचैकि संपर्के ।
जान्ताः पिजुङ् पृजुङ् द्वौ प्राग्वत् शुद्धौ मृजौक् णिजुकि॥ १८१ ॥

वृजैकि वर्जने शब्दाव्यक्तत्वे शिजुकि स्मृतः ।
डान्त ईडिक् स्तुतौ तान्तः सस्तुक् स्वप्नेऽथ दान्तकः ॥ १८२ ॥

विदक ज्ञाने नान्तो हनंक गतिर्हिंसयोरथो रान्तः ।
ईरिक गतिकम्पनयोः शान्तावीशिक् तु ऐश्वर्ये ॥ १८३ ॥

वशक तु कान्तौ षान्तौ द्विषीक अप्रीतिनिर्मितौ सान्ताः ।
षसक स्वप्नेऽस्क् भुवि आङः शासूकि इच्छायाम् ॥ १८४ ॥

कसुकि तु गतिसातनयोराच्छादे वसिक चुम्बने णिसुकि ।
उपवेशनार्थ आसिक् हान्ता आस्वादने तु लिहींक् ॥ १८५ ॥

लेपे दिहींक धातुः शरणे तु दुहींक् उच्यते क्षान्तः ।
चक्षिक् व्यक्ते वचने द्वाषष्टिरमी, अथ ह्वादिः ॥ १८६ ॥

हुंक् दानादनयोःस्यादीदन्तौ द्वौ ञिभींक् भये ह्रींक् तु ।
लज्जायामादन्तास्त्यागे त्वोहांक् अथौहाङ्क् ॥ १८७ ॥

गमने मांङ्क् तु रवे मानेऽपि डुदांगक् प्रदाने डुधांगक् ।
स्याद्धारणे च रन्तत्रितयमिदं पोषणे च टुडुभृंगक् वै ॥ १८८ ॥

पृंक पालनपूरणयोः ऋुंक् गतौ जान्तकौ तु णिजृंकी ।
स्यात्पोषशौचयोरथ विजृंकी इह पृथग् भवेत्षान्तः ॥ १८९ ॥

विष्लृंकी व्याप्ताविति चतुर्दश ह्वादिरथ रुदादिरयम् ।
दान्तो रुदृक् अश्रुप्रमोचने पान्त ञिष्वपंक इति ॥ १९० ॥

शयनेऽथ नान्तसान्तावन श्वसक् प्राणने भवेत्क्षान्तः ।
जक्षक भक्ष्यहसनयोः सान्तौ दीप्तौ चकासृक् स्यात् ॥ १९१ ॥

शासूक् अनुशिष्टौ स्यादादन्तो दुर्गतौ दरिद्राक् वै ।
रन्तो जागृक् निद्रापगमने रुज्जक्षपञ्चकं पूर्णम् ॥ १९२ ॥

एवं स्युरदादिगणे सर्वे पञ्चाधिकाशीतिः (षटपदी)
इति सद्गुरुवाग्देवीप्रसादमासाद्य हर्षकुलविहिते ।
कविकल्पद्रुमनाम्नि ग्रन्थेभूत्पल्लवस्तृतीयोऽयम् ॥ १९३ ॥

## ॥ ४ ॥ दिवादिगणप्रकाशश्चतुर्थः पल्लवः ॥

वान्ता दिवूच क्रीडायां जयेच्छायां पणौ द्युतौ ।
स्तुतौ गतौ च ईदन्ता प्रींङ्च् प्रीतावथो गतौ ॥ १९४ ॥

ईङ्च्, पाने तु पींङ्च् स्यात् ऋदन्तौ जरसि स्मृतौ ।
जृष् झृष्च् अथ ओदन्ता दो छोंच च्छेदनार्थकौ ॥ १९५ ॥

अन्तकर्मणि षोंच स्यात् तक्षणे शोंच कान्तकः ।
शर्कीच मर्षणे चान्तः शुचृगैच् पूतितार्थकः ॥ १९६ ॥

जान्ता रञ्जींच् रागेषु युजिच् समाधौ सृजिच् विसर्गार्थः ।
डान्तो व्रीडच् व्रीडे तान्तौ वरणे वृतूचि स्यात् ॥ १९७ ॥

नृतैच नर्त्तने थान्तौ पूतिभावे कुथच् स्मृतः ।
पृथच् तु हिंसने दान्ताः खिर्दिच् दैन्ये पर्दिच् गतौ ॥ १९८ ॥

विर्दिच भुवि धान्ताः षट् गुधच् तु परिवेष्टने ।
व्यधंच ताडने राधंच् वृद्धौ ज्ञाने मतौ बुधिच् ॥ १९९ ॥

अनोरुधिच कामार्थः संप्रहारे युधिच वै ।
नान्ता जनैचि तु प्रादुर्भावेऽथ प्राणनेऽनिच ॥ २०० ॥

मनिंच् ज्ञानेऽथ पान्ताः स्युः पुष्पच् विकसनार्थकः ।
क्षिपंच प्रेरणे दीप्तौ दीपैचि स्याद् शपींच तु ॥ २०१ ॥

आक्रोशे वैश्वर्ये तर्पिच मान्तास्तिम ष्टिम ष्टीमच् ।
तीमच् तथाऽर्द्रभावे रान्ता घूरैङ् ज्वरैचि ॥ २०२ ॥

जरसि, गताविह धूरैङ् गूरैचि, स्तम्भने तु श्रूरैचि ।
तूरैचि तु त्वरायां घूराद्या हिंसनेऽपि स्युः ॥ २०३ ॥

वान्ता उतौ षिवूच श्रिवूच गतिशोषयोर्निरसने तु ।
स्यातां ष्ठिवू क्षिवूच् द्वौ शान्तास्तु लिर्शिच् अल्पत्वे ॥ २०४ ॥

काशिच् दीप्तौ वाशिच् शब्दे तापे क्लिर्शिच षान्तौ द्वौ ।
इषच गमने क्षमायां मृषींच सान्तास्त्रसैच् भये ॥ २०५ ॥

प्युसच दहने क्नसूच तु दीपनकौटिल्ययोः ष्णसूच इति ।
स्यान्निरसने त्रयेऽमी हान्ताः षह षुह च शक्त्यर्थौ ॥ २०६ ॥

बन्धे णहींच कथिताः षट्षष्टिरमी अथात्र पुंष्यादिः ।
षान्तः पुषंच पुष्टौ चान्तः स्यादुचच समवाये ॥ २०७ ॥

दान्तः क्लिदौच आर्द्रभावे ञिमिदाच् स्नेहनार्थः ।
ञिक्ष्विदाच् मोचने चाथ गात्रप्रक्षरणे ष्विदांच् ॥ २०८ ॥

धान्ताः सप्त श्रुधंच् शोचे क्रुधंच् कोपे क्षुधंच् तु ।
बुभुक्षायामृधूच् वृद्धौ निष्पत्त्यर्थे षिधूंच् वै ॥ २०९ ॥

गृधूच अभिकाङ्क्षायां रधौच पाकहिंसयोः ।
टन्तो लुटच् विलोटेऽथ नव पान्ताः कुपच् क्रुधि ॥ २१० ॥

गुपच व्याकुलतायां डिपच क्षेपे तृपौच सौहित्ये ।
युप रुप लुप च विमोहे दृपौच मुदगर्वयोरुदितः ॥ २११ ॥

ष्टुपच तु समुच्छ्रये भान्ता णभ तुभच हिंसने स्याताम् ।
गार्द्धये लुभच क्षुभच तु संचलने षट् तु शान्ताः स्युः ॥ २१२ ॥

कृशच तनुत्वे वृशच तु वरणे भ्रंशू भृशूच् अधः पतने ।
कृशच श्लेषेऽथ नशौच् अदर्शने षान्तका विभागे तु ॥ २१३ ॥

प्युषच् दुषंच वैकृत्ये ञितृषच तु तृषि, प्लुषूच दाहार्थे ।
तुष्टौ तुषं हृषच द्वौ शुषंच शोषे रुषंच रोषे ॥ २१४ ॥

आलिङ्गने श्लिषंच् स्यात् सान्ताः श्लेषे कुसच जसूच मोक्षे ।
प्युस पुसच विभागार्थौ यसूच् प्रयत्ने मसैच परिणामे ॥ २१५ ॥

विसच प्रेरणेऽसूच क्षेपणेऽथ तसू दसूच् ।
उपक्षयार्थौ स्तम्भे तु वसूच् मुसच खण्डने ॥ २१६ ॥

उत्सर्गे तु वुसच् मान्ता उपशान्तौ शमू दमूच् ।
भ्रमूंच अनवस्थाने क्षमौच सहने स्मृतः ॥ २१७ ॥

श्रमूच खेदतपसोः काङ्क्षायां तु तमूच् मतः ।
क्लमूच् ग्लानौ हि दान्तस्तु मदैच् हर्षेऽष्टकं शमाम् ॥ २१८ ॥

अक्लमूच् सप्तकं चैतत् हान्ता उद्गिरणे ष्णुहौच् ।
जिघांसायां द्रुहौच् प्रीतौ ष्णिहौच् मुहौच मोहने ॥ २१९ ॥

पूष्यादिः सप्तषष्ट्या वृत् स्वादिषूदन्तकं द्वयम् ।
षूङौच प्राणिप्रसवे परितापे तु दूङ्च ॥ २२० ॥

ईदन्ताः स्युर्मीङ्च हिसायां दींङ्च क्षये रीङ्च ।
श्रवणे लींङ्च श्लेषे डींङ्च गमने ह्यनादरे धींङच् ॥ २२१ ॥

वरणे व्रींङ्च ख्यातः सूयत्याद्या नवेत्यथ ।
द्विचत्वारिंशदधिकं शतं सर्वे दिवादयः ॥ २२२ ॥

इति सद्गुरुवाग्देवीप्रसादमासाद्य हर्षकुलविहिते ।
कविकल्पद्रुमनाम्नि ग्रन्थेऽभूत्पल्लवस्तुरीयोऽयम् ॥ २२३ ॥

## ॥ ५ ॥ स्वादिगण प्रकाशोः पञ्चमः पल्लवः

षुंग अभिषवे पूर्वमिदन्तो बन्धनार्थकः ।
षिगट् चिगट् तु चयने हिंट् वृद्धिगमनार्थयोः ॥ २२४ ॥

डुमिगट् प्रक्षेपणे स्यात् शिंगट् तनूकृतौ स्मृतः ।
उदन्तौ श्रवणे श्रुंट टुदुंट उपतापने ॥ २२५ ॥

ऊदन्तः कम्पने धूगट् ऋदन्ताः पञ्च कृंगट ।
हिंसायां वरणे वृगट् स्तृंगट् आच्छादनार्थकः ॥ २२६ ॥

पृंट् प्रीतौ स्मृंट् पालने च गान्तस्तिगट हिंसने ।
कान्तौ शक्लृंट शक्तौ स्यात्तिकट् तिगिव घान्तकौ ॥ २२७ ॥

ष्टिघिट् आस्कन्दने प्रोक्तः षघट् तिकिव धान्तकाः ।
राधं साधंट संसिद्धौ ऋधूट् वृद्धौ हि पान्तकौ ॥ २२८ ॥

तृपट प्रीणने व्याप्तौ त्वाप्लृंट अथ भान्तकः ।
दम्भूट् दम्भेऽथ वान्तौ द्वौ कृवुट् करणहिंसयोः ॥ २२९ ॥

धिवुट् गतावथो शान्तोऽशौटि व्याप्तो हि षान्तकः ।
प्रागल्भ्ये त्रिधृषाट् एकोनत्रिंशत्स्वादयो मताः ॥ २३० ॥

इति सद्गुरुवाग्देवीप्रसादमासाद्य हर्षकुलविहिते ।
कविकल्पद्रुमनाम्नि ग्रन्थेऽभूत्पल्लवोऽत्र पञ्चमकः ॥ २३१ ॥

## ॥ ६ ॥ तुदादिगणप्रकाशः षष्ठः पल्लवः ॥

तुंदीत व्यथने प्रोक्त इदन्ता रिंत् पिंत् गतौ ।
क्षित निवासे च धिंत् स्याद्धारणेऽथ ऋदन्तकाः ॥ २३२ ॥

मृंत प्राणत्यागे व्यायामे पृङ्त धृंङ्त तु स्थाने ।
दृंङत स्यादादरे ऊदन्तः प्रेरणे षूत ॥ २३३ ॥

ॠदन्तौ कृत स्याद्विक्षेपे गृत निगरणे खान्तः ।
लिखत तु वर्णन्यासे चान्ताः स्युस्त्वचत संवरणे ॥ २३४ ॥

जर्चत झर्चत परिभाषणे ऋचत संस्तुतावथ च्छेदे ।
ओव्रस्चौत छान्ताः षट् उछैद्विवासे विछत गमने ॥ २३५ ॥

मिछत स्यादुत्क्लेशे ज्ञीप्सायां तु प्रछंत् उछुत उञ्छे ।
करणप्रलये मूर्त्ते भावेऽपि ऋछन्मतो जान्ताः ॥ २३६ ॥

टुमस्जोंत तु शुद्ध्यर्थो जर्जत्तु परिभाषणे ।
सृजंत तु विसर्गार्थे धातुरुब्जत आर्जवे ॥ २३७ ॥

भुजोंत इति कौटिल्येऽथो ओलस्जैति ओलजैङ् ।
व्रीडार्थावोविजैति स्यात् साध्वसे कम्पनेऽपि च ॥ २३८ ॥

तथा रुजोंत भङ्गार्थः सङ्गे ष्वञ्जिंत संमतः ।
भ्रस्जींत् पाकेऽथ डान्ताः स्युः कडत् मदे जुडत् गतौ ॥ २३९ ॥

सुखने पृडत् मृडत द्वौ झान्तौ जर्झत्तु जर्जसम उद्झत ।
उत्सर्ग इह तु णान्ताः पुणत् शुभेऽथो मुणत्प्रतिज्ञाने ॥ २४० ॥

शब्दोपकरणयोश्च तु कुणत पृणत्प्रीणने मृणत हनने ।
द्रुणत कुटिलत्वगत्योश्च कुटिलतायां तुणत धातुः ॥ २४१ ॥

घूण घूर्णत् भ्रमणार्थावथ तान्तो ग्रन्थहिंसयोस्तु चृतैत् ।
धान्तो विधत विधाने नान्तौ जन शुनत गमन इह दान्तौ ॥ २४२ ॥

अवसादने तु षद्लृंत् णुदंत तु प्रेरणेऽथ पान्तौ द्वौ ।
स्पर्शे छुपंत् क्षिपींत तु णुदंतवन्नव तु फान्ताः स्युः ॥ २४३ ॥

ऋफ ऋंफत् हिंसायां रिफत युधादानयोश्च कथनेऽपि ।
दृफ दृम्फत उत्क्लेशे गुफ गुम्फत ग्रथनके स्याताम् ॥ २४४ ॥

तृफ तृम्फत तृप्त्यर्थौ भान्ताः षड् पूरणे तु उभ उम्भत ।
शुभ शुम्भत शोभार्थौ ग्रन्थे तु दृभैत् विमोहने तु लुभत ॥ २४५ ॥

रान्तास्तु कुरत शब्दे विलेखने क्षुरत खुरत तु च्छिदिव ।
संवेष्टने मुरत् स्यात् घुरत्तु भीमार्थशब्दयोः स्फुरत ॥ २४६ ॥

स्फुरणेऽग्रगतौ तु पुरत दीप्त्यैश्वर्यार्थयोः सुरत् लान्ताः ।
स्फुलत स्फुरवत् हिलत तु हावकृतौ सिल शिलत उञ्छे ॥ २४७ ॥

इलत क्षेपणगमनस्वप्नेषु चलत्तु विलसने किलत ।
श्वैत्यक्रीडनयोः स्यात्तिलत स्नेहे चिलत वसने ॥ २४८ ॥

विलत वरणे णिलत् स्याद्गहनेऽथ श्लेषणे मिलत्प्रोक्तः ।
भेदन इह बिलत भवेत् शान्तास्तु रुशं रिशंत हिंसायाम् ॥ २४९ ॥

गमने लिशंत विशंत प्रवेशनेऽथो मृशंत आमर्शे ।
अतिसर्जने दिशींत स्पृशंत संस्पर्श इह षान्ताः ॥ २५० ॥

मिषत स्पर्द्धेऽथ कृषींत् विलेखने स्यात् ऋषैत् गतौ इषत ।
इच्छायां प्रीतिनिषेवणयोस्तु जुषैति अथ हान्ताः ॥ २५१ ॥

तृहौ तृंहौ स्तृहौ स्तृंहौत् हिंसायामुद्यमे वृहौत् ।
एकादशाधिकमभूच्छतं चान्तौ तु मोक्षणे ॥ २५२ ॥

मुच्लृंती क्षरणे तु स्यात् षिचींत् पान्तौ लिपींत तु ।
उपदेहेऽथ लुप्लृंती च्छेदने दान्तकं द्वयम् ॥ २५३ ॥

विद्लृंती लाभार्थे परिघातार्थे खिदंत तान्तास्तु ।
छेदे कृतैत शान्तोऽवयवे तु पिशत मुचादिरष्टौ वृत् ॥ २५४ ॥

टान्तः कुटत कौटिल्ये उदन्तानि स्वरे कृंङत् ।
पुरीषोत्सर्जने गुंत ध्रुंत् गतिस्थैर्ययोर्मतः ॥ २५५ ॥

ऊदन्ताः कुङवत् कूङत् णूत् स्तवे धूत् विधूनने ।
जान्तः शब्दे गुजत् चान्तौ कुचत् सङ्कोचने स्मृतः ॥ २५६ ॥

व्यचत् व्याजीकृतौ टान्तास्त्रुट च्छुट चुटत् छिदि ।
प्रतिघाते घुटत् श्लेषे पुटत् विकसने स्फुटत् ॥ २५७ ॥

आक्षेपणमर्दनयोर्मुटत तुटत कलिकृतौ तथा ठान्तः ।
पुटसदृशो लुठत स्यादथ डान्ताः कृडत घसनार्थः ॥ २५८ ॥

बाल्ये च कुडत कथितो जुटत्तु बन्धेऽथ गुडत रक्षायाम् ।
स्थुड लुड थुडत्तु संवृत्यर्था उत्सर्जने तु वुडत ॥ २५९ ॥

तुड तोडने व्रुडत म्रुडत् सङ्घाते मज्जने तु दुड हुडत ।
त्रुड णान्तश्चुणत च्छिदि पान्तः क्षेपे डिपत रान्ताः ॥ २६० ॥

स्फुरत स्फुरणे स्फुलत व्रजे च चुणवत् छुरत् गुरैति कृतौ ।
ऊनचत्वारिंशत्तु कुटादिर्धूनषष्टिः शतमखिलाः ॥ २६१ ॥

इति सद्गुरुवाग्देवीप्रसादमासाद्य हर्षकुलविहिते ।
कविकल्पद्रुमनाम्नि ग्रन्थेऽभूत्पल्लवः षष्ठः ॥ २६२ ॥

## ॥ ७ ॥ रुधादिगणप्रकाशः सप्तमः पल्लवः ॥

अथ धान्तौ रुधृंपी आवरणे भासने ञिइन्धैपि ।
चान्ताः पञ्च वृचैप तु वरणे सम्पर्चने तु पृचैप् ॥ २६३ ॥

विचृंपी पार्थक्ये रिचृंपी स्याद्विरेचने तञ्चूप् ।
सङ्कोचनेऽथ दान्ताश्छिदृंपी स्याद् द्विधाकरणे ॥ २६४ ॥

क्षुदृंपी पेषे उच्छृदृंपी तु दीप्तिदेवनयोः ।
ऊतृदृंपी हिंसानादरयोर्दारणे तु भिदृपी ॥ २६५ ॥

ऊंदैप क्लेदन इह खिदिंप दैन्ये विचारणे तु विदिंप् ।
जान्ता अञ्जौप् व्यक्तिम्रक्षणगमनेष्वथो भञ्जोंप् ॥ २६६ ॥

आमर्दनेऽथ तञ्जौप् सङ्कोचन ओविजैप् भयचलने ।
अभ्यवहृतिपालनयोर्भुजंप यौगे तु युजृंपी ॥ २६७ ॥

सान्तो हिसुप प्रमये हान्तः स्यात्तद्वधेऽथ तृहप इति ।
षान्तो तु चूर्णनार्थे पिष्लृंप विशेषणे तु शिष्लृंप ॥ २६८ ॥

तान्तः कृतैप वेष्टन इति षट्विंशतिरभृद् रुधादिगणः ।
ग्राह्यः स्वयं परस्मैमुखो विभागोऽनुबन्धफलात् ॥ २६९ ॥

इति सद्गुरुवाग्देवीप्रसादमासाद्य हर्षकुलविहिते ।
कविकल्पद्रुमनाम्नि ग्रन्थेऽभूत्पल्लवोऽत्र सप्तमकः ॥ २७० ॥

## ॥ ८ ॥ तनादिगणप्रकाशोऽष्टमः पल्लवः ॥

नान्ताः समे तनूयी विस्तारे याचने वनूयि भवेत् ।
अवबोधने मनूयि क्षणूग् क्षिणूयी तु हिंसार्थौ ॥ २७१ ॥

दाने मतः षणूयी गमनार्थे संमतः किल ऋणूयी ।
अदनार्थे तु तृणूयी भासि घृणूयी नव तनाद्याः ॥ २७२ ॥

इति सद्गुरुवाग्देवीप्रसादमासाद्य हर्षकुलविहिते ।
कविकल्पद्रुमनाम्नि ग्रन्थेऽभूत्पल्लवोऽष्टमकः ॥ २७३ ॥

## ॥ ९ ॥ क्र्यादिगणप्रकाशो नवमः पल्लवः ॥

आदावीदन्ताः षट् डुक्रीगंश् द्रव्यविनिमये प्रींगश् ।
तृप्त्यभिलाषे श्रींगश् पाके मींगश तु हिंसायाम् ॥ २७४ ॥

व्रींश् वरणे भ्रींश् भरणे आदन्तो ज्ञांश बोधन इदन्तौ ।
क्षिषश् हिंसायां स्यात् षिगश बन्धेऽथ ऊदन्तौ ॥ २७५ ॥

कूगश शब्दे द्रुगश् हिंसायां द्वावुदन्तकौ स्कुंगश् ।
आप्रवणेऽथो युंगश बन्धे डान्तो मृडश सुखने ॥ २७६ ॥

ठान्तो हेठश् भूतप्रादुर्भावेऽथ दान्तमृदश् क्षोदे ।
थान्ता विलोडने स्यान्मन्थश् ग्रन्थश् तु भवति सन्दर्भार्थः ॥ २७७ ॥

प्रतिहर्षणमोचनयोः श्रन्थश् स्यात् कुन्थंश क्लेशे ।
धान्तौ बन्धे बन्धंश् इर्ह रोषे गुधश शान्तौ द्वौ ॥ २७८ ॥

बाधे क्लिशौश कथितोऽशश धातुर्भोजने त्रयो भान्ताः ।
णभ तुभश हिंसनार्थौ संचलने क्षुभश सप्त षान्ताः स्युः ॥ २७९ ॥

मुषश स्तेये इषश तु आभीक्ष्ण्ये कुषश निष्कर्षे ।
प्रुषयुग् प्लुषश स्नेहनसेचनयोः पूरणार्थौ च ॥ २८० ॥

विषश वियोगे पुषश तु पुष्टौ वान्तस्तु खवश हेठशवत् ।
सान्तौ ध्रसूश उञ्छे ऋदन्तको वृङश सम्भक्तौ ॥ २८१ ॥

हान्त उपादानार्थे ग्रहीश ऊदन्तकास्त्रयः पूगश् ।
पवने लूगश् छंदे स्याद् धूगश कम्पनेऽथ ईदन्ताः ॥ २८२ ॥

रींश गमनरोषणयोर्लींश स्यात् श्लेषणे गतौ ल्वींश ।
व्लींश तु वरणार्थः स्यादादन्तौ ज्यांश हान्यर्थः ॥ २८३ ॥

ऋदन्ताः कृ मृ शृश् हिंसायां नृश नये गतौ ।
ऋश जृश् वयोहानौ बृश् भरणे भृश भर्जने च भवेत् ॥ २८४ ॥

कृगश् हिंसायां स्यात् वृगश वरणे विदारणे दृश ।
पृश् पालनपूरणयोः स्तृगश आच्छादने प्रोक्तः ॥ २८५ ॥

गृश् शब्दे वृत् प्वादिर्द्वाविंशत्यैकहीनया ल्वादिः ।
धातुभिरन्ये तेऽष्टात्रिंशत् क्र्यादौ समेऽपि षष्टिः स्युः ॥ २८६ ॥

इति सद्गुरुवाग्देवीप्रसादमासाद्य हर्षकुलविहिते ।
कविकल्पद्रुमनाम्नि ग्रन्थेऽयमपूरि पल्लवो नवमः ॥ २८७ ॥

## ॥ १० ॥ चुरादिगणप्रकाशो दशमः पल्लवः ॥

चुरण स्तेय ऋदन्तो स्रवणे घृण पूरणे तु पृण कान्ताः ।
नक्कण धक्कण नाशे चुक्कण चक्कण उभौ व्यथने ॥ २८८ ॥

वल्क श्वल्कण कथने टकुण स्याद् बन्धनेऽर्कण स्तवने ।
हिष्किण किष्किण हनने निष्किण परिमाण इह चान्तौ ॥ २८९ ॥

पिच्चण तु कुट्टनार्थे विस्तारे पचुण जान्तास्तु ।
ऊर्जण् जीवनबलयोः स्याद् गज मार्जण निनादार्थौ ॥ २९० ॥

तिजण निशाने पूजण पूजायां क्षजुण कृच्छ्रजीवनके ।
व्रज वजण गतौ मार्गण संस्कारे रुजण हिंसायाम् ॥ २९१ ॥

तुजु पिजुण बले दाने निकेतने हिंसनेऽपि तर्जिण तु ।
तर्जन इह च च्छान्तो म्लेच्छण अव्यक्तगिरि टन्ताः ॥ २९२ ॥

तुट चुट चुटु छुटण स्युः छेदे कुट्टण कुत्सनार्थश्च ।
पुट्टयुत चुट्ट षुट्टण अल्पीभावे विभाजने तु वटुण् ॥ २९३ ॥

पुट मुटण चूर्णनार्थावऽट्ट स्मिटण स्मृतावपवज्ञायाम् ।
लुण्टण स्तेये चोक्तो नटण भ्रंशे स्निटण स्नेहे ॥ २९४ ॥

षट्ट स्फिटण प्रमंये कीटण स्याद्वर्णने रुटण रोषे ।
घट्टण चलने खट्टण संवरणे स्फुट्टण परिहासे ॥ २९५ ॥

त्रुटिण च्छेदे कूटिण भवेदप्रमादेऽथ ठान्तकाः शुठुण् ।
शोषार्थे गुठुण स्याद्वेष्टन इह शुठण आलस्ये ॥ २९६ ॥

शठिण श्लाघायां स्यात् शठ श्वठण श्वठुण संस्करणगत्योः ।
डान्ताः पीडण गहने ईडण् स्तवने चड्डुण कोपे ॥ २९७ ॥

ओलडुण क्षेपार्थे चुडुण च्छेदेऽथ भडुण कल्याणे ।
परिहासे स्फुडुण भवेदुपसेवायां लडण ख्यातः ॥ २९८ ॥

भेदे खड खडुण द्वौ कडुण स्यात्खण्डने च कुडुण इति ।
रक्षार्थे मडुण भवेद् भूषायां पिडुण सङ्घाते ॥ २९९ ॥

वेष्टनरक्षणयोः स्याद् गुडुण जुडण् प्रेरणे तडण घाते ।
णान्तास्तु चूण तूणण कूणिण संकोचने श्रणण् दाने ॥ ३०० ॥

जुडण इव चूर्ण वर्णण पूणण सङ्घातनेऽथ संपूर्त्तौः ।
तूणिण आशंसायां भ्रूणिण् तान्ताश्चितुण स्मृत्याम् ॥ ३०१ ॥

संवेदने चितिण स्यात् मुस्तृण पूणणसमस्तथा कृतण ।
संशब्दनेऽथ गमने स्वर्त्तण वै अर्दने वस्तिण् ॥ ३०२ ॥

पुस्तण बुस्तण तु द्वावनादरेऽप्यादरेऽथ थान्ताः स्युः ।
पथुण गतौ प्रतिहर्षे श्रथण प्रक्षेपणे तु पृथण ॥ ३०३ ॥

प्रथण प्रख्यानार्थे दान्ताः संचोदने चुदण धातुः ।
छर्दण वमने गुर्दण निकेतने च्छ्दण संवरणे ॥ ३०४ ॥

मिदुण स्नेहे धान्ताः संयमने वन्धयुग्वधण, वद्र्धण ।
छेदनपूरणयोः स्याद् हिंसायां बुधुण् अर्दने गन्धिण ॥ ३०५ ॥

गर्द्धण काङ्क्षे पान्ता डपु डिपु डपि डम्पि डिम्पि डिपिण स्युः ।
सङ्घाते छपुण गतौ क्षपुण क्षान्तौ डिपण क्षेपे ॥ ३०६ ॥

शूर्पण माने ह्लपण व्यक्तायां वाचि ननु समुच्छ्राये ।
ष्टूपण बान्ताः पुर्बण निकेतने छादने तु कुबुण ॥ ३०७ ॥

डबु डिबुण क्षेपार्थौ सम्बण संबन्धनेऽथ लुबु तुबुण ।
द्वावर्दनेऽथ शुल्बण सर्जनमानद्वये भान्तौ ॥ ३०८ ॥

डम्भि डिम्भिण सङ्घाते मान्ता आलोचने शमिण् ।
कुस्मिण् कुस्मयने ख्यातो वितर्के तु स्यमिण् भवेत् ॥ ३०९ ॥

यमण परिवेषणेऽथो यान्तो व्ययण क्षयेऽथ रान्ताः स्युः ।
कुद्रुण असत्यवचने श्वभ्रण् गमनेऽथ गूरिण स्यात् ॥ ३१० ॥

उद्योगे यत्रुण स्यात् संकोचे गुप्तभाषणे मन्त्रिण ।
तन्त्रिण कुटुम्बधारण इह लान्ता ललिण ईप्सायाम् ॥ ३११ ॥

कल किल पिलण क्षेपेऽथोत्क्षेपे दुलण तुलण उन्माने ।
बुलण निमज्जन इलण प्रेरण इह तलण तु प्रतिष्ठायाम् ॥ ३१२ ॥

पुलण समुच्छ्राये स्यात्तिलण स्नेहे क्षलण तु शोचार्थः ।
बिलण तु भेदे मूलण रोहण इह पलण रक्षार्थः ॥ ३१३ ॥

जलण अपवारणार्थे चलण भृतौ वान्त एक इह सान्त्वण ।
सामविधौ शान्ताः स्यूर्धूशण कान्तीकृतौ स्पशिण ॥ ३१४ ॥

ग्रहणश्लेषणयोः स्याद्दंशिण दशनेऽथ षान्तकाः प्युषण ।
उत्सर्गे श्लिषण समाश्लेषे लुषण तु हिंसायाम् ॥ ३१५ ॥

रुषण तु रोषे सान्ताः पुंसण् अभिमर्दने जस ब्रूस ।
पिसण च हिंसार्थाः स्युः पसुण विनाशेऽथ रक्षणे जसुण ॥ ३१६ ॥

भर्त्सिण तु तर्जनार्थे दंसिण दशनेऽपि दर्शने हान्तौ ।
बर्हण जसवत् ष्णिहण स्नेहे क्षान्ताः परिग्रहे पक्षण् ॥ ३१७ ॥

भक्षण अदने भ्रक्षण म्लेच्छे लक्षीण दर्शनाङ्कनयोः ।
यक्षिण पूजायां स्यात् त्र्यशीतिशतमित्यमी गदिताः ॥ ३१८ ॥

अथ लक्षिणपर्यन्ता अर्थविशेषे स्युरेष्वथादन्तः ।
ज्ञाण् मारणादिषु नियोजनेऽप्युदन्तौ तु सहने च्युण ॥ ३१९ ॥

युणि तु जुगुप्सायामथ ऊदन्तो भूण मिश्रण् ऋदन्तः ।
विज्ञाने गृणि भवेत्कान्ता आस्वादने तु रक लकण् द्वौ ॥ ३२० ॥

बुक्कण भषणे प्रोक्ता गान्ता रग लगण रकसमौ लिगुण ।
चित्रीकरणे चान्ताः प्रलम्भने वाञ्चिण मुचण तु ॥ ३२१ ॥

स्यान्मोचनेऽथ चर्चण अध्ययनेऽञ्चण विशेषण जान्तौ ।
अर्जण तु प्रतियत्ने भजण तु विश्राणने टान्ताः ॥ ३२२ ॥

घटण तु सङ्घातार्थे प्रतापने कुटिण चटयुतस्फूटण ।
भेदे हिंसार्था इह णान्तस्तु निमीलने कणण ॥ ३२३ ॥

तान्तो यतण निकारोपस्कारार्थद्वये निरः शुद्धौ ।
दान्तो विदिण निवासाख्यानार्थे चेतनेऽप्यथो षूदण ॥ ३२४ ॥

क्षरणेऽप्याङः क्रन्दण सातत्ये ष्वदण भवति आस्वादे ।
आङः सकर्मकोऽयं चुरादिकार्योऽथ मुदण संसर्गे ॥ ३२५ ॥

शब्दण स्यादुपसर्गाद्भाषाविष्कारयोर्मदिण तृप्तौ ।
धान्तः श्रृधण् प्रसहने नान्तः स्तम्भे मनिण् पान्तः ॥ ३२६ ॥

कृपण अवकल्कनार्थो भान्तः स्याज्जभुण नाशने मान्तः ।
रोगार्थेऽमण रान्तौ पूरण आप्यायनेऽथ चरण ॥ ३२७ ॥

निःशंसयेऽथ लान्ता विदारणे दलण बलि भलिण धातू ।
आभण्डनेऽथ वान्तौ दिविण् परे कूजनेऽथ दिवण् ॥ ३२८ ॥

पीडायां शान्तः स्यात् पशण तु बन्धेऽथ षान्तकाः पशवत् ।
पषण अथ शक्तिबन्धे वृषिण विशब्दे भवेद् घुषृण ॥ ३२९ ॥

आङ्पूर्वः क्रन्देऽसौ पुषण धृतौ भूषणे भवेद् भूषण ।
सान्ता ग्रसण ग्रहणे निवारणे त्रसण ताडने तु जसण् ॥ ३३० ।

कुत्सिण तु अवक्षेपे लसण तु शिल्पप्रयुञ्जने ख्यातः ।
भूषणवत् तसुण वसण् स्नेहच्छेदावहरणेषु ॥ ३३१ ॥

उत्क्षेपे ध्रसण भवेत् हान्तोऽर्हण् पूजनेऽथ कान्तौ द्वौ ।
लोकृयुततर्क घान्तौ रघु लघु चान्तस्तु लोचृ छान्तस्तु ॥ ३३२ ॥

विछ जान्ता अजु तुजु पिजु लजु लुजु भजु टान्तकाः पट पुटश्रित् ।
लुट घट घटु तान्ताः स्याद्वृत थान्तः पुथ अथो दान्तः ॥ ३३३ ॥

नद धान्तो वृध पान्ताः कुप धूप गुप त्रयोऽथ शान्तौ द्वौ ।
दशु कुशु सान्तास्त्रसु पिसु कुसु दसु वान्तस्तु चीव हान्तस्तु ॥ ३३४ ॥

वर्ह वृहु वल्ह अहु वहु महु सर्वेऽमी णितश्च भासार्थाः ।
क्षान्तौ मोक्षण असने लक्षिण आलोचने हिं षण्णवतिः ॥ ३३५ ॥

अथ दर्शयाम्यदन्तान् अङ्कण लक्षण इहाङ्गण पदे च ।
अन्वेषणे मृगणि वै सुख दुःखण तत्क्रियायां द्वौ ॥ ३३६ ॥

ब्लेष्कण तु दर्शनार्थेऽघण् पापकृतौ रचण् पुनर्यत्ने ।
सूचण पैशुन्यार्थे सभाजण प्रीतिसेवनयोः ॥ ३३७ ॥

भाजण पृथक्कृतौ स्यात्प्रकाशने लज लजुण् पुटण् सङ्गे ।
कूटण दाहे खोटण् क्षेपे पट वटण तु ग्रन्थे ॥ ३३८ ॥

खेटण अदनेऽथ वटुण विभाजने श्वठ शठण वचसि तथ्ये ।
दण्डण दण्डनिपाते तूणण् सङ्कोचने ख्यातः ॥ ३३९ ॥

वर्णण् विस्तृतिवर्णक्रियागुणाख्यासु गणण संख्याने ।
पर्णण तु हरितभावे व्रणण वपुश्चूर्णने भिदि तु कर्णण् ॥ ३४० ॥

कुण गुण केतण आमन्त्रणे गतौ वा पतण् तथा वातण् ।
सुखसेवनयोश्चार्थणि याञ्चायां कथण वाक्प्रबन्धार्थः ॥ ३४१ ॥

दौर्बल्ये श्रथण भवेच्छेदण द्वैधीकृतौ गदण गर्जे ।
पदणि गतौ स्याद् दृष्ट्युपसंहारेऽन्धण् स्तनण् गर्जे ॥ ३४२ ॥

ध्वनण निनादे स्तेनण् चौर्ये ऊनण् तु परिहाणे ।
दौर्बल्ये कृपण भवेत् रूपण् रूपक्रियायां वै ॥ ३४३ ॥

क्षप लाभण् प्रेरण इह भामण क्रोधेऽथ सान्त्वने सामण् ।
संग्रामणि संग्रामे गोमण् उपलेपने ख्यातः ॥ ३४४ ॥

स्तोमण् श्लाघायां स्यात् श्रामण आमन्त्रणे व्ययण ।
वित्तसमुत्सर्गार्थे आक्षेपे स्वरण भेदे तु ॥ ३४५ ॥

छिद्रण कर्मसमाप्तौ पारण तीरण च वरण ईप्सायाम् ।
क्रीडायां तु कुमारण् शैथिल्ये कत्र गात्रण् द्वौ ॥ ३४६ ॥

सूत्रण विमोचनार्थे चित्रण् चित्रक्रियाकदाचिद्दृष्ट्योः ।
मूत्रण प्रस्रवणे स्यान्मिश्रण संपर्चनेऽथ दुर्बलतायाम् ॥ ३४७ ॥

शारण विक्रान्तौ द्वौ शुरणि वीरणि च सत्रणि तु ।
संदानार्थे ख्यातः पल्यूलण् लवनपवनार्थः ॥ ३४८ ॥

उपधारणे तु शीलण् कलण तु संख्यानगमनयोः कालण् ।
वेलण् उपदेशार्थौ स्थूलणि परिवृंहणेऽथ गर्वणि तु ॥ ३४९ ॥

मानेऽथ विभजनेंऽशण् मृषण क्षान्तौ पषण् अनुपसर्गः ।
अन्वेषणे गवेषण् आस्वादस्नेहयोस्तु रसण् ॥ ३५० ॥

वासण उपसेवायां निवासण च्छादने रहुण् गमने ।
रहण त्यागे गृहणि ग्रहणेऽथो कल्कने चहण ॥ ३५१ ॥

विस्मापने तु कुहणि प्रेप्सायां स्पृहण महण पूजायाम् ।
रूक्षण पारुष्ये स्यादिति संपूर्णाश्चतुर्णवतिः ॥ ३५२ ॥

युजादिरुच्यते जान्तो युजण् संपर्चने मतः ।
ईदन्ता मीण् मतौ प्रीगण् तर्पणे लीण् द्रवीकृतौ ॥ ३५३ ॥

ऊदन्तः कम्पने धूगण् ऋदन्त आवृतौ वृगण् ।
ऋदन्तो जृण् वयोहानौ कान्तौ द्वौ चीक शीकण ॥ ३५४ ॥

आमर्षणार्थौ गान्तस्तु मार्गण् अन्वेषणार्थकः ।
चान्ता अर्चिण पूजायां पृचण् सम्पर्चनार्थकः ॥ ३५५ ॥

रिचण् वियोजनार्थे च प्रोक्तो वचण भाषणे ।
जान्तौ वृजैण् वर्जने च शौचालङ्कारयोर्मृजौण् ॥ ३५६ ॥

ठान्तः कठुण शोकार्थे थान्ताः कथण हिंसने ।
श्रथण् बन्धे च सन्दर्भे श्रन्थ ग्रन्थण दान्तकाः ॥ ३५७ ॥

छृदण् सन्दीपनेऽथार्दिण् हिंसायां भाषणे वदिण् ।
आङ्ः सदण् गतौ प्रोक्तश्छदण् तु अपवारणे ॥ ३५८ ॥

धान्तः शुन्धिण शुद्धौ नान्तौ द्वौ पूंजने तु मानण् स्यात् ।
श्रद्धाऽऽघाते तु तनूण् उपसर्गादेष दैर्घ्यार्थः ॥ ३५९ ॥

भान्तौ दृभैण भीतौ पान्ता आप्लृण तु लम्भनेऽथ तपिण् ।
दाहे तृपण प्रीणन इह सान्तो हिंसुण हिंसायाम् ॥ ३६० ॥

षान्ता मृषिण् तितिक्षायां जुषण् तु परितर्कणे ।
स्यादसर्वोपयोगे तु शिषण् अतिशये तु वेः ॥ ३६१ ॥

धृषण् प्रसहने रान्त ईरण् क्षेपेऽथ हान्तकौ ।
गर्हण् विनिन्दार्थः स्यात् मर्षणे तु षहण मतः ॥ ३६२ ॥

एवं पूर्णाश्चत्वारिंशद्रूपाधिका युजादिगणसर्वे ।
चतुःशती चतुरधिकाः स्युश्चुरादयो बहुलम् ॥ ३६३ ॥

अदन्ता अप्यनुक्ताः स्युस्तथा भ्वादिगणाष्टके ।
निवेशितास्ते सर्वेऽपि बहुलं स्युश्चुरादयः ॥ ३६४ ॥

अत्रैकाशीत्युत्तरनवशतसंयुक्सहस्र १९८१ संख्यांकाः ।
आर्यागीतिश्लोकैर्नवादिगणधातवो दृब्धाः ॥ ३६५ ॥

इति सद्गुरुवाग्देवीप्रसादमासाद्य हर्षकुलविहिते ।
कविकल्पद्रुमनाम्नि ग्रन्थेऽयमपूरि पल्लवो दशमः ॥ ३६६ ॥

## ॥ ११ ॥ सौत्रधातुप्रकाशनामैकादशः पल्लवः ॥

नवादिभ्योऽतिरिक्ता ये सूत्रेष्वेवोपलक्षिताः ।
सुखज्ञानार्थमुच्यन्ते केऽपि ते सौत्रधातवः ॥ ३६७ ॥

कण्डूग् गात्रविनामे महीङ वृद्ध्यर्च्ययोर्हृणीङ् रोषे ।
लज्जायामपि, मन्तु तु रोषार्थे वैमनस्येऽपि ॥ ३६८ ॥

असु मानसोपतापे वल्गु तु माधुर्यपूजयोः ख्यातः ।
वेङ् लाङ् , वेट्, लाट् धौर्त्येऽप्यस्वप्ने पूर्वभावेऽपि ॥ ३६९ ॥

अल्पार्थकुत्सयोर्लिट् लोट् दीप्तौ इरज इरस ईर्ष्यार्थौ ।
भिष्णज उपसेवायां भिषज् चिकित्सार्थ उरस ऐश्वर्ये ॥ ३७० ॥

नन्द समृद्धौ कुषुभ क्षेपे संभूयस प्रभूतार्थे ।
इयसेससौ तु धातू ईर्ष्यायां पुष्प सन्तोषे ॥ ३७१ ॥

उषस प्रभातवाच्ये रेषा चित्रेऽथ पर्यसिति प्रसवे ।
वेला समयार्थे स्याच्चतरण गतावगद तन्त्रार्थः ॥ ३७२ ॥

तिरस तरण प्रसिद्धौ ठुवस तु परितापपरिचरणयोः स्यात् ।
कुसुभ क्षेपेऽथैला केला खेला विलासार्थाः ॥ ३७३ ॥

मेधा आशुग्रहणे मगध तु परिवेष्टने समर युद्धे ।
सुख दुःख तत्क्रियायां विख्यातौ भुरण पुरण गतौ ॥ ३७४ ॥

भरण तु धारणपोषणयुद्धेष्वथ चुरण चौर्यचेतनयोः ।
इषध शरधारणार्थे तन्तस पम्पस तु दुःखार्थौ ॥ ३७५ ॥

गद्गद् वाक्यस्खलने त्वरार्थकस्तुरण सपर पूजायाम् ।
पञ्चाशदमी कण्ड्वादयः परेऽनर्थका नोक्ताः ॥ ३७६ ॥

क्रियावाचित्वमाख्यातुं प्रसिद्धोऽर्थः प्रदर्शितः ।
प्रयोगतोऽनुमन्तव्या अनेकार्था हि धातवः ॥ ३७७ ॥

परे स्तम्भादयः सौत्रा गव्याद्या नामधातवः ।
चुलुम्पप्रमुखा वाक्यकरणीया अनेकशः ॥ ३७८ ॥

लौकिकाः क्लविमुख्याश्च परोक्ता अपि केचन ।
अनेकार्थाः स्मृतास्तेषां दर्शनं तु निदर्शनम् ॥ ३७९ ॥

ज्ञेयाः स्वयं यथादृष्टमत्र न्यूनाधिकं च यत् ।
तुल्यचित्तैः सुधीभिस्तच्छोध्यं मयि कृपालुभिः ॥ ३८० ॥

द्वात्रिंशदधिकधातुद्विसहस्रीपत्रपूरितः श्रयताम् ।
कविकल्पतरुर्भूयादेकादशपल्लवः फलदः ॥ ३८१ ॥

इति सद्गुरुवाग्देवीप्रसादमासाद्य हर्षकुलविहिते ।
कविकल्पद्रुमनाम्नि ग्रन्थेऽभूत्पल्लवोऽत्र दशमपरः ॥ ३८२ ॥

तत्संपूर्त्तौ स संपूर्णोऽयमेकादशपल्लवी ग्रन्थः ।
कविकल्पद्रुमनामा यथेप्सितफलदः पाठकानाम् ॥ ३८३ ॥

# ॥ श्रीकातन्त्र ( सारस्वत ) विभ्रमसूत्रम् ॥

कस्य धातोस्तिबादीनामेकस्मिन्, प्रत्यये स्फुटम् ।
परस्परविरुद्धानि, रूपाणि स्युस्त्रयोदश ? ॥ १ ॥

अग्निभ्यः पार्थिवेभ्यश्च, प्रथमान्तं पदद्वयम् ।
एषेति नैतदाबन्तं, श्वानस्येति च साधुता ॥ २ ॥

भवेतामिति शब्दोऽयं, बहुत्वे वर्त्तते कथम् ? ।
यागः षष्ठीसमासः स्यात्, पञ्चमी पर्वतात् न तु ॥ ३ ॥

पंचङ्गुलानि साधुत्वं, कथं याति च लक्षणात् ।
मुनीनामिति नो षष्ठी, त्याद्यन्तं चाश्व इत्यपि ॥ ४ ॥

अष्टाविति कथं द्वित्वं, राजेभ्य इति साधुता ।
तेनेत्येतत्त्याद्यन्तं स्यादत्याद्यन्तं भवेदिति ॥ ५ ॥

हस्तौ द्विवचनं नेदं, शोभनेष्वित्यसप्तमी ।
क्षीरस्येति न षष्ठीयं, त्याद्यन्तं वायुरित्यपि ॥ ६ ॥

दधिस्येति कथं साधु, मधुस्येति तथा परम् ।
केनेत्येतदत्यन्तं स्यादपापा इत्यसुप्तता ॥ ७ ॥

एतेषां कथमेकत्वं, वनानि ब्राह्मणैरमी ।
वृक्षाः पचन्ति येषां यान्, वायुभ्यः पार्थिवाः सुराः ॥ ८ ॥

शेषाणि पूर्वाणि समान्यजानां, फलानि मूलानि हलान्यगूनाम् ।
अभ्राणि नीलानि दलान्यतस्यः, शूलानि कूलानि तटान्यपापाः ॥ ९ ॥

सुखानि शीलानि नखान्यसास्नाः, खलानि पापानि बलान्यचर्च्चाः ।
पुराणि वर्षाणि मठान्यमीनाः, घनानि सर्वाणि बिलान्यपां च ॥ १० ॥

अधीये नोपसृष्टस्य, शक्यतीत्यस्य साधुता ।
जागर्त्तीति न जागर्त्तेरुच्यतीति च साधुता ॥ ११ ॥

अस्यन्निति न शत्रन्तं, व्याघ्रा इत्यस्य चैकधा।
बहुत्वं च तथैतेषामसुर्मेषारुरेव च ॥ १२ ॥

एतानि न स्याद्यन्तानि, यस्य तस्याश्वमस्य च।
शेलुर्बिभीतको वेणुः, पञ्चेते स्म ऋणानि च ॥ १३ ॥

एकस्य कस्य धातोः स्यात्त्यादौ रूपचतुष्टयम्।
पर्वाणि पर्वतं पर्व पर्वतोऽपूर्वमेव च ॥ १४ ॥

अशोकोऽनौस्तथा वाताद्श्रीणामरुणोऽवनम्।
वनानि स्वोऽखिलं यानि, शुभानि च रणानि च ॥ १५ ॥

सास्नाया अकृशोऽताता, अमर्मा अवटोऽनृणाम्।
रेफ वेष रवेऽपेपेरदोधूर्तानिलः कुतः ॥ १६ ॥

अरये नभसे पयसे वयसे लोके नसे गवे वृक्षे।
अहयोऽकवेऽयसे लेखे रेखे रजसि रेजेऽलिट् ॥ १७ ॥

अद्यौर्न नञ्समासोऽयं, सर्वेषामिति चैकता।
अन्येषामपरेषां च, केषां कासां तथा दश ॥ १८ ॥

अगारं द्वे पदे स्यातां, प्रथमान्तं शुनस्तथा।
कर्तृरूपे कथं स्यातां, दीयते धीयते तथा ? ॥ १९ ॥

त्याद्यन्तमालयं प्रोक्तमसमस्तमजापयः।
अन्यान्योऽनालयश्चैव, ह्यश्वालयमशालयः ॥ २० ॥

अव्याधयोऽसमस्तं स्यात्, येयेषांचक्रिरे पदम्।
अक्षेपयस्तथा चान्यदक्षेवयममीवयम् ॥ २१ ॥

पण्डितप्रकाण्ड-उदयधर्मगणिविरचितः

# ॥ वाक्यप्रकाशः ॥

प्रणम्यात्मविदं विद्या,-गुरुं श्रीदेववर्धनम् ।
मुग्धबुद्धिप्रबोधार्थ,-मुक्तियुक्तिः प्रतन्यते ॥ १ ॥

द्विधोक्तिः प्रध्वरा वक्रा, प्रध्वरा कर्तरि स्मृता ।
वक्रा कर्मणि भावे च, धातोः साप्यादनाप्यतः ॥ २ ॥

कर्त्तरि प्रथमा तत्र, प्रध्वरोक्तौ क्रिया पुनः ।
कर्त्रपेक्षार्थवचना, धात्वपेक्षपदद्वया ॥ ३ ॥

कर्मोक्तौ प्रथमा कर्म-ण्युक्तत्वात् प्रत्ययादिभिः ।
तृतीया कर्त्तरीत्यादि-प्रत्ययाद्यं तु कर्मजम् ॥ ४ ॥

कालेऽतीते प्राकृतोक्तौ, न भेदः कर्तृकर्मणोः ।
यथा जिनोऽवदद्धर्मं, धर्मोऽवादि जिनेन वा ॥ ५ ॥

तृतीयान्तो भवेत्कर्त्ता, भावोक्तौ कर्म नो भवेत् ।
अन्यार्थस्याऽऽद्यवचनं, क्रियायामात्मनेपदम् ॥ ६ ॥

सुकृतं सुखानि सूते, ददाति दुःखानि मेदुरं दुरितम् ।
पाल्यन्ते पुण्यवता, पीड्यन्ते प्राणिनः पापैः ॥ ७ ॥

तैः स्थीयते सुखं यैर्न, भूयते रागरोषरतचित्तैः ।
उक्तिप्रयोग एवं, क्रमेण कर्त्राप्यभावेषु ॥ ८ ॥

यत्र कर्मैव कर्तृत्वं, याति कर्त्ता तु नोच्यते ।
ञिक्यात्मनेपदं धातो,-र्युक्तिः सा कर्मकर्तरि ॥ ९ ॥

सुखि भणाइ ए ग्रन्थु ग्रन्थोऽयं भण्यते सुखम् ।
आपणी कणवीकाइं, विक्रीयन्ते कणाः स्वयम् ॥ १० ॥

भगवन् तुम्हे वंदाओ, आपणी आपणे गुणे ।
भगवन्तः स्वयं यूयं, वन्दध्वे निजकैर्गुणैः ॥ ११ ॥

आपणी अम्हे पूजाओ, वयं पूज्यामहे स्वयम् ।
पचाणु आपणी कूर, अपाचि स्वयमोदनः ॥ १२ ॥

मंडाइ आपणी कन्या, कन्याऽलङ्कुरुते स्वयम् ।
रचाइ आपणी ग्रन्थु, ग्रन्थोयं ग्रथ्यते स्वयम् ॥ १३ ॥

यत्र स्वस्य प्रसिद्धस्य, क्रियया ज्ञाप्यते क्रिया ।
परेषामप्रसिद्धानां, सोक्तिः स्याद्भावलक्षणा ॥ १४ ॥

कर्त्तरि कर्मणि भावे, त्रिविधं तद्भावलक्षणं तत्र ।
साप्यानाप्यकधातु,-प्रयोगतः कर्तरि द्विविधम् ॥ १५ ॥

अमुकइं अमुकउं करतइ, अमुकइ होइतइ ति प्रयोगि यथा ।
सूर्येऽभ्युदयं गच्छति, कजेषु विकसत्सु रात्रिरगात् ॥ १६ ॥

याते शत्रुञ्जयं तीर्थं, नतवत्यादिमं जिनम् ।
प्रणेमुषि गुरून् भक्त्या, चक्राणे विनयक्रियाम् ॥ १७ ॥

कुर्वति प्राणिषु कृपां, तन्वाने शासनोन्नतिम् ।
पात्राय दायके श्रीणां, शीलरत्नस्य धर्तरि ॥ १८ ॥

शुश्रूषते च सिद्धान्तं, जिघांसावान्तरानरीन् ।
प्राप्तुकामे परानन्दं, त्वयि मित्र ! मुदो मम ॥ १९ ॥

अमुकइं इसितइं करितइं होइतइं, कर्मभावयोश्च यथा ।
रविणा क्रियमाणेऽहन्यु,-दीयमाने च याति तमः ॥ २० ॥

मया गृहीते चारित्रे, क्रियमाणे तपोभरे ।
जिनागमे च पेठाने, मित्र ! ते मोदते मनः ॥ २१ ॥

नृत्ते सुरीभिर्गन्धर्वै,-र्गीयमाने श्रवःसुखम् ।
जिनेनासनि तस्थाने, प्रमोदः पर्षदो भवेत् ॥ २२ ॥

सर्वस्मिन् कारकेऽनुक्ते, यथार्हं सूत्रभाषिताः ।
विभक्तयो द्वितीयाद्या, उक्ते तु प्रथमा भवेत् ॥ २३ ॥

उक्तं कृत्तद्धित-त्यादि,-समासैः कारकादिकम् ।
तद्विभक्त्यप्रयोगत्वात्, प्रथमा नाममात्रतः ॥ २४ ॥

जिनो जयति जैनेन, क्रियते प्राणिनां दया ।
स्नानीयं स्नात्यनेनेति, दानीयोऽस्मै तु दीयते ॥ २५ ॥

बिभेत्यस्मादसौ भीम,-स्त्वस्मिन्नास्यत आसनम् ।
गोमान् सन्त्यस्य गावो हि, ज्ञेयान्युक्तान्यमून्यहो ॥ २६ ॥

शत्रानशशानातृश्क्वसुकानक्तवतुणकतृचस्तृन् च ।
कर्त्तर्येते क्तोऽपि च, गत्यर्थाऽकर्मकादिभ्यः ॥ २७ ॥

कर्मणि साप्याद्धातो,-रकर्मकादात्मनेपदं भावे ।
कृत्यक्तखलर्थयुक्तं, क्त्वातुममाद्याः पुनर्भावे ॥ २८ ॥

करतु भणतु एवं, तकारो यत्र दृश्यते ।
तत्र शत्रानशौ ज्ञेयौ, तुल्यकालक्रियाग्रतः ॥ २९ ॥

तत्कर्तरि विभक्तिर्या, लिङ्गं यद्वचनं च यत् ।
विभक्तिलिङ्गवचना,-न्येतान्येव तयोः पुरः ॥ ३० ॥

यथा भक्तिं गुरोः कुर्वन्, शिष्यो दक्षोऽत्र जायते ।
कुर्वाणान् विनयं शिष्यान्, पाठयेद् गुरुरादरात् ॥ ३१ ॥

शिष्याः पठन्तः सिद्धान्तं, भवन्ति भुवि विश्रुताः ।
शिष्यान् विद्यामधीयानान्, शृण्वन्ति गुरवो मुदा ॥ ३२ ॥

शत्रानशो वर्त्तमाने, सस्यौ चेतौ भविष्यति ।
क्वसुकानौ परोक्षावत्, साध्यौ काले परोक्षके ॥ ३३ ॥

शोभते विनयं कुर्वन्, ददानो दानमास्तिकः ।
दिवं यास्यन् शिवं गास्य,-मानो वा संयमं श्रयेत् ॥ ३४ ॥

विनयं चकृवान् भाति, चक्राणो धर्ममाहितः ।
पेठानं साधुभिः शास्त्रं, न शयानं कदापि तैः ॥ ३५ ॥

करीतुं दीजतुं एव,-मादौ यत्रेतईजतौ ।
यजमान इति तत्रानश् तृतीया चास्य कर्त्तरि ॥ ३६ ॥

तद्व्याप्ये यद्विभक्त्याद्यं, तदानश्यपि तद्यथा ।
विनयः क्रियमाणोऽस्ति, दीयमाने धने बुधैः ॥ ३७ ॥

शानातृशौ वर्त्तमाने, शृण्वानोऽर्थमघं द्विषन् ।
तीते क्तक्तवतू, तीर्थं गतः पूजितवान् जिनम् ॥ ३८ ॥

देणहारलेणहारे-त्यर्थे णकतृचौ तयोः ।
कर्त्तरीव विभक्त्याद्यं, षष्ठी त्वाप्ये तदीयके ॥ ३९ ॥

ज्ञानस्य दायकाः श्रीणां, दातारः सन्ति सज्जनाः ।
लायकान् परदोषाणां, धिग्लातृंश्च परश्रियाम् ॥ ४० ॥

करिवुं रहिवुं देवुं, इत्यादौ कृत्यप्रत्ययाः ।
कार्यं स्थानीयमेतव्यं, देयं कृत्यं तव त्वया ॥ ४१ ॥

दयाधर्मः श्रितो यैस्तै,-र्जातुचिन्न स्थितं वधे ।
सुज्ञानं सुकरं तत्त्वं, तैर्यैरीषल्लभं शुभम् ॥ ४२ ॥

करीले इत्यादिवाक्ये,-ष्वीकारो यत्र जल्प्यते ।
तत्र पूर्वक्रियायां क्त्वा, द्वितीया चास्य कर्मणि ॥ ४३ ॥

स्नात्र करी जिन पूजई-स्नात्रं कृत्वा जिनं स पूजयति ।
धन लेइ घरि पइसई,-धनानि लात्वा गृहं प्रविशति ॥ ४४ ॥

करिवा भणिवेत्यादौ, यत्र वाकार उच्यते ।
तत्रोत्तरक्रियाग्रे तुम्, तद्व्याप्ये च द्वितीयिका ॥ ४५ ॥

घर करिवा धन मागई, गृहाणि कर्तुं धनानि मार्गयति ।
थुइ भणिवा गुरु सेवइ, स्तुतिमध्येतुं गुरुं भजति ॥ ४६ ॥

ईकारे सत्यपि ज्ञाशक्, धात्वर्थो यत्र योज्यते ।
तुमेव तत्र विज्ञेयो, न तु क्त्वा प्रत्ययो भवेत् ॥ ४७ ॥

एउ दान देई जांणइ, अनइ तपकरी सकई ।
दानं दातुमयं वेत्ति, तपः कर्तुं च शक्नुयात् ॥ ४८ ॥

भाजणुं काठ इत्यादौ, प्रत्ययौ घुरकेलिमौ ।
भङ्गुरं भिदुरं काष्ठं, केदाराश्च पचेलिमाः ॥ ४९ ॥

यत्र प्रयोक्तृव्यापारे, वकारो वाक्यमध्यगः ।
तत्र णिग्प्रत्ययो यद्वच्, छात्रान् भाणयते गुरुः ॥ ५० ॥

करिवा वांछइ भणिवा इछइ, इत्येवमादिषु स्यात् सन् ।
साधुश्चिकीर्षति तपः, श्रीसिद्धान्तं च बिभणिषति ॥ ५१ ॥

भृशादौ कुटिले गर्ह्ये, यङि चेक्रीयतादयः ।
चेक्रीयते चङ्क्रम्यते, निजेगिल्यते इत्यपि ॥ ५२ ॥

शुद्धाऽशुद्धा क्रिया द्वेधा, शुद्धा त्याद्यन्तधातुजा ।
अशुद्धा कृत्प्रत्ययान्ता, ते तु शत्रानशादयः ॥ ५३ ॥

त्रिधा धातुरकर्मा च, द्विकर्मा चैककर्मकः ।
तत्राऽकर्मा द्विधा नित्या,-कर्माऽविवक्षिताप्यकः ॥ ५४ ॥

स नित्याऽकर्मको यस्य, कर्म नैवास्ति मूलतः ।
लज्जते विद्यते तिष्ठत्येष जागर्ति वर्धते ॥ ५५ ॥

लज्जासत्तास्थितिजागरणं, वृद्धिक्षयभयजीवितमरणम् ।
शयनक्रीडारुचिदीप्त्यर्था, धातव एते कर्मविमुक्ताः ॥ ५६ ॥

विवक्षितं न यत्कर्म, सोऽविवक्षितकर्मकः ।
यथा करोत्यधीतेऽसौ, क्रियतेऽधीयतेऽमुना ॥ ५७ ॥

उपसर्गाद्विपर्यस्येत्, सकर्माऽकर्मता क्वचित् ।
यथोद्गच्छति मार्त्तण्डः पराभवति तामसान् ॥ ५८ ॥

सोपसर्गोऽन्यार्थवृत्ति,-रन्तर्भूतक्रियान्तरः ।
णिगन्तोऽन्तर्णिगर्थो वा, पञ्चोपायैः सकर्मकः ॥ ५९ ॥

धातोरर्थान्तरे वृत्ते,-र्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः, कर्मणोऽकर्मिका क्रिया ॥ ६० ॥

धातोरर्थपरावर्त्तोऽप्युपसर्गात् क्वचिद्भवेत् ।
विहाराहारनीहार,-प्रतीहारप्रहारवत् ॥ ६१ ॥

नीह्वहिकृषोण्यन्ता दुहि ब्रूप्रच्छिभिक्षिचिरुधिशास्वर्थाः ।
पचि-याचि-दण्डि कृ-ग्रहमथि-जिप्रमुखा द्विकर्माणः ॥ ६२ ॥

उभयोः कर्मणोर्न्यादि प्रधानेतरतो यथा ।
आरभ्यते क्रिया यस्मै तद्दुग्धाद्यं प्रधानकम् ॥ ६३ ॥

तत्सिद्ध्यै क्रियया यत्तु, व्याप्यतेऽन्यद् गवादिकम् ।
तदप्रधानं गौणाख्यं, गोपालो दोग्धि गां पयः ॥ ६४ ॥

यदा पयोऽर्था कर्त्रादेः, प्रवृत्तिरविवक्षिता ।
तदा मुख्यासन्निधानाद्, गवादेरेव मुख्यता ॥ ६५ ॥

गौणं कर्म दुहादीनां, प्रत्ययो वक्ति कर्मजः ।
गौः पयो दुह्यतेऽनेन, शिष्योऽर्थं गुरुणोच्यते ॥ ६६ ॥

न्यादीनां कर्मणो मुख्यं, स्वोक्तत्वं प्रत्ययाद् यथा ।
नीयते गौर्द्विजैर्ग्रामं, भारो ग्राममथोह्यते ॥ ६७ ॥

गत्यर्थाकर्मका ण्यन्ता, कर्तृकर्मोक्ततांजुषः ।
चैत्रेण गम्यते मैत्रो, ग्रामं मासमथास्यते ॥ ६८ ॥

बोधाहारार्थशब्दाप्य,-धातौ ण्यन्ते द्वयोक्तता ।
यथाऽर्थं बोध्यते शिष्यो, गुरुणाऽर्थोऽथ शिष्यकम् ॥ ६९ ॥

ओदनं भोज्यते पुत्रो, मात्रा पुत्रमथौदनः ।
पाठ्यते गुरुणा ग्रन्थं, शिष्यो ग्रन्थोऽथ शिष्यकम् ॥ ७० ॥

कर्मादीनां त्यादिनेवोक्तता कृत्यादिभिर्यथा ।
गम्या मैत्रेण गौर्ग्रामं, गम्यो ग्रामोऽथ तेन गाम् ॥ ७१ ॥

द्वैकर्म्यहेतुरहिते, णिगन्तधातौ द्विकर्तृता तत्र ।
उक्तः प्रयोजकः स्यात्, कर्त्ताऽनुक्तः प्रयोज्यस्तु ॥ ७२ ॥

जनेन पाचयित्वाऽन्नं, भक्षयत्यङ्गजैः पिता ।
जाप्यन्तेऽन्तर्द्विषस्तीर्थ,-कृता भव्यजनव्रजैः ॥ ७३ ॥

गणजा नामजाः सौत्रा, धातवस्त्रिविधाः स्मृताः ।
भ्वाद्यादिनवकोक्ता ये, गणजास्ते प्रकीर्त्तिताः ॥ ७४ ॥

अदादयः कानुबन्धा,-श्चानुबन्धा दिवादयः ।
स्वादयष्टानुबन्धाश्च, तानुबन्धास्तुदादयः ॥ ७५ ॥

रुधादयः पानुबन्धाः यानुबन्धास्तनादयः ।
क्र्यादयः शानुबन्धाः स्यु,-र्णानुबन्धाश्चुरादयः ॥ ७६ ॥

कचटतपयशणवर्णानुबन्धवर्जा, भवन्ति च भ्वाद्याः ।
उपलक्षणमिति तेषां, भ्वादिकगणनवकंधातूनाम् ॥ ७७ ॥

काम्यक्यन्णिज्युतान्तानि, क्विप्क्यङन्तानि यानि च ।
तानि नामानि धातुत्वं, यान्ति ते नामधातवः ॥ ७८ ॥

इच्छायां मुख्यादाचारे, कर्माधारोपमानतः ।
काम्यः क्यन् च द्वितीयान्ताद्, णिजप्यस्मात् कृगादिषु ॥ ७९ ॥

पुत्रीकाम्यति पुत्राढ्यः, पुत्रीयति सुतायुतः ।
गुरुर्मठेऽपि सौधीयन्, प्राज्ञं शिष्यं सुतीयति ॥ ८० ॥

प्रासुकमन्त्रं कृतयति, धर्मयति श्रोतृषूपविष्टेषु ।
शिष्यान् दक्षयति गुरु,-र्भव्येषु च बोधिबीजयति ॥ ८१ ॥

कर्त्रुपमानादाचारे, क्विप्क्यङौ प्रथमान्ततः ।
मुनिर्मेरवति स्थैर्यात्, तपोभिस्तपनायते ॥ ८२ ॥

च्व्यर्थाद्यर्थविशेषेऽपि, क्यङ् भृशायत आदिषु ।
अभूतपूर्वात् कृभ्वस्ति,-योगे च्विः कर्मकर्तृतः ॥ ८३ ॥

विमलीकुरुते विश्वं, यशस्तस्य पटूभवेत् ।
अमृतीस्याद्विश्वमपि, पुण्यं यस्य विजृम्भते ॥ ८४ ॥

सौत्राः कण्ड्वादयोऽन्दोलण्, प्रेङ्खोलणप्रमुखा अपि ।
आत्मोभयपरपदा,-दथवा धातवस्त्रिधा ॥ ८५ ॥

ङनुबन्ध इदनुबन्धः, कर्त्तर्यप्यात्मनेपदी धातुः ।
ईगनुबन्धस्तूभयपदी, परस्मैपदी शेषः ॥ ८६ ॥

सर्वेभ्योऽपि हि धातुभ्यो, दश त्यादिविभक्तयः ।
वर्त्तमाना सप्तम्याद्याः, स्युराख्यातप्रकीर्तिताः ॥ ८७ ॥

तत्रादिमाश्चतस्त्रः स्युः, शित्संज्ञा अशितः पराः ।
प्रत्येकं वचनान्यष्टा,-दश सर्वासु तास्वपि ॥ ८८ ॥

दशानामपि पूर्वाणि, वचनानि नवैव हि ।
परस्मैपदसंज्ञानि, प्रत्ययौ च शतृक्वसू ॥ ८९ ॥

वचनानि नवान्त्यानि, कानानशौ च प्रत्ययौ ।
आत्मनेपदमेते च, योज्येते धात्वपेक्षया ॥ ९० ॥

वर्त्तमाने वर्त्तमाना, विधिमार्गे च सप्तमी ।
क्रियाऽऽदेशे पञ्चमी च, कालेऽतीतेऽग्रगं त्रयम् ॥ ९१ ॥

स्मयोगे वर्तमानाऽपि, आशिष्याशीः सपञ्चमी ।
भाविकाले चाग्रिमे द्वे, क्रियापाते तथाऽन्तिमा ॥ ९२ ॥

नदी वहति तिष्ठन्ति, शैलाः पाति नृपः प्रजाः ।
दानं दद्यात् तपः कुर्यात् पालयेच्छीलमार्हतः ॥ ९३ ॥

वत्सागच्छास्स्व सिद्धान्तं, शृणु संवृणु मानसम् ।
शृणोतु साधुवर्गोऽयं, स्वाध्यायं करवाण्यहम् ॥ ९४ ॥

जिनोऽर्थमवदत्सूत्र,-मकार्षुर्गणधारिणः ।
प्रससार च सिद्धान्त,-स्तं पठन्ति स्म साधवः ॥ ९५ ॥

धर्मो जीयाच्छिवं भूयाद्, भूयासुः सुखिनोऽङ्गिनः ।
पापानि प्रलयं यान्तु, चिरं जीवन्तु सज्जनाः ॥ ९६ ॥

पठितासि यदा वेदान्, भविष्यसि तदा भवे ।
सिद्धान्तम्प्रभणिष्यश्चे,-दगमिष्यस्तदा शिवम् ॥ ९७ ॥

भविष्यत्काले माङ्योगेऽद्यतनी मा भवं भ्रमीः ।
ह्यस्तन्यपि स्मसहिते, मा स्म पश्यद् द्विषो भवान् ॥ ९८ ॥

आक्षेपपूर्वमाक्रोशे, तत्र शत्रानशावपि ।
मा पश्यन् दोषदर्शीयो, मा ब्रुवाणोऽन्यदोषवाक् ॥ ९९ ॥

वर्त्तमाना पुरा यावत्, कदा कर्हि प्रयोगतः ।
किंवृत्ते चापि लिप्सायां, भिक्षां कोऽत्र ददाति च ॥ १०० ॥

अतीतेऽपि भविष्यन्ती, स्मृत्यर्थोपपदेऽयदि ।
साधो ! स्मरसि सिद्धाद्रिं, यास्यावो गुरुभिः सह ॥ १०१ ॥

धातुभ्यः शव् शितिप्रायः, कर्तरि श्यो दिवादितः ।
स्वादिभ्यः श्नुस्तुदादेः शः, श्नो रुधादेः स्वरात्परः ॥ १०२ ॥

उस्तनादेश्चुरादेर्णिच्, क्र्यादेः श्नाप्रत्ययो भवेत् ।
अदादिभ्यो न कोऽप्येषु, क्यस्त्वेभ्यो भावकर्मणोः ॥ १०३ ॥

तिः सिर्मिर्वर्तमानाया,-स्त्वान्याव्रामास्तथा च ऐः ।
आवहै आमहै ज्ञेया, दिस्यमो गुणिनस्तथा ॥ १०४ ॥

अन्यार्थश्चास्मदर्थश्च, णव् गुणी थव् क्वचिद् ध्वमौ ।
सिजाशिष्युपधासेटि, नाम्युपान्तेष्वनिट्यपि ॥ १०५ ॥

क्रियातिपत्तिः सर्वाऽपि, भविष्यन्ती तथाऽखिला ।
श्वस्तनी च गुणिन्युक्ता, परेऽपि प्रत्यया वितः ॥ १०६ ॥

अपत्येऽणेयणिञ्ञ्याद्याः, शैवः शैवेय आर्षभिः ।
कौरव्य आदेर्णैरेरण्-व्येययेनायनण्मुखाः ॥ १०७ ॥

रागाट्टोऽणिकणौ रक्ते, कौसुम्भलाक्षिकादिषु ।
शिवोऽस्य देवतेत्यर्थेऽण्, शैवबौद्धार्हतादिषु ॥ १०८ ॥

गृह्यते चाक्षुषं रूप,-मुह्यते चातुरं त्वनः ।
दार्षदाः सक्तवः पिष्टे, क्षुण्णे त्वौदूखला यवाः ॥ १०९ ॥

समूहेऽणादयस्तत्र, शात्रवाश्वीयहास्तिकम् ।
ग्रामता रथकट्या च, वात्या वातूलराजकम् ॥ ११० ॥

तद्वेत्त्यधीतेऽणिकणौ, वैयाकरणतार्किकौ ।
तस्येदमर्थे त्वदीयं, तावकीनं च तावकम् ॥ १११ ॥

तेन दीव्यति संसृष्टं, तरतीकण् चरत्यपि ।
यथाऽऽक्षिकदाधिकौडु-पिकशाकटिकादयः ॥ ११२ ॥

पण्यात् शिल्पान्नियोगाच्च, शस्त्रात् क्रीतादिकण् यथा ।
ताम्बुलिकमार्दङ्गिक,-शौल्कशालिकयाष्टिकाः ॥ ११३ ॥

साहस्रिकश्च सार्पिष्क,-घार्तिकाद्यास्तु संस्कृते ।
उपमाने इवो वच्च, शशीव शशिवन् मुखम् ॥ ११४ ॥

भवे येकणणाद्याश्च, वंश्यनागरिकार्तवम् ।
एवं दिवातनं सान्ध्यं, तत्र साधौ हिते च यः ॥ ११५ ॥

सर्वेभ्यस्त्वतलौ ट्यण् च, क्वापीमन् भाववाचकाः ।
शुक्लत्वं शुक्लता शौक्ल्यं, शुक्लिमा शुक्लभाववत् ॥ ११६ ॥

तदस्यास्तीति मत्वर्थस्तत्र स्यात् सर्वतो मतुः ।
धनवान् बुद्धिमान् धीमान,-दन्तादिन् धनी गुणी ॥ ११७ ॥

*एवं यशस्वी प्रज्ञालः, कृषीवलमुखा अपि ।*
प्रकृष्टेऽर्थे तरतमौ, संख्यायाः पूरणे त्वमी ॥ ११८ ॥

द्वित्रेस्तीयश्चतुःषड्भ्यां, थट् नान्तान्मट् दशावधि ।
एकादशादेर्डश्चैको,-नविंशत्यादितस्तमट् ॥ ११९ ॥

प्रमाणे द्वयसट् दघ्नट्, मात्रट् च प्रकृते मयट् ।
कल्पप् देश्यप् देशीयर्, किञ्चिदूने विशेषणात् ॥ १२० ॥

सात् तद्रूपे तदायत्ते, वारे सुच्कृत्वसौ च धा ।
तस् पञ्चम्यास्त्र आधारे, प्रकारे था च धा च धण् ॥ १२१ ॥

कालाधारे च किं यत्तत्, सर्वैकान्यपरश्च दा ।
इष्ठेयसौ गुणाङ्गात् कः, स्वार्थे चेत्यादि तद्धितम् ॥ १२२ ॥

स्यादयस्तद्धितोत्थाश्च, प्रत्यया: सिद्धशब्दत: ।
आख्यातकृदुणाद्यास्तु, धातो: शब्दादिसाधका: ॥ १२३ ॥

एवं कारकबोधार्थं, प्रयोगा: केऽपि दर्शिता: ।
समासास्तु प्रकरणा,-द्वाच्या वृत्तद्वयोदितात् ॥ १२४ ॥

द्वन्द्वश्चकारै: समनामविग्रहा-दाद्योत्तरास्तत्पुरुषे विभक्तय: ।
चाभ्यां समस्येत विशेषणैर्गुणी, तदान्तरस्थेन च कर्मधारये ॥ १२५

प्रायो बहुव्रीहिरयं गुणैर्गुणी, यदा समस्तोऽन्यविशेषणं भवेत् ।
संख्याद्यपुंस्त्र्येकतया पदं द्विगा, वुपादिपूर्वं तदमन्तमव्ययी ॥ १२६

गुरुतपगणगगनाङ्गण,-तरणिश्रीरत्नसिंहसूरीणाम् ।
शिष्याणुनेदमौक्तिक,-मुदितमुदयधर्मसंज्ञेन ॥ १२७ ॥

मुनि गगन शरेन्दु १५०६ मिते, वर्षे हर्षेण सिद्धपुरनगरे ।
प्राथमिकसिद्धिहेतो,-र्विहितो वाक्यप्रकाशोऽयम् ॥ १२८ ॥

पू.उपा.श्री विनयविजयगणिविरचितः

# ॥ संज्ञाधिकारः ॥

प्रणम्य परमात्मानं, बालानां बोधसिद्धये ।
करोमि प्रक्रियां सिद्ध-, हेमचन्द्रानुसारिणीम् ॥ १ ॥

ॐ नमो हेमचन्द्राय, हैमव्याकरणाय च ।
शब्दपाथोधिसोमाय, जगद्विख्यातकीर्त्तये ॥ २ ॥

आदौ विघ्नविघाताय, शिष्टाचाराच्च शास्त्रकृत् ।
परमेष्ठिनमस्कारं, कुरुते भावमङ्गलम् ॥ ३ ॥

अर्हमित्यक्षरं ध्येयं, परमेश्वरवाचकम् ।
शास्त्रादौ पठतां क्षेम,-व्युत्पत्त्यभ्युदयप्रदम् ॥ ४ ॥

शब्दानां ज्ञप्तिनिष्पत्ती स्यातां स्याद्वाददर्शने ।
शब्दे ह्येकान्ततो नित्येऽनित्ये वा तद्द्वयं कुतः ॥ ५ ॥

तत्रादौ व्यवहाराय, संज्ञां दिशति शास्त्रकृत् ।
औकारान्ता अकाराद्याः, स्वरा वर्णाश्चतुर्दश ॥ ६ ॥

एकमात्रो भवेद्ध्रस्वो, द्विमात्रो दीर्घ उच्यते ।
प्लुतः स्वरस्त्रिमात्रः स्याद्व्यञ्जनं चार्धमात्रकम् ॥ ७ ॥

दूरादामन्त्रणे प्रश्ने, प्रश्नाख्याने च भर्त्सने ।
सम्मत्यसूयाकोपादौ, यथायोगं स्वराः प्लुताः ॥ ८ ॥

स चैकैकस्त्रिधोदात्तो, ऽनुदात्तः स्वरितोऽपि च ।
षोढा च सानुनासिक,-निरनुनासिका इति ॥ ९ ॥

उच्चैर्नीचैः समवृत्यो-च्चार्यमाणाः स्वराः क्रमात् ।
उदात्ताश्चानुदात्ताश्च, स्वरिताश्च भवन्त्यमी ॥ १० ॥

मुखनासोच्चार्यमाणो, वर्णः स्यात्सानुनासिकः ।
मुखेनैवोच्चार्यमाणः ख्यातो निरनुनासिकः ॥ ११ ॥

प्रत्येकमित्यवर्णाद्याः पञ्चाष्टादशधा स्मृताः ।
सन्ध्यक्षरं द्वादशधा, ह्रस्वषड्भेदवर्जितम् ॥ १२ ॥
(दीर्घषड्भेदवर्जितलृकारोऽपि द्वादशधेति पाणिनीयाः) ।

अवर्णवर्ज्जिताश्चैते, स्वरा द्वादश नामिनः ।
लृकारान्ता अकाराद्याः समानाख्याः स्वरा दश ॥ १३ ॥

सन्ध्यक्षराख्याश्चत्वार ए ऐ ओ औ इमे स्वराः ।
अकारावेतयोर्मध्ये सुखोच्चारणहेतुकौ ॥ १४ ॥

व्यञ्जनाख्यास्त्रयस्त्रिंशद्वर्णा हान्ताश्च कादयः ।
मान्तेषु कादिवर्णेषु कचटतपसंज्ञकाः ॥ १५ ॥

पञ्चभिः पञ्चभिर्वर्णै-र्वर्गाः पञ्च प्रकीर्तिताः ।
अवर्गपञ्चमान्तस्थास्ते चतुर्विंशतिर्धुटः ॥ १६ ॥

आद्यद्वितीया वर्गाणामघोषाः शषसा अपि ।
अन्ये स्युर्गादयो वर्णा, घोषवन्तश्च विंशतिः ॥ १७ ॥

शिट्संज्ञका अमी सप्त, तत्र )( कः कुलिशाकृतिः ।
गजकुम्भाकृतिः ≍ पश्च, कपावुच्चारणार्थकौ ॥ १८ ॥

आस्यप्रयत्नस्थानाभ्यां, तुल्याः वर्णाः स्वसंज्ञकाः ।
चतुर्दशानां स्वराणां, स्वस्वभेदा यथा मिथः ॥ १९ ॥

पञ्चपञ्चैकवर्गस्था, वर्णाः स्वाः स्युः परस्परम् ।
यलवाः सानुनासिक,-निरनुनासिका अपि ॥ २० ॥

अष्टौ स्थानानि वर्णाना,-मुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च, नासिकौष्ठौ च तालु च ॥ २१ ॥

विसर्गोऽथाकुहा कण्ठ्या,-स्तालव्या इचुयाश्च शः ।
उपूपध्मानीया ओष्ठ्या, मूर्धन्या ऋटुषाश्च रः ॥ २२ ॥

दन्त्या लृतुलसा ए ऐ, कण्ठतालुसमुद्भवौ ।
ओ औ कण्ठोष्ठजौ ज्ञेयौ, वो दन्तौष्ठ्यः प्रकीर्तितः ॥ २३ ॥

जिह्व्यश्च जिह्वामूलीयोऽनुस्वारो नासिकोद्भवः ।
स्वस्थाननासिकास्थानाः स्युर्ङञणनमा इति ॥ २४ ॥

स्यादुरस्यो हकारस्तु, सहान्तस्थः सपञ्चमः ।
आस्यप्रयत्नाः संवार-विवारस्पृष्टतादयः ॥ २५ ॥

उक्ते वर्णे स्वसंज्ञोऽपि, ग्राह्यः कारे च केवलः ।
संयोगः स्याद् व्यञ्जनानि, स्वराव्यवहितान्यहो ॥ २६ ॥

वर्णो वर्णसमूहो वा, पाठे समुपलभ्यते ।
न दृश्यते प्रयोगे यः, स इत्संज्ञक इष्यते ॥ २७ ॥

स्यादिस्त्यादिर्विभक्तिः स्याद्, विभक्त्यन्तं भवेत्पदम् ।
आदेशः शत्रुवज्ज्ञेयो, भवेन्मित्रवदागमः ॥ २८ ॥

अवसानं विरामः स्याद्, वर्णानुच्चारणं पुनः ।
त्रयो लुक लुप् च लोपश्च वर्णादर्शनवाचकाः ॥ २९ ॥

दीर्घो विसर्गानुस्वारयुक् संयोगपरो गुरुः ।
असंयोगपरो ह्रस्वो, विसर्गाद्युज्झितो लघुः ॥ ३० ॥

अरेदोतो गुणसंज्ञा, ऋ इ उ स्थानभाविनः ।
वृद्धिसंज्ञा स्मृता आ आर्, ऐदौच्च स्वरसंभवाः ॥ ३१ ॥

स्यमौजसः स्युर्घुट्संज्ञाः, पुंस्त्रियोः शिर्नपुंसके ।
विना सम्बोधनार्थं सिं शेषाघुट्संज्ञका अमी ॥ ३२ ॥

यदत्र संज्ञान्यायादि, वर्णाम्नायादि नोदितम् ।
तद्वैयाकरणादिभ्यो लोकेभ्यो बुध्यतां बुधैः ॥ ३३ ॥

# शास्त्रसन्देशमालाविंशतिभागमध्ये ग्रथितानां ग्रन्थानामकारादिक्रमः

(अङ्कैर्भागा विज्ञेयाः)


### अ

अट्ठारसहस्सशीलंगाइरहा ( ५ )
अध्यात्मकल्पद्रुमः ( ९ )
अध्यात्मबिन्दुः ( १८ )
अध्यात्मसारः ( ४ )
अध्यात्मोपनिषत् ( ४ )
अनुमानमातृका ( १६ )
अनेकान्तव्यवस्थाप्रकरणस्य मङ्गलप्रशस्ती ( ५ )
अन्नायउंछकुलयं ( ७ )
अन्ययोगव्यवच्छेदद्वात्रिंशिका ( १६ )
अन्योक्तिशतकम् ( ६ )
अन्तिमाऽऽराधना ( १४ )
अप्पविसोहिकुलयं ( ७ )
अभव्यकुलकम् ( ७ )
अष्टकानि ( ३ )

### आ

आउरपच्चक्खाणं-१ ( १५ )
आउरपच्चक्खाणं-२ ( १५ )
आख्यानकमणिकोशः ( ८ )
आचारोपदेशः ( ११ )
आत्मतत्त्वचिन्ताभावनाचूलिका ( ९ )
आत्मनिन्दाष्टकम् ( १४ )
आत्मप्रबोधः ( १७ )
आत्मबोधकुलकम् ( ७ )
आत्महितकुलकम् ( ७ )
आत्मानुशासनकुलकम् ( ७ )
आत्मानुशासनम् ( १४ )
आत्मानुशास्तिसंज्ञिका पञ्चविंशतिका ( १४ )
आत्मावबोधकुलकम् ( ७ )
आध्यात्मिकमतपरीक्षा ( ५ )
आभाणशतकम् ( ६ )
आराधकविराधकचतुर्भङ्गी ( ४ )
आराधना ( १४ )
आराहणा ( १४ )
आराहणाकुलयं ( ७ )
आराहणापडागा-१ ( १४ )
आराहणापडागा-२ ( १४ )
आराहणापणगं ( १४ )
आराहणापयरणं ( १४ )
आलोयणाकुलयं ( ७ )
आर्षभीयचरितमहाकाव्यम् ( ५ )

### ई

इन्द्रियपराजयशतकम् ( ६ )
ईर्यापथिकीषट्त्रिंशिका ( १६ )
ईर्यापथिकीमिथ्यादुष्कृतकुलकम् ( ७ )

### उ

उत्पादादिसिद्धिः ( १६ )
उत्सूत्रपदोद्घाटनकुलकम् ( ७ )
उपदेशकल्पवल्लिः ( ११ )

उपदेशकुलकम्-१ ( ७ )
उपदेशकुलकम्-२ ( ७ )
उपदेशचिन्तामणिः ( १० )
उपदेशपदग्रन्थः ( १ )
उपदेशप्रदीपः ( १२ )
उपदेशरत्नकोशः ( ८ )
उपदेशरत्नाकरः ( ८ )
उपदेश( धर्म )रसायनरासः ( ८ )
उपदेशरहस्यम् ( ४ )
उपदेशशतकम् ( ६ )
उपदेशसप्ततिका ( ८ )
उपदेशसप्ततिः ( ११ )
उपदेशसारः ( ११ )
उपदेशामृताकुलकम् ( ७ )
उपधानविधिः-१ ( १० )
उपधानविधिः-२ ( १० )
उवएसचउक्ककुलयं-१ ( ७ )
उवएसचउक्ककुलयं-२ ( ७ )
उवएसमाला ( ८ )

ऋ

ऋषभशतकम् ( ६ )
ऋषिमण्डलस्तवः ( १२ )

ए

एकविंशतिर्द्वात्रिंशिकाः ( १६ )
ऐन्द्रस्तुतयः ( ५ )

औ

औष्ट्रिकमतोत्सूत्रोद्घाटनकुलकम् ( ७ )

अं

अंगुलसत्तरी ( १३ )

क

कथाकोषः ( १२ )
कथानककोशः ( १२ )
कर्पूरप्रकरः ( १२ )
कर्मप्रकृतिः ( १३ )
कर्मविपाककुलकम् ( ७ )
कर्मविपाकाख्यः प्रथमः प्राचीनकर्मग्रन्थः ( १३ )
कर्मस्तवाख्यः द्वितीयः प्राचीनकर्मग्रन्थः ( १३ )
कम्मबत्तीसी ( १३ )
कविकल्पद्रुमः ( १८ )
कस्तूरीप्रकरः ( १२ )
कायस्थितिस्तोत्रम् ( १३ )
कालसप्ततिका ( १३ )
कालस्वरूपकुलकम् ( ७ )
कुमारविहारशतकम् ( ६ )
कूपदृष्टान्तविशदीकरणम् ( ५ )
कृष्णराजीविमानविचारः ( १३ )
केवलिभुक्तिप्रकरणम् ( १६ )

क्ष

क्षमाकुलकम् ( ७ )
क्षान्तिकुलकम् ( ७ )
क्षुल्लकभवावलिः ( १३ )

ख

खामणाकुलयं ( १ ) ( ७ )
खामणाकुलयं ( २ ) ( ७ )

ग

गणधरसार्धशतकम् ( ६ )
गाङ्गेयभङ्गप्रकरणम्-१ ( १५ )
गाङ्गेयभङ्गप्रकरणम्-२ ( १५ )
गुणस्थानक्रमारोहः ( १३ )
गुणानुरागकुलकम् ( ७ )
गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाकुलकम् ( ७ )
गुरुतत्त्वप्रदीपः ( १६ )
गुरुतत्त्वविनिश्चयः ( ५ )
गुरुदर्शनहर्षकुलकम् ( ७ )
गुरुविरहविलापः ( १४ )
गोडीपार्श्वस्तवनम् ( ५ )
गौतमकुलकम् ( ७ )

घ

घनगणितसंग्रहगाथाः ( १८ )

च

चउसरणपइन्नयं ( १५ )
चतुर्गतिजीवक्षपणकानि ( १४ )
चतुर्दशजीवस्थानेषु जघन्योत्कृष्टपदे ( १३ )
चरणकरणमूलोत्तरगुण ( १८ )
चारित्रमनोरथमाला ( ८ )
चित्तशुद्धिफलम् ( १८ )
चेइयवंदणमहाभासं ( १० )
चंदावेज्झयं पइण्णयं ( १५ )

ज

जघन्योत्कृष्टपद एककालं गुणस्थानकेषु ( १३ )
जल्पकल्पलता ( १६ )
जिनप्रतिमास्तोत्रम् ( १ )
जिनबिम्बप्रतिष्ठाविधिः ( १० )
जिनशतकम्-१ ( ६ )
जिनशतकम्-२ ( ६ )
जीवजोणिभावणाकुलयं ( ७ )
जीवदयाप्रकरणं ( ८ )
जीवसमासः ( १३ )
जीवादिगणितसंग्रहगाथाः ( १८ )
जीवानुशासनम् ( १४ )
जीवानुशास्तिकुलकम् ( ७ )
जीवाभिगमसंग्रहणी ( १५ )
जैनतत्त्वसारः ( १६ )
जैनस्याद्वादमुक्तावली ( १६ )
जोइसकरंडगं पइण्णयं ( १५ )

ज्ञ

ज्ञाताधर्मकथोपनयगाथाः ( १५ )
ज्ञानप्रकाशकुलकम् ( ७ )
ज्ञानसारः ( ४ )
ज्ञानार्णवः ( ५ )

त

तत्त्वतरङ्गिणी ( १६ )
तत्त्वबोधतरङ्गिणी ( १२ )
तत्त्वामृतम् ( ९ )
तपःकुलकम् ( ७ )
तित्थोगालिपइन्नयं ( १५ )
त्रिशतत्रिषष्टिपाखण्डस्वरूपस्तोत्रम् ( १५ )
त्रिषष्टीयदेशनासंग्रहः ( ११ )

द

दशश्रावककुलकम् ( ७ )

दर्शननियमाकुलकम् ( ७ )
दानकुलकम् ( ७ )
दानविधिः ( १० )
दानषट्त्रिंशिका ( ९ )
दानादिप्रकरणम् ( १२ )
दानोपदेशमाला ( ८ )
दीवसागरपन्नत्ति ( १५ )
*दृष्टान्तशतकम्-१ ( ६ )*
दृष्टान्तशतकम्-२ ( ६ )
देवेन्द्रनरकेन्द्रप्रकरणम् ( १३ )
देशनाशतकम् ( ६ )
देहकुलकम् ( ७ )
देहस्थितिस्तवः ( १३ )
दंसणसुद्धिपयरणं ( १० )
द्वात्रिंशद्द्वात्रिंशिकाः ( ४ )
द्वादश-कुलकम् ( ७ )
द्वादशव्रतस्वरूपम् ( १० )
द्वादशाङ्गीपदप्रमाणकुलकम् ( ७ )

**ध**

धनुःपृष्ठबाहासंग्रहगाथाः ( १८ )
धर्मपरीक्षा ( ५ )
धर्मबिन्दुः ( ३ )
धर्मरत्नप्रकरणम् ( १० )
धर्मरत्नकरण्डकः ( ११ )
धर्मविधिः ( ८ )
धर्मशिक्षा ( ९ )
धर्मसंग्रहणिः ( १ )
धर्मसंग्रहः ( ११ )
धर्माचार्यबहुमानकुलकम् ( ७ )
धर्मोद्यमकुलकम् ( ७ )
धर्मोपदेशः ( ९ )
धर्मोपदेशमाला ( ८ )
धम्मारिहगुणोवएसकुलयं ( ७ )
धम्मोपदेशकुलकम् ( ७ )
धम्मोवएसकुलयं ( ७ )
धूर्ताख्यानम् ( ३ )
धूमावली ( ३ )
ध्यानदीपिका ( १८ )
ध्यानशतकम् ( ६ )

**न**

नन्दीश्वरस्तवः ( १३ )
नमस्कारस्तवः ( १८ )
नयकर्णिका ( १६ )
नयोपदेशः ( ५ )
नरभवदिट्ठंतोवणयमाला ( १२ )
नवकारफलकुलकम् ( ७ )
नवतत्त्वभाष्यम् ( १३ )
नवतत्त्वम् ( १३ )
नवतत्त्वसंवेदनम् ( १३ )
नवपदप्रकरणम् ( १० )
नानाचित्तप्रकरणम् ( ३ )
नारीशीलरक्षाकुलकम् ( ७ )
निगोदषट्त्रिंशिका ( १५ )
नूतनाचार्याय हितशिक्षा ( ९ )
नंदणरायरिसिस्स अन्तिमाऽऽराधना ( १४ )
न्यायखण्डखाद्यापरनामा महावीरस्तवः ( ५ )
न्यायावतारः ( १६ )
न्यायावतारसूत्रवार्तिकम् ( १६ )

प

पज्जंताराहणा ( १४ )
पंचवत्थुगं ( २ )
पञ्चनिर्ग्रन्थी ( १५ )
पञ्चलिङ्गीप्रकरणम् ( १५ )
पञ्चसङ्ग्रहः ( १३ )
पञ्चसंयतप्रकरणम् ( १५ )
पञ्चाशकानि ( १ )
पट्टावलीविसुद्धी ( १६ )
पडिलेहणाविचारकुलकम् ( ७ )
पदार्थस्थापनासंग्रह ( १७ )
पद्मानन्दशतकम् ( ६ )
परमज्योतिःपञ्चविंशतिका ( ५ )
परमाणुखण्डषट्त्रिंशिका ( १५ )
परमात्मपञ्चविंशतिका ( ५ )
परमानन्दपञ्चविंशतिः ( ९ )
पर्यन्ताराधनाकुलकम् ( ७ )
पर्युषणादशशतकम् ( १६ )
पव्वज्जाविहाणकुलयं ( ७ )
पिण्डविशुद्धिः ( १० )
पुण्डरीकतीर्थपतीस्तोत्रम् ( ५ )
पुण्यकुलकम् ( ७ )
पुद्गलपरावर्तस्तवनम् ( १३ )
पुद्गलषट्त्रिंशिका ( १५ )
पुष्पमाला ( ८ )
पूजाविधिः ( ११ )
पोसहविही ( १० )
पौषधषट्त्रिंशिका ( १६ )
प्रज्ञापनोपाङ्गतृतीयपदसंग्रहणी ( १५ )
प्रतरप्रमाणसंग्रहगाथाः ( १८ )
प्रतिमाशतकम् ( ४ )
प्रतिसमयजागृतिकुलकम् ( ७ )
प्रत्याख्यानस्वरूपम् ( १० )
प्रबोधचिन्तामणिः ( ९ )
प्रभाते जीवानुशासनम् ( १४ )
प्रमाणनयतत्त्वालोकालङ्कारः ( १६ )
प्रमाणप्रकाशः ( १६ )
प्रमाणमीमांसा ( १६ )
प्रमादपरिहारकुलकम् ( ७ )
प्रवचनपरीक्षा ( १६ )
प्रवचनसारोद्धारः ( १७ )
प्रव्रज्याविधानकुलकम् ( ७ )
प्रशमरतिः ( ९ )
प्रश्नद्वात्रिंशिका ( १६ )
प्रश्नशतकम् ( ६ )
प्रश्नोत्तररत्नमाला ( १२ )
प्राकृतसंवेगामृतपद्धतिः ( १४ )
प्रातःकालिकजिनस्तुतिः ( ९ )

ब

बन्धस्वामित्वाख्यः तृतीयः प्राचीनकर्मग्रन्थः ( १३ )
बन्धषट्त्रिंशिका ( १५ )
बन्धहेतुप्रकरणम् ( १३ )
बन्धहेतूदयभङ्गप्रकरणसमाप्तिगते द्वे प्रकरणे ( ५ )
बन्धोदयसत्ता ( १३ )
बृहद्वन्दनकभाष्यम् ( १० )

भ

भवभावना ( ८ )
भावकुलकम् ( ७ )
भावनाशतकम् ( ६ )
भावप्रकरणम् ( १३ )
भाषारहस्यम् ( ५ )
भोजनपूर्वचिन्तागाथाः ( ८ )
म
मंगलकुलयं ( ७ )
मण्डलप्रकरणम् ( १८ )
मदादिविपाककुलकम् ( ७ )
मनुष्यभवदुर्लभता ( ९ )
मनोनिग्रहभावनाकुलकम् ( ७ )
महासतीकुलकम् ( ७ )
मार्गपरिशुद्धिः ( ५ )
मार्ग्गणासु बंधहेतूदयत्रिभङ्गी ( १३ )
मिच्छादुक्कडवोसिरणविहिकुलयं ( ७ )
मिथ्यात्वकुलकम् ( ७ )
मिथ्यात्वमथनकुलकम् ( ७ )
मिथ्यात्वविचारकुलकम् ( ७ )
मिथ्यात्वस्थानविवरणकुलकम् ( ७ )
मुखवस्त्रिकास्थापनकुलकम् ( ७ )
मूलशुद्धिः ( १० )
मृत्युमहोत्सवः ( १४ )
मोक्षोपदेशपञ्चाशकम् ( ९ )
य
यतिदिनकृत्यम् ( ११ )
यतिदिनचर्या ( १० )
यतिलक्षणसमुच्चयः ( ४ )
यतिशिक्षापञ्चाशिका ( ८ )
यात्रास्तवः ( ११ )
युक्त्यनुशासनम् ( १६ )
युक्तिप्रकाशः ( १६ )
युक्तिप्रबोधः ( १६ )
युगपद्बन्धहेतुप्रकरणम् ( १३ )
योगदृष्टिसमुच्चयः ( ३ )
योगप्रदीपः ( १२ )
योगबिन्दुः ( ३ )
योगशतकम् ( ३ )
योगशास्त्रम् ( १८ )
योगानुष्ठानकुलकम् ( ७ )
योनिस्तवः ( १३ )
र
रत्नत्रयकुलकम् ( ७ )
रत्नसञ्चयः ( १७ )
ल
लघुप्रवचनसारोद्धारः ( १७ )
लध्वल्पबहुत्वप्रकरणम् ( १३ )
लोकतत्त्वनिर्णयः ( ३ )
लोकनालिकाद्वात्रिंशिका ( १३ )
व
वाक्यप्रकाशः ( १८ )
वाणारस्यां कृतं श्रीपार्श्वनाथजिनस्तोत्रम् ( ५ )
विचारपञ्चाशिका ( १३ )
विचारसप्ततिका ( १७ )
विचारसारः ( १७ )
विजयप्रभसूरिक्षामणकविज्ञप्तिः ( ५ )

विजयप्रभसूरिस्वाध्यायः ( ५ )
विजयोल्लासमहाकाव्यम् ( ५ )
विद्वद्गोष्ठी ( १२ )
विभक्तिविचारः ( १५ )
विरतिफलकुलकम् ( ७ )
विविधतपोदिनाङ्ककुलकम् ( ७ )
विवेककुलकम् ( ७ )
विवेकमञ्जरी ( ८ )
विशेष-णवतिः ( १५ )
विंशतिर्विंशिकाः ( ३ )
विषयविरक्तिकुलकम् ( ७ )
वीरस्तवः ( १५ )
वैराग्यकल्पलता ( १९+२० )
वैराग्यरसायनम् ( ८ )
वैराग्यशतकम् ( ६ )
व्यवहारकुलकम् ( ७ )
व्याख्यानविधिशतकम् ( ६ )

## श

शङ्खेश्वरपार्श्वजिनस्तोत्रम्-१ ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम्-२ ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम्-३ ( ५ )
शमीनपार्श्वस्तोत्रम् ( ५ )
शास्त्रवार्तासमुच्चयः ( ३ )
शीलकुलकम् ( ७ )
शीलोपदेशमाला ( ८ )
शोकनिवारणकुलकम् ( ७ )

## श्र

श्राद्धदिनकृत्यम् ( १० )
श्राद्धविधिः ( १० )
श्रावकधर्मकृत्यम् ( ११ )
श्रावकधर्मविधिः ( ३ )
श्रावकप्रज्ञप्तिः ( १० )
श्रावकव्रतभङ्गप्रकरणम् ( १८ )
श्रीकातन्त्रविभ्रमसूत्रम् ( १८ )
श्रीमद्गीता-तत्त्वगीता ( १८ )
श्रुतास्वादः ( ८ )
श्रृङ्गारवैराग्यतरङ्गिणी ( १२ )

## ष

षट्स्थानकम् ( १३ )
षडशीतिनामा चतुर्थः प्राचीनकर्मग्रन्थः ( १३ )
षड्दर्शनपरिक्रमः ( १६ )
षड्दर्शनसमुच्चयः-१ ( २ )
षड्दर्शनसमुच्चयः-२ ( १६ )
षड्द्रव्यसङ्ग्रहः ( १३ )
षड्विधाऽन्तिमाऽऽराधना ( १४ )
षष्ठिशतकम् ( ६ )
षोडशकप्रकरणम् ( ३ )

## स

संग्रहशतकम् ( ६ )
संज्ञाकुलकम् ( ७ )
संज्ञाधिकारः ( १८ )
संबोधप्रकरणम् ( २ )
संविज्ञसाधुयोग्यनियमकुलकम् ( ७ )
संवेगकुलयं ( ७ )

संवेगद्रुमकन्दली ( ९ )
संवेगमंजरीकुलयं ( ७ )
संवेगरंगमाला ( १४ )
संवेगामृतम् ( १८ )
सङ्घस्वरूपकुलकम् ( ७ )
सज्जनचित्तवल्लभः ( ९ )
सन्देहदोलावली ( १६ )
सभापञ्चकप्रकरणम् ( १८ )
सप्ततिकाभाष्यम् ( १३ )
समताशतक ( ६ )
समवसरणप्रकरणम् ( १३ )
समवसरणस्तोत्रम् ( १३ )
समाधिशतक ( ६ )
समाधिशतकम् ( ६ )
समाधिसाम्यद्वात्रिंशिका ( ४ )
सम्मतिसूत्रम् ( १६ )
सम्मत्तकुलयं-१ ( ७ )
सम्मत्तुप्पायविही कुलकम् ( ७ )
सम्यक्त्वकुलकम्-२ ( ७ )
सम्यक्त्वकुलकम्-३ ( ७ )
सम्यक्त्वपरीक्षा ( १६ )
सम्यक्त्वसप्ततिः ( १० )
सम्यक्त्वस्वरूपकुलकम् ( ७ )
सर्वज्ञशतकम् ( ६ )
सर्वज्ञसिद्धिः ( २ )
सर्वतीर्थमहर्षिकुलकम् ( ७ )
सर्वश्रीजिनसाधारणस्तवनम् ( २ )
सार्धमिकवात्सल्यकुलकम् ( ७ )
सामाचारी ( ४ )
सामान्यगुणोपदेशकुलकम् ( ७ )
साम्यशतकम् ( ६ )
सारावलीपइण्णयं ( १५ )
सिद्धदण्डिकास्तवः ( १३ )
सिद्धपञ्चाशिका ( १३ )
सिद्धप्राभृतम् ( १३ )
सिद्धसहस्त्रनामकोशः ( ५ )
सिद्धान्तसारोद्धारः ( १८ )
सुक्ष्मार्थविचारसारोद्धारः ( १५ )
सुभाषिताष्टकानि ( १२ )
सुमिणसित्तरी ( ८ )
सूक्तरत्नावली-१ ( १२ )
सूक्तरत्नावली-२ ( १२ )
सूक्तिमुक्तावली ( १२ )
सूक्ष्मार्थसप्तति प्रकरणम् ( १८ )
सूत्रकृताङ्गाद्यचतुरध्ययनाऽनुक्रमगाथाः (१५)
स्तवपरिज्ञा ( १० )
स्त्रीनिर्वाणप्रकरणम् ( १६ )
स्त्रीवास्तविकताप्रकरणम् ( ८ )
स्याद्वादकलिका ( १६ )
स्याद्वादभाषा ( १६ )
स्याद्वादमुक्तावली ( १६ )

ह

हिंसाफलाष्टकम् ( ३ )
हिओवएसमाला ( ८ )
हिङ्गुलप्रकरणम् ( १२ )
हृदयप्रदीपषट्त्रिंशिका ( ९ )

# ॥ शास्त्रसंदेशमाला ॥

१ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - १
२ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - २
३ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - ३
४ पू. उपा. श्रीयशोविजयगणिवराणां कृतयः - १
५ पू. उपा. श्रीयशोविजयगणिवराणां कृतयः - २
६ शतकसंदोहः
७ कुलयसंग्गहो
८ भावणासत्थणिअरो
९ भावनाशास्त्रनिकरः
१० आयारसत्थणिअरो
११ आचारशास्त्रनिकरः
१२ काव्योपदेश-ज्ञातोपदेशग्रन्थनिकरौ
१३ प्रारम्भिकाणि कार्मग्रन्थिकाणि लोकप्रकाशीयानि च प्रकरणानि
१४ अन्तिमाराधनाग्रन्थाः
१५ आगमिकानि प्रकरणानि तथा प्रकीर्णकानि
१६ दार्शनिक-चर्चा ग्रन्थनिकरौः
१७ विविधविषयसंकलनाग्रन्थाः
१८ ध्यानयोग-गणित-व्याकरणशास्त्रनिकराः
१९ वैराग्य कल्पलता - १
२० वैराग्य कल्पलता - २